GOLADĪPIKĀ OF PARAMEŚVARA

('THE LAMP OF SPHERICAL ASTRONOMY')

Critically edited with

Auto-commentary, Introduction and Translation

CONTENTS

Chapter IV

GOLADIPĪKA ; TRANSLATION AND NOTES

Chapter I

Chapter II

THE GOLADĪPIKĀ BY PARAMEŚVARA

INTRODUCTION

The *Goladīpikā*, presented here in a critical edition for the first time[1] with the author's own commentary, is an important work of Parameśvara who holds an honoured place in the history of Indian astronomy in Kerala.

Contents and Scope of the Work

In this work the author deals, in four chapters containing about 270 verses, with spherical astronomy as envisaged by Indian astronomers and with calculations, measurements, etc., as conceived by Kerala writers on the subject.

The construction of a large Armillary Sphere with two spheres, the inner representing the *Bhagola* (starry sphere), moving inside the other representing the *Khagola* (celestial sphere), and both fitted on the same central axis, forms the subject of the first chapter. Movements of the planets, etc., can be projected and measured on this sphere.

The second chapter is concerned with discussions on the apparent and true motions of the planets, the

[1] The *Goladīpikā* published in the Trivandrum Sanskrit Series No. 49 is a different work. See below.

position of the Moon, the cause of eclipses and the spherical shape of the orbs of the Sun and the Moon.

The next chapter deals with the Earth. The situation of the Earth in the universe, methods of measuring its circumference, our relative sense of directions, and a detailed elucidation of the differences in the length of the days and nights, and the rising of the Zodiacal Signs (*Rāśi-s*) towards the poles, and related phenomena observed in those places, take up the first part of this chapter. In the latter part an account of Purāṇic cosmogony is given.

The fourth chapter is devoted to theories underlying astronomical measurements. The Earth-line (*Bhū-sūtra*) is defined first. The great gnomon and shadow (*Mahā-Śaṅku* and *Mahā-Chāyā*) are then elaborately dealt with. Methods of calculating the great gnomon for different directions are given and illustrated in verses 7-22. The generally used 12-inch gnomon and the calculation of the true position of the Sun therefrom is explained in verses 24-53. Calculation of the Earth's shadow and the angular diameters of the Sun and Moon at the time of eclipses is given in verses 54-56. Verses 62-78 treat of parallaxes of latitude and longitude, which have peculiarities in the method of calculation in Kerala. Determination of the rising of the Signs (*Lagna*) is then considered in verses 79-84. Methods for the actual measurement of the precession of the equinoxes follow in verses 85-90 and the work concludes with the author giving the latitude and longitude of his place and the date of composition of

the work, the *Śaka* year 1365. Parameśvara's ***Goladīpikā*** is thus a good introduction to the Indian system of spherical astronomy, giving a comprehensive idea of the various Indian theories and conceptions on the subject.

Two Goladīpikā-s

There is another ***Goladīpikā*** published in the Trivandrum Sanskrit Series (No. 49) of which several manuscripts are available. It is also by the same Parameśvara as is seen from references in the work itself:

परमादिनोक्तमेवं संक्षेपादीश्वरेण गोलस्य ।
संस्थानं लघुमतये, वक्तव्यं चान्यदस्ति गोलगतम् ॥
युक्तिः प्रदर्शिता प्राङ् मया महाभास्करीयभाष्यस्य ।
सिद्धान्तदीपिकायां विवृतौ, वक्ष्ये तथापि शङ्कादेः ॥

(verses 68-69).

The author, Parameśvara, sometimes mentions his name as Paramādinā Īśvareṇa (Īśvara prefixed by Parama) for metrical convenience (cf. colophonic verse to his *Āryabhaṭīya-vyākhyā*). The Siddhāntadīpikā is a well-known commentary of his on the ***Mahābhāskarīya-bhāṣya*** of Govinda-svāmin.

In the *Goladīpikā* published in the Trivandrum Sanskrit Series, the author covers more or less the same ground as in the work edited here. But some topics like cosmogony are left out; others, like the conception of the *yuga-s* and calculation of the latitudes of planets, are newly introduced, and some common topics, like

the great gnomon and shadow and parallax, are treated in greater detail. In the published *Goladīpikā*, there is no chapter division in the text and also the topics are not so carefully arranged as in the work edited here. About ten verses are common to the two texts.

There is a unique palmleaf manuscript in Malayalam script of the *Goladīpikā* in the India Office Library, London (No. 6297). This contains the text published in the Trivandrum Sanskrit Series, with profuse quotations from other astronomical works interspersed between the lines.

Parameśvara the author

Parameśvara came of the Bhṛgu *gotra* and Āśvalāyana *sūtra* and was a resident of the village of Ālattūr (Sanskritized into Vaṭaśreṇī, called Vaṭaśśēri) in South Malabar. His house was situated on the northern bank of Nilā or Bhāratappuzha river where it joins the sea, a fact which he mentions in several of his works: cf. *Nilābdhyoḥ saṅgamāt saumye sthitena* (colophonic verse to his commentary on the *Sūrya-siddhānta*).[1] He gives the latitude and longitude of the place at the end of the *Goladīpikā* :

समरेखायाः पश्चादष्टादशयोजनान्तरे ग्रामे ।
स्वरकृतपट्टुलिताक्षे . . . . ॥

(IV. 91).

[1] See also the ending verses of *Goladīpikā* and *Mahābhāskarīya-bhāṣya-vyākhyā* and the introductory verse to his commentary on the *Līlāvatī*.

Thus it was eighteen *yojana-s* to the west of the Central (Ujjain) meridian and having a sine latitude 647 (or 10°-51′ north latitude).

Parameśvara's parentage is not known, but he mentions his teacher Rudra in several of his works. That Parameśvara studied also under a Mādhava and a Nārāyaṇa is attested to by his pupil's pupil, Nīlakaṇṭha Somayājin: cf. परमेश्वरस्तु रुद्रपरमेश्वरात्मजनारायणमाधवादिभ्यो गोलविद्भ्यो गणितगोलयुक्तीरपि बाल्य एव सम्यग्गृहीत्वा . . . .

(*Āryabhaṭīya-bhāṣya, Golapāda*, verse 48)

Parameśvara's grandfather was the pupil of a Govinda,[1] author of *Muhūrta-ratna*. This is stated by Parameśvara himself in his commentary on this latter work:

गोविन्दपूज्यपादेन कृपासंसिक्तचेतसा ।
मुहूर्तानामनुग्राह्यैर्मुहूर्तगणिरुद्धृतः ॥
तद्दिनस्तच्छिष्यपौत्रेण किञ्चिद्वित् परमादिना ।
भावो विव्रियते स्वल्पमीश्वरेण यथाश्रुतम् ॥

Parameśvara refers to this Govinda in his *Ācārasaṅgraha* also:

पितुः पितुर्मे गुरवस्तस्मा गोविन्दनामा भुवि विश्रुतोऽभवत् ।
तेनोदितो यो गुरुपङ्क्तितो मां आप्तः स आचार इह प्रदिष्टः ॥

[1] This Govinda is often wrongly identified with Govindasvāmin, commentator of the *Mahābhāskarīya* (cf. Ulloor, *Kerala Sāhitya Caritram*, II 96, 102). Govindasvāmin is an early author who followed on Bhāskara I (seventh century) and is cited by Śaṃkaranārāyaṇa (A.D. 869) in his *Laghubhāskarīyavivaraṇa* and hence is different from this Govinda.

Date of Parameśvara

Parameśvara himself gives the dates of completion of two of his works. He wrote the *Dṛggaṇita* in A. D. 1431; cf.

एवं दृग्गणितं शाके त्रीपुविश्वमिते (1353) कृतम् ।

The present work, *Goladīpikā*, was composed in A. D. 1443; cf.

. . . . शाकेऽक्षषट्त्रिचन्द्र (1365) मिते ।
परमेश्वरनाम्नेयं वदनमुखा गोलदीपिका रचिता ॥

Since Parameśvara says in his *Mahābhāskarīya-bhāṣya-vyākhyā* that he carried on investigations for 55 years before stabilizing his new system and writing his *Dṛggaṇita* in 1431, and since Nīlakaṇṭha Somayājin (born 1443) speaks of being instructed by Parameśvara,[1] our author might be taken to have lived between 1365 and 1460.

Works of Parameśvara

Parameśvara's chief service to astronomy is the revision of the *Parahita*[2] system of astronomy prevalent in Kerala, and the founding of the *Dṛggaṇita* system in order to make the results of astronomical calculations accord with actual observation. Besides presenting eth fundamentals of the new system in a work called *Dṛggaṇita*, he wrote several original treatises on the various aspects of astronomy. These are:

[1] Cf. his *Āryabhaṭīya-bhāṣya*, *Golapāda*, verse 48.

[2] The basic text of this system the *Grahacāra-nibandhana* of Haridatta has been edited by the present editor, Madras, 1954

1. The two *Goladīpikā*-' nd a commentary on one of them.
2. Three works on eclipses—the *Grahaṇa-maṇḍana*,[1] *Grahaṇa-nyāya-dīpikā*,[2] and *Grahaṇāṣṭaka*.[3]
3. *Vākyakaraṇa*,[4] which gives the methods for the derivation of the several astronomical tables used for calculations.
4. *Vyatīpātāṣṭaka-vṛtti*,[5] in verse, on the astronomical phenomena of *Lāta* and *Vaidhṛta*.

He also wrote erudite commentaries on several astronomical texts:

1. *Bhaṭadīpikā* on the *Āryabhaṭīya*.[6]
2. *Pārameśvara* on the *Laghu-bhāskarīya* of Bhāskara I.[7]
3. *Karmadīpikā* on the *Mahā-bhāskarīya* of the same author.[8]
4. *Siddhāntadīpikā* on Govindasvāmin's *Bhāṣya* on the *Mahā-bhāskarīya*.[9]

[1] Mss. Travancore University Manuscripts Library, 788-B, L. 1248-G.

[2] This is a hitherto unknown work of Parameśvara, a much damaged Ms. of which is available in the last folios of Travancore University Ms. 762.

[3] Mss. Travancore University, 475-K, C. 166-E.

[4] A hitherto unknown work of Parameśvara. See Travancore University Ms. C. 133-A.

[5] Travancore University Ms. 788-D.

[6] Ed. H. Kern, Leiden, 1874.

[7] Anandasrama Sanskrit Series No. 128, Poona, 1946.

[8] *Ibid.*, No. 126, Poona, 1945.

[9] Critically edited in the Madras Government Oriental Series by T. S. Kuppanna Sastri.

5. *Pārameśvara* on the *Laghu-mānasa* of Muñjāla.[1]
6. *Vivaraṇa* on the *Sūrya-siddhānta*.[2]
7. *Vivaraṇa* on the *Līlāvatī* of Bhāskara II.[3]

He has also contributed to the astrological aspect of Jyotiṣa through the following works:

1. *Ācārasaṅgraha*.[4]
2. *Jātaka-paddhati*.[5]
3. Commentary on the *Muhūrta-ratna* of Govinda.[6]
4. Commentary on the *Jātaka-paddhati* of Śrīpati.[7]
5. Commentary on the *Praśna-ṣaṭpañcāśikā* of Pṛthuyaśas.[8]

Manuscripts of two other works, *Muhūrtāṣṭaka-dīpikā* and *Bhaṭadīpikā*, which Parameśvara enumerates among his other works at the end of his commentary on the *Mahā-bhāskarīya*,[9] are yet to be discovered. There are also certain other works which are likely to

[1] Anandasrama Sanskrit Series No. 123, Poona, 1944.

[2] Mss. Travancore University No. 8358-J; Madras Oriental Manuscripts Library R. 3730.

[3] Mss. Travancore University 10614-B; Madras R. 338, R. 5160.

[4] Mss. Travancore University 1055-D; Trivandrum Palace Library 867, 868, 869.

[5] Mss. Travancore University C. 1052-B, C. 2478-E.

[6] Mss. Travancore University T. 144.

[7] Mss. Travancore University C. M. 665.

[8] Mss. Travancore University 5963, 12235, T. 612. Madras, D. 13964.

[9] Cf. concluding verse of the commentary

मुहूर्ताष्टकसिद्धान्तवाक्यभाष्यार्थकर्मणाम् ।
दीपिका गोलभटयोश्चकार परमेश्वरः ॥

be Parameśvara's but which lack confirmative evidence of his authorship.

Manuscript Material

The present edition of the *Goladīpikā* is based on seven manuscripts of the text, designated A to G, and two of the commentary, designated A and B, all in palmleaf, written in Malayalam script. The textual manuscripts used are:

A: Ms. No. R. 5192 of the Government Oriental Manuscripts Library, Madras

B, C, D, E, F: Mss. 762-E, 5864-A, 8358-B, L. 1313-B, and T. 341 of the Travancore University Manuscripts Library, Trivandrum.

G: a transcript with Sri G. Harihara Sastri, Madras.

All these manuscripts are complete, except B which lacks four folios in the beginning containing the portion up to II. 36; some lacunae and broken letters occur in E and F.

The manuscripts are not free from obviously corrupt readings, due, probably, to the scribes' ignorance of the subject. A and C, which originally belonged to the same collection show close relationship, even in omissions and corrupt readings (cf. II. 11. 31, 45; IV. 17, 19, 40, etc.), but one is not a copy of the other; for differences see I. 12, 15; II. 23; III. 74, 78; IV. 22, 33. Manuscript F is also akin to these two. Manuscripts D and G have several

common readings, but G, which generally presents a correct text, has been especially useful in determining the text in several places (see, for instance, III. 16, 87; IV. 49), and possesses some unique readings (cf. I. 8; III. 10, 17).

The two manuscripts of the commentary used are:

A. Ms. No. R. 5145 of the Government Oriental Manuscripts Library, Madras.

B. Ms. No. 762-F of the Travancore University Manuscripts Library, Trivandrum.

They are both complete, independent of each other and generally correct. A few emendations have been given in brackets in the edition.

I am extremely thankful to Sri T. S. Kuppanna Sastri, M.A., formerly of the Presidency College, Madras, for his unstinting help and collaboration in the editing and translating of this work. I am indebted to the Travancore University Manuscripts Library and the Government Oriental Manuscripts Library, Madras, and to Sri G. Harihara Sastri for the manuscripts used for this edition. I am grateful to Dr. V. Raghavan for the facilities given to me for doing my research in Kerala works on Indian astronomy and for revising the Introduction.

परमेश्वरकृता गोलदीपिका

प्रथमोऽध्यायः

[मङ्गलाचरणम्]

[1]वन्दे किशोरं पार्वत्या अङ्कसंस्थं गजाननम् ।
स्तन्यपानरतं कल्पद्रुमस्याधो विनायकम्[2] ॥ १ ॥
निलायाः सौम्यतीरेऽब्धेः कूलस्थः **परमेश्वरः** ।
संक्षेपाद् गोलसंस्थानं वक्ति बालाय भार्गवः ॥ २ ॥

[गोलबन्धविधिः]

अधऊर्ध्वयाम्यसौम्यगमिह वृत्तं दक्षिणोत्तराख्यं स्यात् ।
तन्मध्येऽप्यधऊर्ध्वं वृत्तं पूर्वापरं तु घटिकाख्यम् ॥ ३ ॥
बहिरनयोस्तिर्यक् स्याच्चतुराशास्वस्तिकं परं वृत्तम् ।
विषुवत्संज्ञितमेतत् त्रितयं [a]खरसाङ्कमत्र घटिकाख्यम् ॥ ४ ॥

परमेश्वरकृता गोलदीपिकाविवृतिः

अविदितगोलस्थितिभिर्मत्वैषा तु न सुगम्येति ।
गोलस्य दीपिकाया विलिख्यते विवृतिरपि च मूलकृता[3] ॥

३-४. अधऊर्ध्वेति । वंशशलाकादिना निर्मितमिह वृत्तं स्यात् । अधऊर्ध्वदिशोर्याम्यसौम्यदिशोश्च यातं दक्षिणोत्तराख्यं वृत्तं तथा निदध्यादि-

[1] F. *vv.* 1-7, only bits of the lines are available.
[2] D. निवासिनं for विनायकम्.
[3] B. Last *pāda* broken away.

a खरसेति 60.

[a]खरसाग्न्यङ्कमिहान्यद् द्वितयं तद्वत्पुनः परं वृत्तम् ।
पूर्वापरस्वस्तिकगमधऊर्ध्वाभ्यां च सौम्यदक्षिणयोः ॥ ५ ॥
[b]जिनभागे बध्नीयादपमाख्यं दक्षिणोत्तरे वृत्ते ।
घटिकाख्योभयपार्श्वेऽभीष्टकान्यन्तरे ततस्तद्वत् ॥ ६ ॥
स्वाहोरात्राख्यानि च बध्नीयान्मण्डलान्यतुल्यानि ।
अपमगपातद्वयगं[1] सौम्ये याम्ये ततश्च भत्रितये ॥ ७ ॥
परमक्षेपान्तरितं चन्द्रादेः क्षेपमण्डलं भवति[2] ।

त्यर्थः । चतुराशास्वस्तिकं पूर्वदक्षिणपश्चिमसौम्यपार्श्वेषु स्वस्तिकं यथा भवति तथा निदध्यात् । [3]खरसाङ्कं, रेखाणां षष्ट्या अङ्कितं, घटिकामण्डलम् । घटिकाज्ञानार्थमङ्कविधिः ।

५. खरसाग्न्यङ्कितं रेखाणां षष्ट्युत्तरशतत्रयेणाङ्कितमन्यत्[4] मण्डलद्वयम् । त्रिंशांशकपरिज्ञानार्थं तयोरङ्कविधिः । तद्वद् रेखाणां षष्ट्युत्तरशतत्रयेणाङ्कितमन्यदपमण्डलाख्यं वृत्तम् । अधऊर्ध्वाभ्याम् अधऊर्ध्वस्वस्तिकाभ्यामित्यर्थः[5] ।

७a. स्वाहोरात्राणि तद्वत्, घटिकामण्डलवत्, पूर्वापरगाणी[6]त्यर्थः । अतुल्यानि गोलपार्श्वयोः पूर्वापरगत्वात् परस्परमतुल्यानीत्यर्थः । नानाप्रमाणानीत्यर्थः ।

७b-८a. अपमगेति । अपमण्डले यत्र पातस्तिष्ठति तस्मात्सप्तमराशौ द्वितीयः पातस्तिष्ठति । पातद्वयस्थानम् अपमण्डले लग्नम् । ततः पातद्वयस्थानात् त्रिराश्यन्तरे परमक्षेपमानेनापमण्डलादन्तरितं चन्द्रादीनां विक्षेपमण्डलं भवति । प्रथमपातादारभ्य सौम्यगम्, अन्यपातादारभ्य याम्यगं च तत् भवति ।

[1] F. अपक्रमपातद्वयगं. [2] G. क्षेपं च मण्डलं भवति.
[3] B. खरसाङ्कगं. [4] A. न्यम.
[5] B. Two words broken away. Words, here and there are broken away in the next few lines also. [6] Mss. read नी.

[a] खरसाग्नीति 360. [b] जिनेति 24.

विषुवद्वयाम्योदक्स्वस्तिकयोर्गोलदण्डकः[1] प्रोतः ॥ ८ ॥
नक्षत्रगोल एव स्यादिह बाह्ये खगोलोऽस्ति ।
तस्मिन्विषुवत् त्रितयं प्राग्वत्, क्षितिजाख्यमेषु तिर्यक्स्थम् ॥ ९ ॥
सममण्डलं तु पूर्वापरगं, याम्योत्तराख्यमपरं[2] स्यात् ।
कल्प्या भूः समवृत्ता मृदादिना गोलदण्डमध्यगता ॥ १० ॥
गोलस्थितिरेवं स्यात् निरक्षदेशे ह्यभीष्टदेशे तु ।
अध ऊर्ध्वं च खगोले याम्योदक्स्वस्तिकात् पलज्यान्ते ॥ ११ ॥
कृत्वा[3] वेधद्वितयं तत्प्रोतं गोलदण्डकं कुर्यात् ।
उन्मण्डलाख्यवृत्तं गोलगदण्डाग्रयुग्मकप्रोतम् ॥ १२ ॥
कुर्यात्[4] पूर्वापरग[5]स्वस्तिकगं चेष्टदेशगोलोऽयम् ।

८b-९b. विषुवदिति । दक्षिणोत्तरगतं यद्विषुवन्मण्डलं तिर्यग्गतं च यत्ताभ्यामुत्पन्नयोर्याम्योदक्स्वस्तिकयोः प्रोतो गोलदण्डश्च कार्यः । एतच्चक्रं नक्षत्रगोलसंज्ञितं स्यात् । ज्योतिश्चक्रमिति च तदुच्यते । अस्य बहिर्भागे खगोलाख्यं चक्रमपि कार्यम् । तत्रापि[6] विषुवन्मण्डलवत् त्रितयं प्राग्वत् कार्यम् । तेषु घटिकामण्डलवत् पूर्वापरायतं सममण्डलाख्यं स्यात् । तिर्यग्गतं तत्र क्षितिजाख्यं स्यात् । अत्राप्यन्यद्दक्षिणोत्तराख्यं भवति ।

११-१३a. अभीष्टेति । स्वदेशगोलस्थितिसिद्धये खगोलस्य दक्षिणस्वस्तिकादधः उत्तरस्वस्तिकादूर्ध्वं च पलज्याकाष्ठतुल्या तरे दक्षिणशलाकायामुत्तरशलाकायां च वेधौ कृत्वा तयोर्वेधयोर्गोलदण्डस्याग्रद्वयं प्रवेशयेत् । तत्प्रवेशात् प्रागेव गोलयोर्व्यासान्तरालप्रमाणं[7] शरदण्डिकाद्वयं गोलदण्डाग्रयोर्निश्चलं निधेयम् । तदनन्तरं दण्डाग्रयुगं वेधद्वये प्रवेश्यम् । इति कर्मक्रमः ।

[1] G. गोलकः (corrupt.)
[2] A. C. D. मवमं. Here अवम should be taken to mean 'the last'.
[3] A. कृत्वा duplicated.
[4] D. कुर्यात् left out.
[5] D. पूर्वात् परग.
[6] A. omits अपि.
[7] A. व्यासान्तरादल्पप्रमाणं.

शलाकिके च योज्ये दण्डे गोलान्तरे स्थिरत्वाय ॥ १३ ॥
भ्रमति ह्यपराभिमुखं प्रवहाक्षेपात् सदा भगोलोऽयम् ।
स्थिर एव खगोलः[1] स्याद्दिगादिसिद्ध्यै प्रकल्पितो यः[2] ॥ १४ ॥
[3]लम्बाक्षज्ञानार्थं प्रकल्प्यते दण्डनाभिहरिजान्ते ।
अन्यद् द्युवृत्तमक्षैर्ज्याक्षाग्रेह लम्बकः[4] क्रान्तिः ॥ १५ ॥

इति गोलदीपिकायां गोलबन्ध[5]विध्याख्यः[6]
प्रथमोऽध्यायः[7]

पुनः क्षितिजवदपरं वृत्तं पूर्वापरस्वस्तिकयोर्लग्नं गोलमध्यगतदण्डस्याग्रद्वयप्रोतं[8] दक्षिणोत्तरशलाकयोर्लग्नं कुर्यात् । तदुन्मण्डलं भवति । एवं स्वदेशगोलावस्थितिः ।

१३b-१५. शलेति । गोलान्तरे भगोलखगोलयोरन्तरगतगोलदण्डभागे । लम्बेति । बालानां लम्बाक्षयोः स्वरूपप्रदर्शनाय क्षितिजमण्डलावसाने उदग्भागे याम्यभागे वा अक्षज्यातुल्यव्यासार्धमेकं द्युमण्डलं गोलदण्डमध्ये केचित्प्रकल्पयन्ते, यथा तस्याधःपरिधिरूर्ध्वपरिधिर्वा क्षितिजस्पृग् भवति । तत्र[9] द्युवृत्तोन्मण्डलयोः संपातात् पूर्वस्वस्तिकान्तमवलम्बधनुः । क्रान्तिस्थानीयोऽत्रावलम्बकः कोटिरूपः स्यात् । द्युवृत्तस्य व्यासार्धमक्षज्याख्यभुजा । सात्र भुजास्थानीया । द्युवृत्तक्षितिजसंपाताद् भूमध्यान्तं कर्णः । स तु त्रिज्यामितः ।

इति गोलबन्धविधिः प्रथमः

[1] D. भगोल (wrong). [2] G. कः. [3] A. Corrupt लंबोक्ष.
[4] A. C. का. [5] A. C. G. निबन्धन; D. F. बन्धन.
[6] आख्य; not in MSS.; it is added to be uniform with the other chapter colophons. [7] A. B. C. E. omit अध्यायः.
[8] A. स्याधःपात [9] B. तद्.

द्वितीयोऽध्यायः

[दैनंदिनं ग्रहभ्रमणम्]

अपमण्डले तु सूर्यः पूर्वाभिमुखः सदा चरति ।
भ्रमति ह्यपराभिमुखं वेगाधिक्यात्तथापि गोलस्य ॥ १ ॥
प्रवहमरुत्प्रक्षिप्तो भगोल उर्वीं प्रदक्षिणीकृत्य ।
अपराभिमुखं षष्ट्या घटिकाभिर्भ्रमति भूयोऽपि ॥ २ ॥
भूपृष्ठादुपरि मरु[a]द्रवियोजनसंमितान्तरे प्रवहः ।
नियतगतिरपरगः स्याद्, भूवायुरधश्च तस्य भिन्नगतिः ॥ ३ ॥
घटिकाख्यषष्टिभागभ्रमणे[1] कालोऽत्र नाडिकेत्युदिता ।
न तु दिवसषष्टिभागो गोलभ्रमणाद्यतोऽधिको दिवसः ॥ ४ ॥
भूपार्श्वगतं क्षितिजं तदूर्ध्वगास्तूदिता ग्रहा दृश्याः ।
भूमितनुव्यवधानात्तस्याधःस्था ग्रहा न दृश्यन्ते ॥ ५ ॥
इति गदितं शास्त्रेषु क्षितिपृष्ठादूर्ध्वगा ग्रहा ह्येव ।
अस्माभिर्दृश्यन्ते कुपृष्ठतोऽधोगता न दृश्यन्ते ॥ ६ ॥

१-२. अथ गोले ग्रहचारः प्रदर्श्यते—अपमण्डल इति । अत्रापमण्डलस्य पूर्वापरगत्वं प्रकल्प्य तस्मिन् पूर्वाभिमुखश्चरतीत्युक्तम्, न तु साक्षात्पूर्वाशामङ्गीकृत्य[2] । प्रदक्षिणीकृत्य, उर्व्याः परित इत्यर्थः ।

४. घटिकामण्डलस्य षष्टिभागभ्रमणे यः कालः सोऽत्र गोलभ्रमणविषये नाडिकेत्युच्यते । तासां नाडिकानां षष्ट्या गोलो भ्रमति । एकोनषष्टिप्राणहीनैः सावनाहोरात्रासुभिः गोलो भ्रमतीत्यर्थः ।

५-६. क्षितिजं भूपार्श्वगतं स्यात् । भूपार्श्वरेखावत् तत्परितो गत-

[1] G. भ्रमेण. [2] A. leaves out this word.

[a] रविः 12.

अपमगतत्वाद् भानुस्तस्य स्थानानुसारतः सौम्ये ।
याम्ये वा यात्युदयं मध्यदिशस्तद्वदेव चास्तमपि ॥ ७ ॥
चन्द्राद्या विक्षेपादपमादपि सौम्ययाम्यदिक्स्थाः स्युः ।
साक्षे देशे ह्युदयाद्याम्ये यान्ति ग्रहा नभोमध्यम् ॥ ८ ॥
प्रागुन्मण्डलगोऽर्कः[1] त्रिंशद्घटिकाभिरेति पश्चिमगम् ।
[2]उन्मण्डलं, ततोऽपि च तावत्कालेन पूर्वगतम् ॥ ९ ॥
अत्र तु घटिकाशब्दो दिनषष्ट्यंशस्य वाचकः प्रोक्तः ।
व्यवहारो ह्यनयैव स्याद् गोलभ्रमणतोऽन्यत्र ॥ १० ॥
क्षितिजे ह्युदयास्तमयौ सौम्ये तून्मण्डलादधः क्षितिजम्[3] ।
तस्मात्सौम्ये गोले [4]त्रिंशद्घटिकाधिकं दिनं भवति ॥ ११ ॥
याम्ये तूर्ध्वं क्षितिजं त्रिंशद्घटिकात ऊनमत्र दिनम् ।
दिनवृद्धौ तु निशोना निशाधिका तत्क्षये तु सर्वत्र ॥ १२ ॥
त्रिंशद्घटिका दिवसो निरक्षदेशे सदा निशा च तथा[5] ।
उन्मण्डलमेव यतः क्षितिजाख्यं मण्डलं भवेत्तत्र[6] ॥ १३ ॥

मित्यर्थः । तत्स्थे ग्रहे तस्योदय इति शास्त्रे गदितम् । भूपृष्ठरेखासमे सति पूर्वमन्याभिर्दृश्यः स्यात् ।

७. अपमेति । मध्यदिशः पूर्वापरदिश इत्यर्थः ।

९. पूर्वापरयोः उन्मण्डलयोः अन्तराले सूर्यस्य भ्रमणं त्रिंशद्घटिका-भिरित्याह—प्रागिति ।

११. दिनानिशावृद्धिह्रासयोर्हेतुमाह—क्षितिजे [7]हीति ।

[1] D. [illegible] for गोऽर्क.

[2] D. gap up to [illegible]; blank space left. [3] A. C. E. [illegible].

[4] A. C. From here up to त्रिंशद्घटिका below omitted by haplography.

[5] D. G. [illegible] निशा च सदा. [6] G. [illegible]. [7] A. हि omitted.

[अर्काग्रादीनां स्वरूपम्]

क्षितिजे यत्रार्कयुतिस्तस्मात्पूर्वापराख्यसूत्रान्ता ।
जीवार्काग्राऽस्तोदयसूत्रं पूर्वापरं तदग्राच्च ॥ १४ ॥
उन्मण्डलार्कयोगप्रागपरस्वस्तिकान्तरालज्या ।
क्रान्तिज्या, सात्र भुजा, सूर्यस्थितभागगं द्युवृत्तं यत् ॥ १५ ॥
तद्व्यासार्धं द्युदलं कोटिः सा स्यात्, त्रिजीवका कर्णः ।
[1]यस्मिन्वृत्ते सूर्यस्थितभागो भ्रमति[2] तद् द्युवृत्ताख्यम् ॥ १६ ॥
क्षितिजोन्मण्डलविवरे द्युवृत्तजीवाभुजा क्षितिज्याख्या[3] ।
क्रान्तिज्यात्र तु कोटिः स्यादर्काग्रा श्रुति[4]स्त्रिभिस्त्र्यश्रम् ॥ १७ ॥

[ग्रहाणां पारमार्थिकी प्राग्गतिः]

विषुवत्संस्थो भानुर्लङ्कायां नभसि मध्यरेखायाम् ।
भ्रमति ह्यपराभिमुखं निरक्षदेशे तथैव सर्वत्र ॥ १८ ॥
अर्कः स एव मेरौ भ्रमति समन्तात् क्षितेस्तु पार्श्वगतः ।

१४. अर्काग्रास्वरूपमाह—क्षितिजे यत्रेति ।

१५a. क्रान्तिस्वरूपमाह—उन्मण्डलेति ।

१५b-१६a. द्युज्यां तस्याः कोटित्वं च क्रान्तेर्भुजात्वं चाह—सूर्येति । तयोः कोटिभुजयोः कर्णः त्रिज्या स्यात् ।

१६b. द्युमण्डलस्य स्वरूपमाह—यस्मिन्निति ।

१७. क्षितिज्यास्वरूपं तदाश्रितं क्षेत्रं चाह—क्षितिजोन्मण्डलेति । क्षितिज्या भुजा, क्रान्तिः कोटिः, अर्काग्रा कर्णः इति त्र्यश्रं क्षेत्रं प्रतिदेशम् ।

१८-१९. सूर्यस्य भ्रमणभेदमाह—विषुवदिति । अन्यत्र, निरक्ष-

[1] D. G. तस्मिन्.
[2] D. क्रमति.
[3] F. क्षितिजा स्यात्.
[4] F. त्रिभिः left out.

अन्यत्र स्वाक्षवशात् खमध्यभूपार्श्वयोर्भ्रमति मध्ये ॥ १९ ॥
अचलानि भानि तेषामधः क्रमान्मन्दजीवकुजदिनपाः ।
सितबुधशशिनश्चैते गच्छन्तः प्राङ्मुखं स्वगत्या तु ॥ २० ॥
अपराभिमुखं गोलभ्रमणात् सर्वे भ्रमन्ति लङ्कायाम् ।
[1]घटकारकस्य चक्रे विलोमगाः कीटका यथा तद्वत् ॥ २१ ॥
अधउपरिगतखगानां प्रागत्या योजनानि तुल्यानि ।
सर्वेषां दिवसे स्युस्तथापि तेषां कलागतिर्भिन्ना ॥ २२ ॥
कक्ष्याल्पाधःस्थस्य ग्रहस्य, महती तथोर्ध्वगस्य भवेत् ।
स्वल्पायां च[2] महत्यां लिप्ता भामाश्च[3] राशयस्तुल्याः ॥ २३ ॥
पूरयति चाल्पवृत्ते चरन्निजं वृत्तमल्पकालेन ।
महता कालेन चरन् महति दिने गतिकलास्ततो भिन्नाः ॥ २४ ॥

मेरुमध्यामन्यत्र, खमध्यभूपार्श्वयोर्मध्ये खमध्याद्दक्षिणे भूपार्श्वादुपरीत्यर्थः । स्वाक्षवशादक्षतुल्यं खमध्याद्दक्षिणं मानमित्यर्थः ।

२०-२१. भानां स्वतो गतिनिवृत्तिं, तदधः शन्यादीनां कक्ष्याक्रमं चाह—अचलानीति । स्वकर्तृका गतिस्तेषां नास्तीत्यर्थः । गोलभ्रमणादपराभिमुखी गतिरस्त्येव । लङ्कायां लङ्कादिनिरक्षदेशे स्वगत्या प्राङ्मुखं गच्छन्तो गोलभ्रमणादपराभिमुखं भ्रमन्ति ग्रहाः । ततोऽन्यत्र स्वाक्षवशात् तिर्यग्भ्रमणमित्यर्थः ।

२२. अधश्चरतामुपरि चरतां च ग्रहाणां दिने दिने जातानि गतियोजनानि तुल्यानि । तथापि कक्ष्याभेदात् गतिकला प्रतिग्रहं भिन्नेत्याह—अधउपरीति ।

[1] D. G. घटकारस्य तु चक्रे.

[2] A. त्वमहत्यां, may be तु महत्यां ; G. स्वल्पायाश्च महत्या.

[3] A. omits च.

दृश्यन्ते सर्वखगा अपराभिमुखं भ्रमन्त एवेह ।
एवं स्थिते ग्रहाणां पूर्वगतिः कल्प्यते कया युक्त्या ॥ २५ ॥
दस्रयुतः शीतकरो ह्यपरदिने दृश्यते यमर्क्षस्थः[1] ।
भौमादयश्च तद्वत् पूर्वगतिर्निश्चिता ततस्तेषाम् ॥ २६ ॥
मन्दगतिरिन्दुरार्किः शीघ्रगतिस्तारकास्तु शीघ्रतराः ।
गच्छन्त्यपराभिमुखं सर्वेऽप्येवं[2] वदन्ति किल केचित् ॥ २७ ॥
मन्ये तदपि न युक्तं [3]यस्माद्वक्रिग्रहोऽनलर्क्षस्थः ।
तत्पश्चिमगभरण्यां दिनान्तरे दृश्यते न पूर्वदिशि ॥ २८ ॥

[सूर्यापेक्षया शशिनः स्थानम्]

अर्कादुपरि शशी स्यादिति कवयो ये वदन्ति तत्पक्षे ।
नेन्दुरयं प्रत्यक्षस्तत्रान्यच्चान्द्रदैवतं कल्प्यम् ॥ २९ ॥

२५. स्थूलदृष्ट्या ग्रहाणां पश्चिमाभिमुखगतित्वमिच्छन्ति केचित् । तत्पक्षमाह—दृश्यन्त इति ।

२६. तन्निराकरोति—दस्रयुत इति । पूर्वदिनस्थितस्थानादपरदिने पूर्वदिशि दृश्यते चन्द्र इत्यर्थः ।

२७. अन्ये पुनः चन्द्रादीनां क्रमात् शीघ्रगतित्वं, नक्षत्राणां तेभ्योऽप्यतिशीघ्रगतित्वं च परिकल्प्य सर्वेषां पश्चिमाभिमुखगतित्वमिच्छन्तीत्याह—मन्दगतिरिति । अस्मिन् पक्षे दस्रयुतचन्द्रस्यापरदिने भरणीसहितत्वं न दुष्यति ।

२८. एतन्निराकरोति—मन्य इति ।

२९. अर्कादुपरि शशीति वादिनां महतां वचनं प्रमाणीकर्तुमिह दृश्यमानस्य चन्द्रस्य सूर्यादधः स्थितेरनुमानसिद्धत्वात् सूर्यादुपरि किमपि चान्द्रं दैवतमस्तीति कल्प्यमित्याह—अर्कादिति ।

[1] A. C. G. मर्कस्थः (wrong) ; D. मर्क्षस्थे.

[2] G. सर्वे चैवं.

[3] F. कस्माद्वक्री ; G. यस्माद्वक्री.

भानि खगानामूर्ध्वं, तेषां मुनयस्तथोर्ध्वगाः सप्त ।
उपरि ध्रुवश्च तेषामिति च प्रोक्तं पुराणविद्भिस्तैः ॥ ३० ॥
मेरावेव ह्येवं भवति ततो मेरुगाः पुराणविदः ।
मेरौ तु यमान्तेऽर्के सौम्यक्षेपो विधुस्तदाऽऽसन्नः[1] ॥ ३१ ॥
[2]उपरिगत एव सूर्याद्दृश्यते तत्स्थितैस्तदा वा स्यात् ।
अर्कोऽमावास्यान्ते चन्द्रमसा क्षेपहीनेन ॥ ३२ ॥
संछाद्यते च, तस्मात् निश्चितमर्काच्छशी ह्यधःस्थ इति ।
यद्यर्कादुपरि विधुस्तथा ह्यधःस्थार्कबिम्बच्छादनाभावात् ॥ ३३ ॥
ह्रसेत पूर्णतरः[3] कृष्णे पक्षे यथोदयवान् ।

[शशिनः शौक्ल्यम्]

शौक्ल्यं स्वाभाविकमिति मन्यन्ते ये पुनस्तु चन्द्रमसः ॥ ३४ ॥

३०-३१a. अथवा तैरपि पौराणिकैरपार्थेव [illegible] विषयभेदात् सूर्यादुपरीति कल्पित इत्याह—भानीति । ग्रहाणामुपरि नक्षत्राणि, तेषामुपरि सप्तर्षयः, तेषां चोपरि ध्रुव इति हि वदन्ति पुराणविदः । द्रष्टरि मेरुसंस्थिते तत्त्वैव तथा संभवति । अतः पुराणविदो द्रष्टारं मेरुसंस्थितं प्रकल्प्य सूर्यादुपरि चन्द्र इति वदन्ति । मेरुस्थितो हि द्रष्टा यमान्तगतादल्पोन्नतार्कात् यमान्तसमीपगतमुदग्विक्षिप्तं चन्द्रमुपर्येव पश्यति । ततः कारणाद्वा तेषां पुराणविदां सूर्यादुपरि चन्द्र इति स्मृतिः स्यात् ।

३२b. सूर्यादधःस्थश्चन्द्र इत्यस्मिन् पक्षे युक्तिमाह—अर्कोऽमेति ।

३३b. अर्कादुपरि चन्द्र इति पक्षेऽनुपपत्तिं प्रदर्शयति—यद्यर्कादिति ।

३४b. चन्द्रस्य शौक्ल्यं स्वाभाविकमेव, न स्वर्ककरैर्जातम् । अतः कृष्णपक्षे क्षयोदयावपि यथादर्शनं युक्तमेवेति चेत् तदप्ययुक्तमित्याह—शौक्ल्यमिति ।

[1] A. C. corrupt विधुन्तुदासन्नः .

[2] F. ac. 32-34 only bits of the lines available.

[3] G. ष्ट.

शौक्ल्यस्य क्षयवृद्ध्योरपि हेतुस्तैश्च[1] वक्तव्यः ।
अर्काधःस्थस्येन्दोरूर्ध्वार्धे ह्यर्करश्मयोऽमान्ते ॥ ३५ ॥
दृश्यार्धमतः कृष्णं तदार्कतः पूर्वगे तु चन्द्रमसि ।
पश्चिमपार्श्वेऽर्ककरा लम्ब्यन्ते तत्र शौक्ल्यमत इन्दोः ॥ ३६ ॥
एवं क्रमवृद्धिः स्याच्छौक्ल्यस्य हि[2] पूर्णता च पूर्णान्ते ।
पश्चिमभागे कार्ष्ण्यं ततः क्रमात् सूर्यरश्मिराहित्यात् ॥ ३७ ॥

[ग्रहणस्वरूपम्—पूर्वपक्षः]

ग्रसति यदि राहुरर्कं चन्द्रं वा राहुसम[3]भक्षस्थौ ।
चन्द्रार्कौ दूरगतौ ग्रस्येते दूरगेण कथमहिना ॥ ३८ ॥
चक्रार्धान्तरितौ द्वौ[4] राहू इति चेत्तदापि[5] कथमिन्दोः ।
स्पर्शः प्राग्भागे स्यान्मोक्षः पश्चात्ततोऽन्यथा च रवेः ॥ ३९ ॥

३५b. सूर्यादधःस्थश्चन्द्र इति पक्षे शौक्ल्यस्य क्षयवृद्धी संभवत इत्याह—अर्काधःस्थस्येति। अर्कग्रहणे शशिनश्छादकत्वाच्चन्द्रस्याधःस्थितिरिह कल्पिता ।

३८-३९. अर्को राहुणा छाद्यते इति ये वदन्ति तत्पक्षे दूषणमाह—ग्रसति यदीति । इन्दोः प्राग्भागे नियमेन स्पर्शो दृश्यते । मोक्षस्तु पश्चाद्भागे । इतोऽन्यथा रवेः स्पर्शमोक्षौ नियमेन दृश्येते । चन्द्रार्कयोः राहुः छादकश्चेत् कथं तथा संभवति?

[1] D. G. तु for च. [2] G. च for हि.

[3] Ms. B. commences only from here. Four folios containing the previous portion are lost in the Ms.

[4] G. तोधौ (corrupt). [5] G. तथापि.

राहोर्वदनगतश्चेत्तीक्ष्णविषाणः कथं रविर्भवति ।
तत्र गतः शीतांशुः कुण्ठविषाणश्च दृश्यते कस्मात् ॥ ४० ॥

[सिद्धान्तः]

छादक इन्दुर्भानोः शशिनो महती च भूच्छाया ।
अर्कात् सप्तमराशौ भूच्छाया वर्ततेऽर्क[1]समभुक्तिः ॥ ४१ ॥
छाद्यस्य शीघ्रगत्वात् प्राक् स्पर्शः, पश्चिमे विधोर्मोक्षः ।
छाद्यस्याल्पगतित्वाद् विपरीतं तद्द्वयं रवेर्भवति ॥ ४२ ॥
छादकवृत्तं भानोः स्वल्पमतस्तीक्ष्णशृङ्गता भवति ।
छादकवृत्तं शशिनो महदेवातोऽस्य कुण्ठशृङ्गत्वम् ॥ ४३ ॥
गणितानवगम्यं यद् ग्रहणं[2] तूत्पातरूपमाद्योक्तम् ।
तत्कारणवाची वा स्वर्भानुर्वेदनिर्दिष्टः ॥ ४४ ॥
सतमस्कं पर्व[3] विना त्वष्टा नामार्कमण्डलं कुरुते ।
स निहन्ति सप्त नृपतीनित्यादि हि वचनमस्ति पूर्वेषाम् ॥ ४५ ॥

४०. दूषणान्तरमाह—राहोरिति । अर्धाधिके ग्रस्ते रवौ तीक्ष्णविषाणो रविर्दृश्यते । दृश्यभागे बालचन्द्रवत् तीक्ष्णाग्रविषाणद्वययुत इत्यर्थः । अर्धाधिके ग्रस्ते चन्द्रे कुण्ठविषाणो दृश्यते विधुः । अष्टमीचन्द्रवत् विषाणरहितो दृश्यभाग इत्यर्थः । तच्च कथं भवति ?

४१a. स्वपक्षे छादकं प्रदर्शयति—छादक इति ।

४१b. भूच्छायायाः स्थानं गतिं चाह—अर्कादिति ।

४२. स्वपक्षे स्पर्शमोक्षयोः स्थाननियमे हेतुमाह—छाद्यस्येति ।

४३. तीक्ष्णविषाणादौ हेतुमाह—छादकवृत्तमिति ।

४४. विषयभेदेन राहोश्छादकत्वमनुवदति—गणितानवगम्यं यदिति

[1] A. C. E. वर्तते हि. [2] B. ग्रहं. [3] E. कल्प for पर्व.

[ग्रहाणां गोलाकारत्वम्]

गोलाकारं मण्डलमर्कादीनां स्मृतं गणकमुख्यैः ।
[1]दर्पणवृत्ताकारं दूरगतत्वात् प्रदृश्यतेऽस्माभिः ॥ ४६ ॥
शशिबिम्बे दर्पणवद् वृत्ते तस्यैकदेशसितलब्धिः ।
भानोः करसंपाते [2]व्यवधानाभावतो न संभवति ॥ ४७ ॥
[a]दिग्वेदजलधियोजनतुल्यं सूर्यस्य तैजसं बिम्बम् ।
तस्य च योजनकर्णः [b]शरवसुबाणाङ्कबाणजलधिमितः[3] ॥ ४८ ॥
[c]पञ्चैकवह्नियोजनतुलितं[4] चन्द्रस्य बिम्बमाप्यं तत् ।
योजनकर्णस्तस्य [d]स्वरनगरामाब्धिरामतुलितः स्यात् ॥ ४९ ॥
सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् ।

४६. अर्कादीनां मण्डलस्य गोलाकारत्वमाह—गोलाकारमिति ।

४७. दर्पणवद् वृत्तमिति पक्षे दूषणमाह—शशिबिम्ब इति ।

४८. सूर्यस्य बिम्बस्य व्यासयोजनं तत्स्वरूपं च सूर्यस्य योजनकर्णमानं चाह—दिग्वेदेति ।

४९. चन्द्रस्याप्याह—पञ्चैकेति ।

५०. अर्करश्मिसंपातेन चन्द्रबिम्बशौक्ल्यं स्यादिति दृष्टान्तसहितमाह—सलिलेति ।

इति ग्रहचारविधिर्द्वितीयः

[1] F. Up to verse 50, only bits of the lines available.
[2] A. C. E. व्यवधानादतो.
[3] B. G. मितम्.
[4] F. G. तुलितः.

a दिग्वेदेति 4410.
b शरेत्यादि 459585.
c पञ्चैकेति 315.
d स्वरेत्यादि 34377.

क्षपयन्ति मन्दिरगतं यथा तमो दर्पणोदरे पतिताः[1] ॥ ५० ॥

इति गोलदीपिकायां ग्रहचारनिरूपणाख्यो[2]
द्वितीयोऽध्यायः[3]

तृतीयोऽध्यायः

[स्वाधारा भूः]

[4]समवृत्तो भूगोलः [a]शून्येषुखचन्द्रयोजनव्यासः ।
तिष्ठति मध्ये व्योम्नो निजशक्त्या धारणात्मिकया ॥ १ ॥
अन्यैर्न दह्यतेऽग्निः स्वयं तु सर्वाणि दहति वस्तूनि ।
एवं धरापि नान्यैर्धार्या निखिलं स्वयं तु धारयति ॥ २ ॥
भूमिरनन्तेन धृतेत्येकेऽन्ये दिग्गजैरिति ब्रुवते ।
आधारस्य च कल्प्योऽत्राधारोऽतोऽनवस्थितिस्तेषाम् ॥ ३ ॥

[भूचलननिराकरणम्]

एकाह्नेन भ्रमति क्षोणी प्रागभिमुखीति चान्यमतम् ।

१. भूमेः स्वरूपमानाद्याह—समवृत्त इति ।
२. भूमेर्धारणात्मिकां शक्तिं दृष्टान्तद्वारेणाह—अन्यैरिति ।
३ भूमेराधारकल्पनायां दूषणमाह—भूमिरिति ।
४. भूमेर्भ्रमणपक्षे दूषणमाह[5]—एकाह्नेनेति ।

[1] A. D. E. G. पतितम् ; F. पतिताम् (corrupt).
[2] B. निरूपणं ; D. G. निरूपणाख्यो omitted; E. निरूपणो.
[3] A-F. अध्यायः omitted. [4] G. वृत्तो भूगोलाख्यः. [5] आहुः.

[a] शून्येत्यादि 1050.

कथमत्रागच्छेयुर्नीडं नीडाद्[1]बहिर्गता विहगाः ॥ ४ ॥
आकाशस्यानन्त्यात् सदाप्यधो गच्छतीति भूरन्ये ।
वियति क्षिप्ता लोष्टाः कथं पतेयुस्तदा भूमौ ॥ ५ ॥

[भूमानम]

मानं भूपरिधेः [a]स्यान्नवनवदस्राग्नियोजनैस्तुलितम् ।
त्रैराशिकानुमानाद् गणकाचार्यैः प्रकल्पितमिदं स्यात् ॥ ६ ॥
आर्यभटेन यदुक्तं भूकर्णादेः प्रमाणमन्यैस्तत् ।
अर्धाधिकं तु पठितं योजनमानस्य [2]भेदक्लृप्त्या तत् ॥ ७ ॥

[स्वाक्षांशाः ध्रुवश्च]

लङ्कायां क्षितिजस्थो ध्रुव उपरि खमध्यगः स मेरौ स्यात् ।
लङ्कायां [3]विषुवस्थो दिनमध्ये व्योममध्यगः सूर्यः ॥ ८ ॥
भानुः स एव मेरुस्थाने तु क्षितिजसंस्थितो भवति ।
लङ्कात उदग्गमनाद् ध्रुवोन्नती रविनतिश्च कल्प्यातः ॥ ९ ॥

५. भूमेरधोगमनपक्षे दूषणमाह—आकाशस्येति ।

६. भूपरिधेर्मानमाह—मानमिति ।

७. गणिततन्त्रभेदेषु दृश्यमानो भूमानकर्णमानादेर्भेदो योजनमानक्लृप्त्येत्याह—आर्यभटेनेति ।

८-११. लङ्कात उदग्गमनवशाद् ध्रुवस्योन्नतिर्विषुवद्दिनमध्याह्नार्कस्य अवनतिश्च भवत इत्याह—लङ्कायामिति । भानुः स एव लङ्कायां विषुवद्दिन-

[1] Mss. read नीळं नीळात्, ळ for ड being a provincial peculiarity.
[2] A. C. D. भेदतत्क्लृप्त्या. [3] B. विषुवत्स्थो.

a नवेबाद्रि 3299.

साक्रावनतिर्देशे [1]स्वेऽक्षज्या स्याद् ध्रुवोन्नतिर्वापि ।
अक्षज्यार्कावनतिध्रुवोन्नतीनां क्रमादुदग्वृद्धिः ॥ १० ॥
अक्षज्यावृद्धिवशादुत्तरगमनं ततस्तु लङ्कातः ।
[2]ज्ञेयं तथा स्वदेशादक्षाधिक्येन सौम्यगमनमपि ॥ ११ ॥

[भूपरिध्यानयनम्]

समयाम्योदक्संस्थौ देशौ ज्ञात्वा [3]तयोः पलज्ये च ।
योजनसंख्यां च तयोर्मध्ये त्रैराशिकं ततः कार्यम् ॥ १२ ॥
अक्षद्वयान्तरांशैर्देशद्वयमध्ययोजनानि यदि ।
लभ्यन्ते चक्रांशैः कानीति स्याद् भुवः परिधिमानम् ॥ १३ ॥
अथवाक्षद्वयविवरजभागैस्तन्मध्ययोजनानि यदि ।
त्रिभसममेरुपलांशैस्तदा कियन्तीति भूपरिधिपादः ॥ १४ ॥

मध्याह्नकाले भानुरित्यर्थः । सा अर्कावनतिः, विषुवद्दिनमध्याह्नकाले स्वीये देशे अर्कावनतिः स्वदेशाक्षज्या स्यात् । ध्रुवोन्नतिर्वापि स्वदेशध्रुवोन्नतिर्वाक्षज्या भवति । अक्षादीनामुदग्देशे क्रमाद् वृद्धिः स्यात् । स्वदेशाक्षस्य वृद्धिवशात् लङ्कातः स्वदेशस्योदग्गमनं वेद्यम् । तद्धानिवशात् दक्षिणगमनं च ।

१२. समयाम्योदग्गतयोर्द्वयोर्देशयोरक्षचापान्तरेण तयोरन्तरालगतयोजनैश्च भूपरिधिमानं त्रैराशिकात्कल्प्यमित्याह — समेति ।

१३. त्रैराशिकप्रकारमाह — अक्षद्वयेति ।

१४. भूपरिधिपादमानानयने त्रैराशिकमाह — अथवेति । त्रिभसममेरुपलांशाः त्रिराशिसमैः मेरुस्थानपलांशैः लङ्कामेर्वोः पलान्तरांशैरित्यर्थः ।

[1] A. C. E. स्वाक्षज्या.
[2] D. G. ज्ञेयः.
[3] G. वृपरिवृद्धिः.
[4] F. तयोः omitted.

बहुलक्षयोजनमितेत्येके बहुकोटियोजनमितेति ।
अपरे भूमिस्तस्मात्कल्प्यः स्याद्विषयभेदोऽत्र ॥ १५ ॥
योजनमितैश्चतुर्भिर्भूपृष्ठेऽश्रैः[1] कृतानि खण्डानि ।
बहुलक्षमितानि स्युस्तस्मात्तद्वादिनां तु तद्विषयम् ॥ १६ ॥
दैर्घ्योच्छ्रितिविस्तृतिभिर्भूखण्डान्यपि च योजनमितानि ।
[2]बहुकोटिमितानि स्युस्तस्मात्तद्वादिनां [3]तु तद्विषयम् ॥ १७ ॥
प्राणिनिवासो ह्यन्तर्भूमेः सर्वत्र भवति पाताले ।
तद्वद् भूपृष्ठेऽपि च तद्वयमानोक्तिरपि च युक्तातः ॥ १८ ॥

[भूगोलवर्णनम्]

[4]सप्तद्वीपसमुद्राः पूर्वाद् द्विगुणाः [5]क्रमादिति यदुक्तम् ।
तच्चोपासनविषयं गणकैरिति कल्प्यते न दृष्टिसमम् ॥ १९ ॥

१५. बहुलक्षयोजनमिता भूमिरित्येके वदन्ति । बहुकोटियोजनमितेत्यपरे वदन्ति । तेषां वचनं प्रमाणीकर्तुं विषयभेदोऽत्र कल्प्य इत्याह—बहुलक्षेति ।

१६-१७. विषयभेदप्रकारमाह—योजनमितैरिति । भूपृष्ठमेकत्र विषयम् । भूमेरन्तर्भागोऽन्यत्रेत्यर्थः ।

१८. भूपृष्ठभूम्यन्तर्भागयोः प्राणिनिवसनसद्भावात् उभयोर्मानकथनं युक्तमित्याह—प्राणीति ।

१९. सप्तद्वीपानां सप्तसमुद्राणां च मानं क्रमाद् द्विगुणितं भवतीति यत्पौराणिकवचनं तदुपासनविषयमेव । न तु युक्तिसिद्धमित्याह—सप्तद्वीपेति । तथा प्रतिपत्त्या अदृष्टं फलं भवतीत्यर्थः ।

[1] A. C. D. E. F. पृष्ठे तैः.
[2] F. Two lines omitted.
[3] B. G. च for तु.
[4] F. Verses 19-26, only bits of the lines available.
[5] D. G. क्रमादिह.

स्थलबहुलमुपरिगार्धं जलबहुलमधोगतं क्षितेरर्धम् ।
तस्मिन्नधोगतार्धे द्वीपाः सर्वे तथाऽब्धयः कथिताः ॥ २० ॥
जलबाहुल्याज्जलमिति निगद्यतेऽधोगतं क्षितेरर्धम् ।
स्थलमिति चोर्ध्वगतार्धं स्थलबाहुल्यान्निगद्यते तद्वत् ॥ २१ ॥
स्वर्मेरू स्थलमध्ये नरको बडवामुखश्च जलमध्ये ।
त्रिदशा अपि दैतेयाः स्थिता हि तद्वत्तयोः क्रमशः ॥ २२ ॥
मेरोरग्रयुगं स्यात् स्थलमध्यादूर्ध्वगं तयोरेकम् ।
जलमध्याच्चाधःस्थं शिष्टं देवासुरैः क्रमात् सेव्यम् ॥ २३ ॥
अङ्गीकृत्यात्रोक्तं स्थलमध्यं ह्यूर्ध्वमप्यधश्चापि ।

[दिक्कल्पनम्]

आशा हि कल्पिताः स्युर्देशे देशे ततश्च ता भिन्नाः ॥ २४ ॥
यत्रोदयो रवेः स्याद् दिक् पूर्वा तत्र तद्वशाच्चान्याः ।
¹स्वाश्रितभूमिरधः स्यात्सर्वेषां भवति तद्वशाच्चोर्ध्वम् ॥ २५ ॥

[ध्रुवतारे]

मेरोरूर्ध्वगताग्रादूर्ध्वस्था तारका ध्रुवाख्यैका ।

२०. भूमेः स्वरूपमाह—स्थलबहुलमिति ।

२१. जलस्थलविभागकल्पनायां हेतुमाह— जलबाहुल्यादिति ।

२२. स्वर्गनरकयोर्मेरुवडवामुखयोः त्रिदशदैतेयवर्गयोश्च स्थानमाह—स्वर्मेरू इति ।

२३. स्थलजलभागयोरुभयोरपि विनिर्गतौ मेरुरित्याह —मेरोरिति ।

२४. स्थलमध्यमङ्गीकृत्यात्रोर्ध्वाधोविभागकथनं कृतमित्याह —अङ्गीकृत्येति ।

२५. पूर्वादिदिग्विभागमधऊर्ध्वविभागं चाह—यत्रोदय इति ।

¹ A.B.C. था.

मेरोरधोगताग्रादधः स्थितान्या ध्रुवाख्यतारा स्यात् ॥ २६ ॥
ध्रुवयुग्ममिदं गोलस्याश्रयदण्डाग्रयुग्ममिव मेरौ ।
रशनावदतः [परितो[1]] लङ्कायां तूर्ध्वगो भ्रमति गोलः[2] ॥ २७ ॥

[लङ्कादिनगर्यः]

लङ्का च रोमकाख्या सिद्धपुरीसंज्ञिता च यवकोटिः ।
याम्यापरसौम्यप्राग्दिक्षु नगर्योऽभिगा इमा मेरोः ॥ २८ ॥
तासु निरक्षाख्यासु ध्रुवोन्नतिर्नास्त्यतो न पलभा च ।
लङ्कामाश्रित्योक्ता दिश इह याम्यादयो मेरोः ॥ २९ ॥

[मेरोरुच्छ्रितिः]

मेरोरुच्छ्रितिरुक्ता चतुरशीतिसहस्रयोजनमितेति ।
कैश्चित्तन्नाभिमतं गणकानामुच्यतेऽत्र हेतुश्च ॥ ३० ॥

२६b. विषुवत्स्थार्कस्योदयोऽत्राङ्गीकृतः। मेरोरूर्ध्वाग्रादूर्ध्वमधोऽग्रादधश्च ध्रुवतारे भवत इत्याह—मेरोरिति ।

२७. इदं ध्रुवयुग्मं गोलभ्रमणे गोलदण्डाग्रगतमिव भवतीत्याह—ध्रुवयुग्ममिति । ध्रुवयुग्मं दण्डाग्रं कृत्वा गोलो भ्रमतीत्यर्थः । अतो मेरुस्थाने रशनावत् परितो भ्रमति गोलः, लङ्कायामूर्ध्वगो भ्रमति, अधऊर्ध्वयोः पूर्वापरयोश्च गतः सन् भ्रमतीत्यर्थः ।

२८-२९. मेरोश्चतुर्दिक्षु निरक्षदेशगताः समुद्रगाश्चतस्रो नगर्यः सन्तीत्याह—लङ्का चेति । मेरोर्याम्यादयो दिशो लङ्कामाश्रित्य इहोक्ताः, लङ्कागतानां यथा प्रतीतिस्तथोक्ता इत्यर्थः ।

३०-३२. कैश्चिन्मेरुरत्युच्छ्रित इत्युक्तम् । तदनुपपन्नमिति युक्त्या

[1] All Mss. read वदतो ; परितो is reconstructed from the commentary.
[2] F. भूगोलः (corrupt).

यत्र तु नोन्नतिः स्याद्यस्मिन्देशे ध्रुवस्य तूत्तरतः ।
ताराः प्राग्गामिन्यो दृश्यन्ते कतिचिदस्माभिः ॥ ३१ ॥
अत्युन्नते तु मेरौ तदुच्चव्यवधानेन ता न दृश्येरन् ।
अत्युच्छ्रितो न मेरुस्तस्मादिति कल्प्यते तथा चोक्तम् ॥ ३२ ॥
"यत्र तोयनिधिमेखलातले नास्तमेति मिथुनान्तसंस्थितः ।
तप्तहाटकनिभो दिवाकरस्तत्र भोऽक्षपरिमाणमुच्यताम्[1] " ॥ ३३ ॥
इति कनकसदृशतोक्त्या क्षितिजस्पृक्चात्र[2] भानुरिति चोक्तम् ।
अक्षज्यास्मिन् प्रश्ने "कुवेदशशिरामतुलिताः ॥ ३४ ॥
अत्युच्छ्रिते तु मेरावेवं सूर्यो न संभवति ।
उपपत्त्या हीनोक्तिर्विदुषां सर्वाप्युपासनार्था स्यात् ॥ ३५ ॥

प्रदर्शयति--यत्रेति । यस्मिन्देशे ध्रुवोन्नतिर्न्भवते तत्र ध्रुवस्योत्तरगताः ताराः प्राग्गामिन्योऽस्माभिर्दृश्यन्ते । मेरुरत्युन्नतश्चेत् तदुच्चव्यवधानेन ता न दृश्येरन् ।

३३. तत्र पूर्वाचार्यवचनमस्तीति तत्प्रदर्शयति—यत्रेति ।

३४-३५. अत्युच्छ्रितमेरौ दिवाकरस्यास्तमयः संभवत्येवेत्यर्थः । अर्कस्य कनकसादृश्यं क्षितिजस्पर्शे हि भवति । अतस्तप्तहाटकनिभ इत्युक्त्या तस्य क्षितिजाश्रितता चोक्ता । अतोऽस्मिन् प्रश्ने पञ्चदश घटिकाः चरदलं भवति । "कुवेदशशिरामतुलितायामक्षज्यायां हि तावत्प्रमाणं चरदलं भवति । नास्तमेतीत्यनेन चार्धास्तमयं नातिक्रामतीत्युक्तं भवति । अतोऽत्राक्षज्या "कुवेदशशिरामतुलिता स्यात् । विदुषामप्युपपत्त्या हीनोक्ति-रुपासनार्था स्यात् । उपासनार्थेति कल्प्येत्यर्थः ; तथा कल्पिते अदृष्ट-विशेषो भवतीत्यर्थः ।

[1] This is a quotation from Govindasvāmin's Bhāṣya on the *Mahābhāskarīya* III. 25 (Ed. Madras, p. 167).

[2] F. स्वाव may be स्वत.

[ऊर्ध्वाधरभागस्य आपेक्षिकत्वम्]

सर्वत्र भूमिभागे निवसन्ति प्राणिनो द्रुमाश्चापः ।
यद्वत्कदम्बपुष्पग्रन्थिः प्रचितः समन्ततः कुसुमैः[1] ॥ ३६ ॥
भूमेर्यो यो भागः प्रदृश्यते तत्र तत्र स स एव ।
भूमेरूर्ध्वो भागः, सर्वत्र प्राणिनां निवासोऽतः[2] ॥ ३७ ॥
वयमूर्ध्वगता दितिजा अधोगता इति वदन्ति देवगणाः ।
असुरा वयमूर्ध्वगता वदन्ति, देवा [3]अधोगता इति च ॥ ३८ ॥
याम्योदक्स्थास्तद्वत्पूर्वापरसंस्थिता[4]स्तथैव मिथः ।
भूमेरुपरि गताः स्मो वयमिति बुद्धिर्यतोऽस्ति सर्वेषाम् ॥ ३९ ॥

[रविः]

सर्वस्मिन्नपि काले भानोरुदयोऽस्ति देशभेदेषु ।
अस्तमयश्च तथा स्यात् तद्वद्दिनरात्रिभागाश्च[5] ॥ ४० ॥

३६. भूमौ सर्वत्र प्राणिनो द्रुमा आपश्च भवन्तीत्याह—**सर्वत्रेति** । तत्र दृष्टान्तमाह—**यद्वदिति** ।

३७. अत्रोपपत्तिमाह—**भूमेर्यो यो भाग इति** ।

३८-३९. प्रतिदेशमूर्ध्वाधोभागः संभवतीत्याह—**वयमिति** । याम्यदिक्स्था लङ्कावासिनः, उत्तरदिक्स्थाः सिद्धपुरवासिनः, पूर्वदिक्स्था यवकोटिवासिनः, पश्चिमदिक्स्था रोमकवासिनः । लङ्कामधिकृत्यात्र दिगुक्तिः ।

४०. सर्वस्मिन्नपि काले रवेरुदयास्तमयादि देशभेदेषु भवतीत्याह—**सर्वस्मिन्नपीति** ।

[1] This line is a quotation from the *Āryabhaṭīya*, Golapāda, 7.
[2] F. ब्रतः for अतः.
[3] D. G. देवास्त्वधो.
[4] D. संश्रिता.
[5] A. C. भागश्च.

"[1]उदयो यो लङ्कायां सोऽस्तमयः सवितुरेव सिद्धपुरे ।
मध्याह्नो यवकोट्यां रोमकविषयेऽर्धरात्रं स्यात्" ॥ ४१ ॥
मध्येऽशूनामधिकं ह्यौष्ण्यं दृष्टिभ्रमश्च करपातात् ।
एकोऽर्को बहुधातो वर्णेनौष्ण्याच्च[2] देशभेदेषु ॥ ४२ ॥

[ध्रुवप्रदेशे दिनरात्री]

मेषादिराशिषट्क[3]क्षितिजादूर्ध्वस्थितिः[4] सुराणां स्यात् ।
मेषादिमास[5]षट्कं दिनं ततो भवति देवानाम् ॥ ४३ ॥
जूकादिराशिषट्कं देवानां स्यादधोगतं क्षितिजात् ।
जूकादिमासषट्कं निशा ततो भवति देवानाम् ॥ ४४ ॥
दिनरात्री देवानां रात्रिदिने[6] स्तः क्रमेण दितिजानाम् ।
अधउपरि[7]विभागौ स्तो देवासुरभागयोर्यतो व्यस्तम् ॥ ४५ ॥
सर्वस्मादपि देशान्मेर्वेऽर्ध्वी सौम्ययाम्यगौ भवतः ।
[8]विषुवस्थार्कोदयगा पूर्वा दिक् तद्वशात्ततोऽन्याश्च[9] ॥ ४६ ॥

४१. तत्र पूर्वाचार्यवचनमुदाहरणत्वेन प्रदर्शयति—**उदयो य इति** ।

४२. कालभेदेन रवेरौष्ण्यभेदे च हेतुं प्रदर्शयति—**मध्येऽशूनामिति** । उदये ह्यर्कस्यांशुमण्डलं भूगोलस्य पूर्वार्धेऽवतिष्ठते । मध्याह्ने भूमेरुपरि । अस्तमये भूमेः पश्चिमार्धे ।

४३-४५. देवासुराणां दिनरात्रिविभागं सहेतुकमाह—**मेषादीति** ।

४६. सर्वस्मादपि देशान्मेरुरुत्तरदिक्स्थः, समुद्रो दक्षिणदिक्स्थ

[1] *Āryabhaṭīya*, Golapāda, 13.
[2] A. C. F. वर्णौष्ण्याच्च.
[3] F. G. षट्कं.
[4] E. G. स्थितं.
[5] D. G. राशि for मास (corrupt).
[6] G. निशे (corrupt).
[7] A. C. वा.
[8] A. C. F. विषुवस्थो; B. विषुवत्स्थो.
[9] A.B.C.D.E. G. यतोऽन्याश्च.

सौम्ये निरक्षदेशात् सौम्यस्थेऽर्के, दिनं भवेदधिकम् ।
याम्यस्थेऽर्के न्यूनं दिनं निशा व्यस्तमेव सर्वत्र ॥ ४७ ॥
यस्मिन् देशेऽक्षज्या [a]शशिकृतशशिरामसंमिता तत्र ।
षष्टिर्नाड्यो दिवसः शून्या रात्रिर्यमान्तगेऽर्के स्यात् ॥ ४८ ॥
तत्र दिनान्तरयोगात्[1] प्रायेण स्याद्दिनं [b]खरविनाड्यः ।
चापान्तगे तु भानौ षष्टिर्नाड्यो निशा दिनं शून्यम् ॥ ४९ ॥
राशिद्वयापमसमा लम्बज्या यत्र तत्र चापमृगौ ।
उदयं न गच्छतोऽस्तं न गच्छतः कर्किमिथुनराशी द्वौ[2] ॥ ५० ॥

इत्येतत् सहेतुकमाह—सर्वस्मादिति । दृश्यमानोऽयं समुद्रः सगरैः कृतः, न तु साक्षात्समुद्र इति वेद्यम् । समीपगोऽब्धिभागोऽत्राङ्गीकृतः ।

४७. दिनवृद्धिक्षययोर्विषयमाह—सौम्ये निरक्षेति ।

४८-४९. यत्र परमं चरदलं पञ्चदशनाडिकात्मकं भवति तं देशमाह—यस्मिन्निति । तत्र मिथुनान्तगतेऽर्के त्रिंशद्घटिका दिनवृद्धिः स्यात् । अतो रात्रिर्न संभवति । षष्टिनाडिकात्मकदिनं भवति । अत उपरिदिनेन सहितं तद्दिनं प्रायः [b]खरविनाडिकात्मकं स्यात् । विंशत्यधिकशतनाडिकाप्रमाणं प्रायः स्यात् । उपरिदिने चरदलस्य किंचिन्न्यूनत्वादस्तमयः संभवति । अतः किंचिदूनविंशत्यधिकशतनाडिकाप्रमाणं दिनं भवतीति प्रायःशब्दस्यार्थः । चापान्तगतेऽर्के तद्वद्रात्रिश्च षष्टिनाडिकाप्रमाणा । इत उत्तरदेशे उदग्गमनवशात् त्रिदिनपञ्चदिनदशदिनार्धमासैकमासद्विमासत्रिमासादितुलितमेकदिनं संभवति ।

५०-५१. यत्र चापमृगौ राशी उदयं न गच्छतः, मिथुनकर्कटावस्तं च न गच्छतः, तं देशमाह—राशिद्वयेति । तत्र मिथुनकर्कटधनुर्मृगेभ्योऽन्येषामष्टानां राशीनामेव लग्नत्वं संभवति ।

[1] F. योग.

[2] F. स्यात्.

[a] शशीत्यादि 3141.

[b] खरवीति 120.

अष्टानामेव तनौ लग्नत्वं भवति तत्र राशीनाम् ।
हरिजस्पर्शाभावाल्लग्नत्वं नैणकर्कियमधनुषाम् ॥ ५१ ॥
एकक्षापमतुल्या लम्बज्या यत्र तत्र वृषभाद्याः ।
यान्ति न चत्वारोऽस्तं कौर्प्याद्या नोदयं च चत्वारः[1] ॥ ५२ ॥
वृषभाद्याश्चत्वारो मासा दिनमेकमेव[2] तत्र भवेत् ।
कौर्प्याद्या [3]रात्रिः स्यात् पूर्वत्र तु दिननिशे द्विमासौ स्तः ॥५३॥
परमापक्रमतोऽल्पा लम्बज्या यत्र तत्र[4] राशीनाम् ।
केषांचिदुत्क्रमात्स्याद् [5]उदयो गोले प्रदृश्यमखिलं तत् ॥ ५४ ॥
मेषाद्याः षण्णास्तं जूकाद्याः षट् तथा न यान्त्युदयम् ।
देशे तु[6] शून्यलम्बे [7]लग्नत्वं तत्र नास्ति कस्यापि ॥ ५५ ॥
विधिरयमुदितो भागे देवानां स्यात् पुनर्दितिजभागे[8] ।

५२-५३. यत्र वृषभाद्याश्चत्वारो राशयोऽस्तं न गच्छन्ति, वृश्चिकाद्याश्चत्वार उदयं न च गच्छन्ति तं देशमाह—**एकक्षेति** । तत्र एकक्षापमतुल्यलम्बे देशे । पूर्वत्र द्विराश्यपक्रमतुल्यलम्बे देशे ।

५४. यत्र केषांचिद्राशीनां उत्क्रमेणोदयः स्यात्, केषांचित् क्रमेण, तं देशमाह—**परमापमिति** ।

५५. यत्र मेषादि[9]राशिषट्कं नास्तं गच्छति, तुलादिराशिषट्कमुदयं च न गच्छति, तं देशमाह—**मेषाद्याः षडिति । शून्यलम्बे देशे मेरौ** मेषादिमासषट्कमेकं दिनं भवति, तुलादिमासषट्कं रात्रिर्भवति ।

५६. देवभागाद् [illegible]येनासुरभागे दृश्यादृश्यभागावित्याह — **विधिरिति** ।

[1] The *pāda* is corrupt in some Mss. A. कुर्प्याद्यागेय . . . . श्च चत्वारः; C. कूर्प्याद्या गेयं च चत्वारः; D. कौर्प्यादयं च चत्वारः.

[2] B. मेवमेव. [3] C. रात्री. [4] A. B. C. D. F. omit तत्र.

[5] D. G. उदये. [6] D. G. देशेऽत्र. [7] A. C. F. लग्नं.

[8] F. दितिजानाम्. [9] A. omits राशि.

दृश्यादृश्यौ न्यस्तं लम्बत्वं देवभागवद्धानाम् ॥ ५६ ॥
चरसंस्कृतिर्न [1]चिन्त्या विलक्षणा यत्र राशयस्तत्र ।
तत्र हि चरसंस्कारान्मृगादिषट्कस्य भवति शून्यत्वम् ॥ ५७ ॥

[देवादीनां दिनमानम्]

शशिबिम्बस्योर्ध्वगताः पितरः पश्यन्ति चान्द्रमासार्धम् ।
मनुजाः कुदिनार्धमिनं रविवर्षार्धं सुरास्तथा दितिजाः ॥ ५८ ॥
ब्रह्मा तु युगसहस्रं पश्यति भानुं सदातिदूरगतम् ।
तावन्न पश्यति पुनर्ब्रह्माप्यर्कं रवेरभावात्तत्[2] ॥ ५९ ॥
पुनरपि च युगसहस्रेऽतीते दिवसो भवेद्विधेस्तत्र ।
सृष्टा भवन्ति सर्वे देवाद्याः पूर्ववद्दिनाद्यपि च[3] ॥ ६० ॥
अष्टसहितं [4]सहस्रं विधेर्युगानां दिनं भवेदिति च ।
आर्यभटेन प्रोक्तं निशा भवेत्तावती हि[5] तत्पक्षे ॥ ६१ ॥

५७. यत्र परमापमादूनो लम्बः, तत्र राशीनां चरसंस्कृतिर्न चिन्त्येत्याह —चरसंस्कृतिरिति । विलक्षणाः प्रसिद्धलक्षणरहिताः, क्रमोदयप्राप्तिरहिता इत्यर्थः ।

५८-६१. पितॄणां मनुजानां देवासुराणां च ब्रह्मणश्च दिनमानमाह— शशिबिम्बस्येति । पितॄणां शशिबिम्बस्योर्ध्वभागस्थितत्वात् शशिमासार्धं कृष्णाष्टम्यर्धादि शुक्लाष्टम्यर्धान्तं रविदर्शनं स्यादित्यर्थः । कुदिनार्धं सावनदिनस्यार्धं मनुजा रविं पश्यन्ति । रविवर्षार्धं मेषादिमासषट्कं सुरा रविं पश्यन्ति । मेषादिषट्कस्य क्षितिजादूर्ध्वगतत्वात्[6] सदा सकृदुदितं रविं देवाः पश्यन्तीत्यर्थः । दितिजाश्च तथा रविवर्षार्धं तुलादिमासषट्कं सूर्यं पश्यन्ति ।

[1] F. repeats here कस्यापि to दितिजानां (verse 55-56 above) by some scribal error. [2] F. तम्. [3] G. पूर्ववद्दिनान्यपि (corrupt).
[4] G. अष्टसहस्रं सहितं. [5] G. ह. [6] A. गतित्वात्.

[पौराणिकं भूगोलवर्णनम्]

श्रीपतिना तु प्रोक्ताः सप्तद्वीपादयोऽपि भूगोले ।
तद्विषयगतः [1]किंचिद्विलिख्यतेऽस्माभिरपि च बालेभ्यः ॥ ६२ ॥

[सप्त द्वीपाः समुद्राश्च]

जम्बूश्च प्लक्षाख्यः [2]शाल्मलकुशसंज्ञितौ तथा क्रौञ्चः ।
[3]शाकः पुष्कर इत्यपि सप्तैते मध्यतः क्रमाद्द्वीपाः ॥ ६३ ॥
लवणेक्षुसुराज्यदधिक्षीरजलैरावृताः समुद्रैस्ते ।
ऊर्ध्वार्धे जम्बूः स्याद्भूमेरन्ये त्वधोदले षट् स्युः ॥ ६४ ॥

[जम्बूद्वीपः मेरुश्च]

मेरुः कनकमयः स्याज्जम्बूद्वीपस्य पर्वतो मध्ये ।
भूपद्मस्यास्यासौ मध्यस्थः कर्णिकाकारः ॥ ६५ ॥

ब्रह्मा स्वदिनयुगसहस्रं स्वस्थानादतिदूरगतं रविं पश्यति । अतिदूरगतत्वात् भूमेः परितो[4] भ्रमतोऽस्य भूम्या व्यवधानं न भवतीत्यर्थः । स्वनिशि प्रलयकाले, ब्रह्मापि रवेरभावात् तं न पश्यति । प्रलयावसानस्याहन्यादित्योऽपि सृष्टो भवति । अतस्तं ब्रह्मापि पश्यति । पितृमनुजसुरदैतेयाश्च पूर्ववत्पश्यन्ति ।

६२. श्रीपतिनाम्ना आचार्येण स्वकृतगणिततन्त्रे सप्त द्वीपाः सप्त समुद्राश्च भूमेः खण्डभेदादयश्चोक्ताः । अतोऽस्माभिरपि बालानां हिताय तद्विषयं किंचिद्विलिख्यत इत्याह—श्रीपतिनेति ।

६३. द्वीपादीनाह—[5]जम्बूरित्यादिभिः ।

[1] B. कथित.
[2] A. शामल; D. शान्मल.
[3] F. शाखा.
[4] A. भ्रमणतो.
[5] A. has an extra द्वीप after this.

[जम्बूद्वीपविभागः]

जम्बूद्वीपे नवकं खण्डानां स्यादिलावृतं[1] मध्ये ।
भारतकिंपुरुषाभिधहरिवर्षाख्यानि लङ्कातः ॥ ६६ ॥
मेरोर्याम्ये सौम्ये रम्यकहिरण्मयं[2] च कुरुवर्षम् ।
सौम्यान्ताद्[3] भद्राश्वः[4] पूर्वे पश्चात्तु केतुमालाख्यः ॥ ६७ ॥

[जम्बूद्वीपे पर्वतादयः]

इति खण्डनवकमुक्तं परितो मेरोरिलावृतं तत्र ।
विष्कम्भाख्याश्च नगाश्चत्वारो मेरुपार्श्वगताः ॥ ६८ ॥
मन्दरसगन्धमादनविपुलसुपार्श्वाः क्रमेण पूर्वादौ ।
तच्छिरसि दिव्यतरवः कदम्बजम्ब्वाख्यपिप्पलवटाख्याः ॥ ६९ ॥
एते हि महाकाया जम्बूद्वीपाख्यहेतुरपि जम्बूः ।
चैत्ररथगन्धमादनवैभ्राजकनन्दनानि च वनानि ॥ ७० ॥
पूर्वादिष्वरुणोदं मेरोस्तु सितोदमानसाख्ये च ।
तद्वन्महाह्रदाख्यं सरांसि चत्वारि देवानाम् ॥ ७१ ॥
इति मध्यमखण्डोऽष्टौ सीमाख्याः पर्वताः स्युरन्येषाम् ।
हिमवांश्च हेमकूटो निषधो याम्ये, तथोत्तरे मेरोः ॥ ७२ ॥
नीलः श्वेतः[5] शृङ्गी सप्त कुलागाः समेरुका ह्येते ।
पूर्वदिशि माल्यवान् स्यात्, पश्चिमगो गन्धमादनश्चेति ॥ ७३ ॥
केसरनगाश्च परितः, पूर्वे शीताम्भ इत्याद्याः ।
मेरोस्त्रिकूटकाद्या[6] याम्ये, सौम्ये तु शङ्खकूटाद्याः ॥ ७४ ॥

1 Mss. read वृती.
2 A. C. D. E. F. मयौ.
3 D. सौम्याता.
4 A. C. E. F. भाद्राश्वः; D. भाद्रश्वः.
5 All Mss. except G. read शेतः.
6 A. D. F. क in काद्या left out; G. काद्यो.

शिखिवासा इत्याद्याः पश्चादथ[1] कीर्तितानि पत्राणि ।
भूम्याख्यपद्मस्य तु[2] भद्राश्वा भारताश्चापि ॥ ७५ ॥
तद्वच्च केतुमालाः कुरवो ; मेरूर्ध्वगा[3] सभा तु विधेः ।
इन्द्रादीनां च पुरो ब्रह्मस्थानात्तु[4] दिक्ष्वपि विदिक्षु ॥ ७६ ॥

[जम्बूद्वीपे सरितः]

गङ्गा विष्णोः पादाद्विनिर्गता याति[5] विधिपुर्याम्[6] ।
सात्र चतुर्धा भूत्वा चरति प्रागादिषु च दिक्षु[7] ॥ ७७ ॥
सीतालकनन्दाख्या सुचक्षुरपि भद्रसंज्ञिता चेति ।
तत्तद्दिग्गता[8] वैश्वानचलानपि ता विलङ्घ्य यान्त्यब्धीन् ॥ ७८ ॥
याम्ये सालकनन्दा भारतगा सप्तभेदा स्यात् ।
अलकाद्यनलाद्यास्तासां प्रोक्तान्तरिक्षेण ॥ ७९ ॥

[अन्यद्वीपवासिनः]

किंपुरुषाद्येष्वष्टसु[9] वसतां वर्षेषु नैव दुःखानि ।
द्वादशसहस्रमायुर्वर्षाणां किंचिदधिकमूनं च ॥ ८० ॥
तेषु न वर्षति देवो भौमानि भवन्ति तत्र चाम्भांसि ।
नैव कृतत्रेताद्या युगभेदास्तत्र कल्प्यन्ते ॥ ८१ ॥
प्लक्षफलं किंपुरुषे हरिवर्षे शर्कराशनद्रव्यम् ।

1 B. has an extra च here.

2 A. D. ति for तु ; F. gap for तु and the next letter भ.

3 Mss. have a *visarga* after this.

4 G. स्त.

5 A. C. D. F. आन्ती (corrupt).

6 A. F. विधुपुर्याम् (corrupt).

7 F. प्रागादि दिक्षु दिक्षु.

8 A. E. गति corrected to गत.

9 E. G. द्येष्वष्टसु.

भद्राश्वे चूतफलं पनसं वर्षे तु [1]केतुमालाख्ये ॥ ८२ ॥
जम्बूफलं तथेलावृते पुनः रम्यके वटस्य फलम् ।
लिकुचं हिरण्मये स्यात् कुरुषु तु कल्पद्रुमक्षीरम् ॥ ८३ ॥

[भारतवर्षम्]

भारतवर्षं सौम्ये जलधेः स्याद्दक्षिणे हिमगिरेश्च ।
याम्याब्धिबिन्दु[2]सरसोर्मध्यगतं चेति तत्प्रोक्तम् ॥ ८४ ॥
एतद्धि कर्मभूमिर्यस्मादत्रैव पुण्यपापौ[3] स्तः ।
अत्रस्थाः पुण्यकृतः स्वर्गं नरकं [4]प्रयान्ति पापकृतः ॥ ८५ ॥
अन्येष्वस्माद्देशेष्वत्र कृतानां तु कर्मणामेव ।
अनुभवति फलं जन्तुस्तेषु न[5] पुण्यं भवेन्न पापं च[6] ॥ ८६ ॥

[भारतवर्षविभागः]

भारत[7]खण्डेऽप्यस्मिन्नव खण्डाः केनचित्प्रकारेण ।
पूर्वं[8] प्रकल्पिताः स्युः सगरसुतैस्तेऽपि चात्र लिख्यन्ते ॥ ८७ ॥
इन्द्रद्वीपकशेरू द्वौ [9]ताम्रपर्णो गभस्तिमांश्चैव ।
नागः सौम्यश्च तथा [10]गान्धर्वो वारुणस्तथेत्यष्टौ ॥ ८८ ॥
नवमोऽयं द्वीपः स्याज्जलनिधिसंवृतः कुमारीति ।
पूर्वेऽन्ते[11]ऽस्य किराताः पश्चाद्यवना द्विजादयो मध्ये ॥ ८९ ॥
अत्र कुमारीद्वीपे षडुपद्वीपा विनिर्दिष्टाः ।

[1] A. F. केतु left out.
[2] F. सिन्धु.
[3] G. पापे.
[4] F. प्र omitted.
[5] A. C. F. न left out.
[6] All Mss. except G. पापश्च.
[7] All Mss. except G. खण्डेष्वप्य.
[8] B. पूर्व.
[9] A. E. ताम्रपर्णौ.
[10] A. B. C. F. G. गन्धर्वो.
[11] A. C. E. F. पूर्वन्ते; D. पूर्वेऽन्त्ये.

अङ्गयवमलयशङ्खककुमुदवराहा इति ख्याताः ॥ ९० ॥

[भारतवर्षे पर्वताः]

सप्तान्यद्रयः[1] स्युः ऋक्षो महेन्द्रविन्ध्यौ च मलयसह्यौ च ।
तद्वच्च शुक्तिमान् स्यादपरः स्यात् पारियात्राख्यः ॥ ९१ ॥
वर्णाश्रमा इहैव व्यक्ततरा इति वदन्ति[2] शास्त्रविदः ।

[लङ्कास्थानम्]

मलयद्वीपगमलयाचलमध्यमशिखर[3]संस्थिता लङ्का ॥ ९२ ॥

[केरलः]

याम्योदगायता स्यात्पादे सह्यस्य [4]परशुरामोर्वी ।
क्षेत्राणि सप्तकोटीश्वर[5]मपि बिल्वपर्वताख्यं च ॥ ९३ ॥
गोकर्णोऽनन्तपुरं तत्रामलकं तु सह्यपादे स्यात् ।
एतानि विशेषेण प्रोक्तानि हि भुक्तिमुक्तिदानीति ॥ ९४ ॥

[भारतवर्षे पुण्यक्षेत्राणि]

काशीसाकेतमायोध्याकुरुक्षेत्रहरिहरादीनि ।
श्रीरङ्गमल्लिकार्जुनपुरुषोत्तमसंज्ञितादीनि ॥ ९५ ॥
दिव्यस्थानानि स्युर्देशेष्वन्येषु च बहूनि[6] ।
पापहराणि च तीर्थान्येषु स्युः स्पर्शना[7]न्नृणाम् ॥ ९६ ॥

[1] B. G. न्य left out; E. corrupt सप्ताद्रस्युतृक्षो.

[2] A. C. E. F. भिदन्ति.

[3] G. सं left out.

[4] A. B. C. corrupt परार्मोर्वी.

[5] A. B. C. E. F. कोटिश्वर.

[6] F. बहूनि left out.

[7] A.B.C. स्पर्शनं.

[भारतवर्षे नद्यः]

नद्यश्च शतद्र्वाद्या[1] हिमवत्पादाद्रिनिर्गताः[2] सन्ति ।
वेदस्मृतिवदनाद्या नद्यः स्युः पारियात्रभवाः ॥ ९७ ॥
[3]सुरसाह्वनर्मदाद्या विनिःसृता विन्ध्यतः प्रोक्ताः ।
तापी च पयोष्ण्याख्या निर्विन्ध्याद्यास्तथैव चर्क्षभवाः ॥ ९८ ॥
भीमरथापि च गोदावर्याद्याः सह्यपादभवाः ।
मलयोद्भवास्तु नद्यः [4]कृतमालाताम्रपर्ण्याद्याः ॥ ९९ ॥
ऋषिकुल्याद्या नद्यो महेन्द्रनगसंभवाः प्रोक्ताः ।
[5]ऋषिकूला च कुमारेत्याद्या अपि निःसृतास्तु शुक्तिमतः ॥१००॥
आसां[6] नद्युपनद्यश्चासंख्याः सन्ति मानवैः सेव्याः ।
संक्षेपादिति कथितो जम्बूद्वीपः सह विभागैः ॥ १०१ ॥

[अन्यद्वीपवासिनः]

[7]अन्येषु द्वीपेषु तु वसतां रोगादयो न स्युः ।
आयुः पञ्चसहस्रं वर्षाणां कीर्तितं तेषाम् ॥ १०२ ॥

[लोकान्तराणि]

पौराणिकैस्तु गदितं लोकाः सप्तेत्यथापि पातालः ।
लोकास्तु भूर्भुवःसुवर्महरिति च जनस्तपः सत्यम् ॥ १०३ ॥

[1] Mss. corrupt A. C. नद्यश्च . . . ताद्या; B. नद्यः शत . . द्याद्या; D. नद्यश्च शतुद्रयाद्या; F, G. नद्यश्च शतद्रयाद्या; E. alone has the correct reading.

[2] E. G. विनिःसृता. [3] A. C. सुरसाश्च. [4] F. घृत.

[5] F. ऋषिकन्याद्या. [6] D. E. F. आसन्.

[7] F. Verses 102-105 full of gaps.

भूमिर्भूर्लोकोऽतः खेटस्थानादधो भुवश्चापि ।
गन्धर्वयक्षराक्षसभूतपिशाचादिभिश्च पूर्णोसौ[1] ॥ १०४ ॥
स्वर्लोकस्तत ऊर्ध्वं दिव्यजनविमानखेटयुक्तोऽसौ ।
महराख्यस्तत ऊर्ध्वं वसिष्ठपुलस्त्यादिऋषिगणाकीर्णः ॥ १०५ ॥
तत ऊर्ध्वं च जनः स्याद् भृग्वादिमहर्षिगणपूर्णः ।
तप इति तस्मादूर्ध्वं पूर्णश्च महर्षिभिः स सनकाद्यैः ॥ १०६ ॥
सत्याख्यस्तत [2]ऊर्ध्वस्तस्मिन् ब्रह्मा च परमहंसाश्च ।
व्योम ततस्तस्यान्ते [3]ब्रह्माण्डकपालसंस्थितिर्भवति ॥ १०७ ॥
अतलवितलसुतलनितलतलातलमहातलरसातलाश्च ।
पातालाः सप्त भुवोऽन्तर्गताः स्यू रम्यभूमयस्ते च ॥ १०८ ॥
अष्टमहानागाद्यैरसुरैश्च महाबलिप्रमुखैः ।
ते पूर्णा इति चोक्तास्तद्वद्धयग्रीवादिभिश्चापि ॥ १०९ ॥
लोको नरका[4]ख्योऽधस्तदधस्तथोपनरकाख्यः ।
ब्रह्माण्डकपालोऽधो[5] गदितं[6] पौराणिकैरेवम्[7] ॥ ११० ॥

इति गोलदीपिकायां भूम्यादिचिन्तनाख्यः[8]
तृतीयोऽध्यायः

इति भूम्यादिविषयस्तृतीयः

[1] A. C. श्चासौ, &c., पूर्ण left out; F. च left out.
[2] E. G. ऊर्ध्वे.
[3] A. C. ब्रह्मान्तकाल (corrupt).
[4] F. ख्योर्ध्वं (wrong).
[5] E. कपालोऽतो.
[6] E. गदितः.
[7] G. [illegible]
[8] G. the word missing.

चतुर्थोऽध्यायः

[भूसूत्रम्]

क्षितिजापरक्षितिजयोर्बद्धं भूमध्यगं च भूसूत्रम् ।

[शङ्कुच्छाये]

अवलम्बितं हि सूत्रं सूर्याच्छङ्कुर्भवेत् कुसूत्रान्तम् ॥ १ ॥
भूमध्यान्तं शङ्कोर्मूलाच्छाया[1] च तत्र निर्दिष्टा ।
दो:कोटी ते द्वे स्तः, कर्णस्त्रिज्या तयोस्त्रिभिस्त्र्यश्रम् ॥ २ ॥
क्षितिजार्कयोस्तु विवरे द्युवृत्तजा ज्याथवात्र कर्णः स्यात् ।
कोटिः स्याद्धि शङ्कुर्बाहुः शङ्क्वग्रमत्र च त्र्यश्रम् ॥ ३ ॥

१a. अथ शङ्कुच्छायादीनां स्वरूपाद्याह—क्षितिजेति ।

१b-२. क्षितिजसमानसमतलज्ञानार्थमत्र भूसूत्रं प्रकल्प्यते—अवलम्बितं हीति । समतलाद्रवेरुन्नतिमानं शङ्कुरित्यर्थः । ते द्वे शङ्कुच्छाये दो:कोटी भवतः । तयोः कर्णः त्रिज्या स्यात् । एवं दो:कोटिकर्णैः [2]त्र्यश्रं क्षेत्रं भवति । दो:कोटयोर्नामभेद एव । एका भुजा, इतरा कोटिरित्येवार्थः ।

३. शङ्क्वाश्रितं[3] क्षेत्रान्तरमाह—क्षितिजार्कयोरिति । अथवा अर्काश्रितद्युवृत्ते क्षितिजान्ता जीवा[4] इष्टद्युज्या, सा कर्णः, शङ्कुः कोटिः, शङ्क्वग्रं बाहुः । एवमेभिश्च त्र्यश्रं भवति । एतदक्षनिमित्तं क्षेत्रम् । शङ्क्वग्रभूज्याक्षज्याद्याश्रितानि क्षेत्राणि सर्वाण्यप्यक्षनिमित्तानि । तेष्वेकत्र भवैः बाह्वादिभिः इतरक्षेत्रभवबाह्वाद्यानयनम्[5] अनुपातात्कार्यम्[6] । तदत्र क्षेत्रज्ञानप्रयोजनम् ।

[1] A. B. corrupt alternate reading त्रिभ्रवा for मूलाच्छाया written beneath the word.

[2] A. त्र्यश्र. [3] A. श्रित. [4] A. स्तजीवा.

[5] B. omits आनयनम्. [6] B. कल्प्यम्.

[1]कालज्यया हि[2] साध्या द्युवृत्तगाज्यानुपातेन ।
इयती त्रिज्यावृत्ते यदि कियती स्यात्तदा द्युवृत्त इति ॥ ४ ॥
उन्मण्डलाद्धि युक्तं जीवाग्रहणं सदापि हरिजाच्च[3] ।
उन्मण्डलमेव यतो भ्रमतो गोलस्य पार्श्वगं भवति ॥ ५ ॥
चरदलहीनयुतानामतो दिनस्यैष्ययातजासूनाम् ।
जीवा चरज्ययापि च युतहीना गोलयोस्तु कालज्या ॥ ६ ॥

[इष्टशङ्क्वानयनम्]

त्रिज्याश्रुतेर्यदि स्याल्लम्बः कोटिस्तदा कियती ।
इष्टद्युवृत्तजीवाकर्णस्येतीष्टशङ्कुरपि भवति ॥ ७ ॥

४. तत्त्रैराशिकं चैवमित्याह—कालज्ययेति । घटिकामण्डलगतघटिकादिकालज्यया स्वाहोरात्रेष्टज्यानुपातात्कल्प्या ।

५. गतगन्तव्यकालस्य हरिजादुत्पन्नत्वेऽपि जीवाग्रहणमुन्मण्डलादुत्पन्नस्य कालस्यैव युज्यत इत्याह—उन्मण्डलाद्धीति । तत्र हेतुमाह—उन्मण्डलमेवेति । जीवा हि वृत्तपादे कल्प्यते । गोलभ्रमणवृत्तस्य मध्यगतमुन्मण्डलमेव भवति । अतो गोलभ्रमणवृत्तजातजीवाग्रहणं तन्मध्यगतादुन्मण्डलादेव युज्यत इत्यर्थः । पार्श्वशब्देन अधऊर्ध्वभागयोर्मध्य उच्यते । अस्य जीवायां क्षितिजोन्मण्डलविवरजातजीवाः प्रक्षिप्य संशोध्य वा क्षितिजादुत्पन्नजीवासिद्धिः स्यात् ।

६. उन्मण्डलादुत्पन्नजीवाग्रहणोपायं तथा क्षितिजादुत्पन्नजीवानयनोपायं चाह—चरदलेति । कालज्या, क्षितिजादुत्पन्ना कालज्येत्यर्थः ।

७. कालज्यानीतया क्षितिजादुत्पन्नस्वाहोरात्रेष्टज्यया कर्णात्मिकया कोटिरूपस्य शङ्कोरानयने त्रैराशिकमाह—त्रिज्याश्रुतेरिति ।

[1] F. omits this line.
[2] A. B. C. तु for हि.
[3] A. B. D. E. F. G. हरिजान्ते,

[शङ्कग्रानयनम्]

लम्बककोट्यास्तु[1] भुजा यद्यक्षज्यात्र शङ्कुकोट्याः[2] का ।
स्यादिति शङ्कग्रं स्यात्, क्षेत्रं निखिलं यतोऽक्षजमिह स्यात् ॥ ८ ॥
अथवेष्टद्युज्याघ्ना क्रान्तिज्यार्काग्रया हृता[3] शङ्कुः ।
भुज्यानिहताच्छङ्कोः शङ्कग्रं क्रान्तिजीवयाप्तं[4] स्यात् ॥ ९ ॥

[समशङ्कुः]

अर्के सममण्डलगे स्वर्काग्रासंमितं हि शङ्कग्रम् ।
समशङ्कुरस्तः साध्यो रव्यग्राख्यात् स्वशङ्कग्रात् ॥ १० ॥
[5]व्यस्तविधिनाथवा दोःकोटिभवेनानुपातेन ।
लम्बः पलस्य कोटिर्यदि शङ्कग्रस्य केति समशङ्कुः ॥ ११ ॥

८. शङ्कग्रानयने त्रैराशिकमाह—लम्बक[6]कोट्या इति । लम्बकोट्याः क्षेत्रान्तरगतत्वात् त्रैराशिकदोषमाशङ्क्य तद्[7]व्युदासार्थं 'निखिलं क्षेत्रं यतोऽक्षजम्' इत्युक्तम् ।

९. क्षेत्रान्तरगतैः कोटिभुजाकर्णैः शङ्कुशङ्क्वग्रयोरानयनं प्रदर्शयति—अथवेष्टेति ।

१०-११. सममण्डलशङ्क्वानयने युक्तिं प्रदर्शयति—**अर्के** इति । अक्षज्यागुणिताच्छङ्कोः लम्बकाप्ता हि शङ्कग्रम् । अतः शङ्कग्राल्लम्बकगुणितादक्षज्ययाप्तः[8] शङ्कुरिति व्यस्तविधिः । दोःकोटिभवं त्रैराशिकं प्रदर्शयति—**लम्बः पलस्येति** ।

[1] D. G. कोटयोस्तु (corrupt).
[2] G. ट्यो: (corrupt).
[3] A. C. E. हृताद्. D. G. हृतः.
[4] All the MSS. except G. जीवाप्तं.
[5] A. C. F. व्यस्तं.
[6] Mss. omit क by haplography.
[7] A. omits तद्; B. omits त.
[8] A. गुणिताक्षज्याप्तः.

[कोणशङ्कुः]

पूर्वापररेखान्तं शङ्कोर्मूलाद्[1] भुजा सदापि स्यात् ।
याम्योत्तररेखान्तं शङ्कोर्मूलात्तथैव[2] कोटिः स्यात् ॥ १२ ॥
[3]छाया च तयोः कर्णस्तैरिष्टाशास्थ[4]शङ्कुरपि साध्यः ।
समयोः शङ्कुच्छायाकर्णयोर्युतिभिन्नयोस्तयोर्भेदः ॥ १३ ॥
[5]छायाकर्णस्य भुजा, कोटिस्ताभ्यां प्रसाध्यात्र ।
कोटितुल्या यदा स्याद् भुजा तदा कोणगो रविर्भवति ॥ १४ ॥

१२-१३a. अथेष्टाशास्थशङ्क्वानयनार्थं छायाकर्णक्षेत्रभुजां कोटिं च प्रदर्शयति—पूर्वापररेखान्तमिति । त्रिज्यावृत्तमालिख्य दिक्सूत्रे च कुर्यात् । तस्मिन् वृत्ते यत्र महाशङ्कोर्मूलं तत्काले भवति, [6]केन्द्रान्महाच्छायान्तरे हि तद्भवति[7] । तस्मात् शङ्कुमूलात् पूर्वापररेखान्ता याम्योदगायता महाच्छाया-कर्णस्य भुजा भवति । तस्माच्छङ्कुमूलात्[8] याम्योत्तररेखान्ता पूर्वापरायता छायाकर्णस्य कोटिर्भवति । एवं सदा छायावृत्ते भुजाकोटी भवतः । कर्णस्तु महाच्छाया । [9]एतैः भुजाकोटिकर्णैः [10]इष्टदिक्संस्थे सवितरि शङ्कुः साध्यः ।

१३b.-१४a. छायाभुजानयनमाह—समयोरिति । छायाकर्णस्य भुजा शङ्कुमूलात् पूर्वापररेखान्ता रेखेत्यर्थः । ताभ्यां भुजाकर्णाभ्यां कोटिश्च साध्या । तयोः वर्गान्तरपदं कोटिरित्यर्थः । सा हि शङ्कुमूला दक्षिणोत्तररेखान्ता भवति ।

१४b १८a. यस्मिन् काले छायाकर्णस्य भुजाकोटी समे भवतः, तदा रविः कोणदिग्गतो भवति । अतस्तदानीं दृष्टः शङ्कुः कोणशङ्कुर्भवति । अविशेषविधिना भुजाकोट्योः साम्यं कृत्वा कोणशङ्कुः साध्यः । अविशेष-

[1] A. B. C. E. मूला.   [2] D. मूलस्तथैव.   [3] B. E. G. छायात्र.

[4] Mss. read wrongly शास्थ.

[5] F. Verses 14-18, full of gaps.

[6] Extra न्मु after कृन्द्रा in Mss. In B. it is deleted by the scribe himself. B. महा corrected to मह.

[7] A. B. भवति repeated in Mss.   [8] A. मूलया.

[9] A. एतैः.   [10] A. वि for इष्ट.

अविशेषविधिर्बुद्ध्या[1] कार्यः[2] स्यात् कोणशङ्कु...
याम्येऽल्पा कोटिश्चेच्छोध्यं किंचिद्गतैष्यनाडीषु ॥ ...
तत्राल्पो बाहुश्चेद्योज्यं किंचिद्गतैष्यनाडीषु ।
सौम्यस्थेऽर्केऽप्येवं भानुस्तद्भाग एव चरति[3] यदि ...
चारः स्यादुभयोश्चेत्प्राग्वत्तत्रापि याम्यशङ्कासिद्धै ।
व्यस्तमुदक्छङ्कासिद्धै शोध्यादेर्मानमत्र बुद्ध्योह्यम्[4] ।
दोःकोट्योर्भेदोऽन्यैर्विशोध्यते दीयतेऽसुषु तथैव ।

[इष्टाशास्थशङ्कुः]

इष्टदिशं परिकल्प्य त्रिज्यावृत्ते तदुद्भवा दोर्ज्या ॥ ...

प्रकारमाह—याम्येऽल्पेति । पूर्वापररेखातो याम्यदिक्स्थे सवित... शङ्कौ साध्ये च सति, अभीष्टगतगन्तव्यघटिकासिद्धमहाच्छायाया... कोटिरल्पा चेत्, गतगन्तव्यनाडीषु किंचित्कालमानं शोध्यं भवति ... याम्यगतोऽर्क इत्यर्थः । तत्र कोटितो बाहुरल्पश्चेत् गतैष्यनाडीषु कि... योज्यं भवति । एवं दक्षिणगोले विधिः । सौम्यदिक्स्थो भानुः ... चरति चेत् सौम्यदिक्स्थशङ्कुसिद्ध्यर्थमेवमेव विधिः । सौम्य... दक्षिणदिशि च चरति चेत् तत्रापि याम्यदिग्गतशङ्कुसिद्ध्यर्थं ... योजने स्तः । तत्रोदक्छङ्कुसिद्ध्यर्थं तु व्यस्तं शोधनयोजने ... शोध्यस्य क्षेप्यस्य[5] वा मानं बुद्ध्या ऊह्यम् । अथवा दोःको... प्राणा गतगन्तव्यप्राणेषु शोध्या देया वा भवन्ति । पुन... यावद् भुजाकोटयोः साम्यं भवति । तत्राविशिष्टः शङ्कुः कोण...

१८b-२२. एवं कोणशङ्कुं संसाध्य पुनरिष्टदिक्स्थे... विशेषमाह—इष्टदिशमिति । त्रिज्यावृत्ते हि विदिक्स्थेऽर्के ...

[1] A. C. common corruption बध्या. [2] A. B. ...

[3] G. omits यदि.

[4] B. C. बुद्ध्योह्यम्. [5] A. क्षेप...

[उदाहरणम्]

[1]छायायां किंचिदुदाहरणं प्रदर्श्यते[2] ।

उद्देशकः—

स्फुटरविरजमध्यस्थः समशङ्कुः कोऽग्निदिक्स्थशङ्कुरपि ।
वाच्योऽग्निशक्रयोरपि मध्यस्थोऽ[a]धृब्धिरसमिताक्षज्या ॥ २३ ॥

२३. उदाहरणमाह[3]—स्फुटरविरिति । मेषमध्यगतः स्फुटरविर्यदा भवति तदा समशङ्कुर्वाच्यः । तदानीं कोणगतार्कस्य शङ्कुश्च वाच्यः । अग्निशक्रयोर्मध्यगतार्कस्य शङ्कुरपि वाच्यः । सममण्डलगतार्कस्य शङ्कुः समशङ्कुरिति उच्यते । [4]सप्ताब्धिषण्मिता यत्र अक्षज्या तत्र देशे एते शङ्कवो वाच्याः । इत्युद्देशकवचनम् ।

[5]अत्र [b]सप्ताब्धिरसमिता[6]क्षज्या[7] । ततः सिद्धा लम्बज्या [c]सप्ताद्रिरामदहन तुलिता । अस्मादर्का[8]त्सिद्धार्काग्रा [d]वसुरसाग्नितुलिता । सा लम्बघ्ना अक्षज्यया हृता समशङ्कुः स्यात् । स च [e]चन्द्राश्विगोविधुतुल्यः स्यात् ।

[1] A. C. D. have an extra त्रि before छायायां. G. छायाया.

[2] D. G. प्रदृश्यते.

[3] A. omits this word.

[4] A. corrupt सर्वाब्धिपिण्डिता.

[5] E. अत्र omitted.

[6] B. D. E. षट्संख्या for रसमिता.

[7] E. अक्षज्या omitted.

[8] A. C. E. F. अक्षात् for अर्कात्. A. C. सिद्धाग्रा for सिद्धार्काग्रा.

a अद्रीत्यादि 647.

b सप्ताब्धीत्यादि 647.

c सप्ताद्रीत्यादि 3377.

d वस्वित्यादि 368.

e चन्द्राश्वीत्यादि 1921.

कोणशङ्क्वर्थं[1] कल्पिता द्युगतनाड्योऽष्टौ । तैः सिद्धशङ्कुः [a]षडेकशराश्वितुलितः । शङ्क्वग्रं [b]द्व्यष्टवेदतुलितम् । तच्छाया [c]त्र्यब्धिरामाक्षितुलिता[2] । सा कर्णः । अत्राकाग्रा [d]वसुरसाग्निमिता । शङ्क्वग्राकाग्रयोः भिन्नदिशोर्भेदः[3] छायाकर्णस्य भुजा भवति । सा च [e]वेदैकभूमिता । तस्या[4] भुजायाश्छायायाश्च वर्गभेदमूलं कोटिः । सा च [f]खवेदरामाक्षितुलिता । तत्र भुजाकोट्योरतौल्यात्तयोरन्तरं[g] पूर्वसिद्धेषु घटिकाष्टकभवेषु द्युगतासुषु[h] [5]कोट्या आधिक्यात् प्रक्षेप्यम् । तथा सिद्धा द्युगतासवः [i]षड्गगनविधुबाणतुलिताः । तैः सिद्धः शङ्कुः [j]स्वरशून्यवेदाग्नितुलितः । छाया [k]वसु[6]रसाब्धिमिता । छायाबाहुः [l]शरवसुदस्रतुलितः । तत्कोटिः [m]दस्ररसाग्नितुलिता । [7]अत्रापि कोट्या आधिक्यात [8]दोःकोट्योरन्तरं[n] द्युगतासुषु[o] क्षेप्यम् । तथागता[9] द्युगतासवः [p]त्रिवसु[10]शशिबाणतुलिताः । एतैरपि शङ्क्वादीनानीय पूर्ववत्कर्माविशेषान्तं कार्यम्[11] । अविशेषविधौ यत्र भुजातः[12] कोटिरूना भवति, तत्र भुजाकोट्यन्तरं द्युगतासुषु विशोध्य शङ्क्वादि साध्यम् । एवमविशिष्टोऽत्र कोणशङ्कुः [q]शक्राब्धिरामतुलितो भवति ।

1 A. B. C. F. शङ्क्वग्रं (corrupt).
2 D. G. त्र्यक्ष्यब्ध्यक्षि (2423) तुलिता, कर्णः (wrong).
3 G. भेदे.
4 D. G. अस्या.
5 G. कोट्योः.
6 B. G. शशि for वसु.
7 G. तत्रापि.
8 B. दोःकोट्यन्तर.
9 B. तथाकृतात्.
10 B. वसु left out.
11 A. C. कार्यः.
12 A. B. C. E. तत्.

a षडेकेत्यादि 2516.
b द्व्यष्टेत्यादि 482.
c त्र्यब्धीत्यादि 2343.
d वसुरसेत्यादि 368.
e वेदैकेत्यादि 114.
f खवेदेत्यादि 2340.
g 2226.
h 2880.
i षडित्यादि 5106.
j स्वरेत्यादि 3407.
k वस्वित्यादि 468.
l शरेत्यादि 285.
m दस्रेत्यादि 362.
n 77.
o 5106.
p त्रिवस्वित्यादि 5183.
q शक्रेत्यादि 3414.

अथ शक्राग्न्योर्मध्यगतशङ्कानयनेऽपि[1] कल्पिता घुगतनाड्योऽष्टौ। एतैः सिद्धः[2] शङ्कुः [a]षडेकशराक्षितुलितः। तच्छाया [b]ऽयब्धिरामाक्षितुलिता। च्छायाभुजा [c]वेदैकभूमितुलिता स्यात्। अत्रेन्द्राग्न्योर्मध्यगतत्वाच्छङ्कोस्त्रिज्यावृत्ते वृत्तपादचतुर्थांशो(?शे)ऽभीष्टभुजा स्यात्। तद्भुजा[3] तत्कालमहाच्छायया[4] गुणिता त्रिज्याभक्ता दिग्बाहुर्भवति। यदि त्रिज्यावृत्ते इयती भुजा, तदा छायावृत्ते कियतीति त्रैराशिकम्। तथा सिद्धो दिग्बाहुः [d]षडङ्कवसुतुलितः[5] स्यात्। अत्र बाह्वोरसमत्वाद् दिग्बाहोराधिक्याच्च तद्बाह्वोः [e]अन्तरं घुगतासुषु[f] प्रक्षिप्य तद्घुगतवशाच्छङ्कादिमानीय पूर्ववद् बाहुद्वयं साध्यम्। तत्र बाह्वन्तर[6]युता[7] घुगतासवो [g]द्विरसषड्राम-[8]तुलिताः स्युः। तत्सिद्धः शङ्कुः [9]भूम्यद्रिनवाक्षि[h]तुलितः। तच्छाया [10]खाग्निसप्तेन्दु[i]तुलिता। छायाभुजा [11]विधुखाब्धि[j]तुलिता। दिग्भुजा [k]द्विषड्रसमिता।

[1] A. C. E. G. वि for पि corrupt; F. अपि omitted.

[2] F. तत्सिद्धः.

[3] B. G. भुजज्या.

[4] D. G. छाया.

[5] A. B. C. E. omit वसु.

[6] B. र left out.

[7] A.B.C.E.G. घुगता for घुयुता (corrupt).

[8] D. G. षड् omitted.

[9] Mss. corrupt; A. C. D. भूम्यादिना; B. भुम्यद्दिना; G. भूम्यद्रि गम्याक्षि.

[10] E. गो for खा.

[11] D. G. विधुखाग्नि for विधुखाब्धि.

a षडेकेत्यादि 2516.

b ऽयब्धीत्यादि 2343.

c वेदैकेत्यादि 114.

d षडङ्केत्यादि 896.

e 896—114=782.

f 2880.

g द्विरसेत्यादि 3662.

h भूम्यद्रीत्यादि 2971.

i खाग्नीत्यादि 1730.

j विधुखेत्यादि 201.

k द्विषडित्यादि 662.

अत्र छायाभुजादिग्भुजयोरीसमेर्मध्यं दृश्यते । अतस्तयोरन्तरं[a] द्विगुणितं [b]द्युगतासुषु प्रक्षिप्य तद्वशाच्छङ्क्वादि साध्यम् । तथासिद्धा[1] द्युगतासवः [c]कृताष्टशराब्धिमिताः स्युः । तत्सिद्धशङ्कुः [2]मन्वग्निराम[d]-तुलितः । छाया [e]तिथ्यङ्कतुलिता । छायाबाहुः [f]षड्रसाक्षितुलितः । दिग्बाहुः [g]खेष्वग्नितुलितः । अनयो[h]रन्तरमपि द्विगुणितं[i] द्युगतासुषु[j] क्षेप्यम् । [3]तत्र [4]द्युगतासवो [k]दस्रेषुसप्ताब्धितुलिताः । शङ्कुः[5] [l]द्विशराग्निराममितः । छाया [m]वेदरसाद्रिमिता । छायाबाहुः [n]वेदाद्रिदस्रतुल्यः । दिग्बाहुः [o]द्व्यङ्काश्वितुल्यः । [6]अत्रापि बाह्वन्तरं[p] [7]द्विगुणितं द्युगतासुषु[q] प्रक्षिप्य जाता असवो [r]वसुपन्नगसप्ताब्धितुलिताः । तच्छङ्कुः [s]खरसाग्निरामतुलितः । छाया [t]वसुदस्राद्रितुल्या । छायाबाहुः [u]षट्सप्ताश्वितुल्यः । दिग्बाहुः [v]वसुसप्ताश्वितुल्यः । अत्र बाह्वोरन्तरं द्विसंख्यमेव । तस्य द्विगुणितस्य द्युगतासुषु[w] प्रक्षेपाच्छङ्कोः एक[8]कलैवाधिक्यं स्यात् । अत [x]एकरसाग्निरामतुल्यः शक्राग्न्योर्मध्यगतः शङ्कुर्भवति । एवमिष्टदिग्गतः शङ्कुः साध्यः ।

[1] C. सिद्धं. [2] D. मुनि for मनु.
[3] A. C. तद for तत्र (common corruption). [4] E. omits द्यु.
[5] A. शङ्कुः to वेदरसाद्रिमिता left out; C. has this portion.
[6] G. अन्यत्र for अत्रापि. [7] D. द्विगुणितं left out.
[8] Mss. corrupt. A. C. D. तलैव; B. E. F. तलयैव; G. कलयैव.

a 461	*b* 3662.	*c* कृतेत्यादि 4584.
d मन्वित्यादि 3314.	*e* तिथीत्यादि 915.	*f* षड्रसेत्यादि 266.
g खेष्वित्यादि 350.	*h* 84.	*i* 168.
j 4584.	*k* दस्रेष्वित्यादि 4752.	*l* द्विशरेत्यादि 3352.
m वेदरसेत्यादि 764.	*n* वेदाद्रीत्यादि 274.	*o* द्व्यङ्केत्यादि 292.
p 18.	*q* 4752.	*r* वसुपन्नगेत्यादि 4788.
s खरसेत्यादि 3360.	*t* वसुदस्रेत्यादि 728.	*u* षट्सप्तेत्यादि 276.
v वसुसप्तेत्यादि 278.	*w* 4788.	*x* एकरसेत्यादि 3361.

[द्वादशाङ्गुलशङ्कुः]

इष्टद्युगतप्राणैस्तत्कालार्केण च प्रसाध्याः स्युः ।
शङ्कुतदग्रच्छायार्काग्राः ; [1]शङ्क्वग्रदिनकराग्रैक्यम् ॥ २४ ॥
दिवसाग्र्ये, [2]भिन्नदिशोश्च्छायाबाहुस्तयोर्भेदः ।
[a]अर्काङ्गुलस्य शङ्कोः प्रभा च साध्या गतासुभिरभीष्टैः ॥ २५ ॥
अर्काङ्गुलस्य शङ्कोः प्रभां महाच्छायया हरेद्धत्वा ।
छायाभुजया लब्धं त्वभीष्टवृत्ते [3]स्फुटेष्टभुजा ॥ २६ ॥

[शङ्कुच्छायाच्छेद्यकम्]

वृत्तं लिखे[b]दिनाङ्गुलशङ्कुप्रभया समे सदिक्सूत्रम् ।
[4]तस्मिन् पूर्वापरयोश्च्छाया[5]दिशि याम्यसौम्यदिक्स्थाग्राम्[6] ॥ २७ ॥

२४-२५a. अत्राभीष्टशङ्कोः छायाप्रमार्गपरिलेखनार्थं छायाभुजानयनं पूर्वोक्तमेव पुनरप्याह—इष्टद्युगतेति ।

२५b २६. महाच्छायावृत्तगतच्छायाभुजया द्वादशाङ्गुलशङ्कुच्छायाकृतवृत्ते छायानयनमाह—अर्काङ्गुलस्येति । अर्काङ्गुलच्छायां तत्कालजां पूर्वसाधितच्छायाभुजया हत्वा महाच्छायया हरेत् । तत्र लब्धम् अर्काङ्गुलशङ्कुच्छायया कृतेऽभीष्टवृत्ते इष्टा स्फुटभुजा भवति ।

२७ ३२a. लेखनप्रकारमाह—वृत्तमिति । तस्मिन् वृत्ते पूर्वापरसूत्रस्य पश्चार्धात् पूर्वार्धाच्च भुजातुल्यां शलाकां याम्योत्तरं नयेत्, यथा शलाकाया

[1] D. G. ग्र in शङ्क्वग्र left out.
[2] B. E. भिन्नदिशौ.
[3] A. D. स्फुटे left out.
[4] E. अस्मिन्.
[5] D. छाया left out.
[6] A. C. ग्रात्; G. ग्रा.

[a] अर्काङ्गुलेति 12.
[b] इनाङ्गुलेति 12.

[1]पृथगिष्टभुजाङ्गुलितां नयेच्छलाकां[2] यथा तदग्रयुगम् ।
प्रागपरसूत्रपरिधिस्थितं भवेत्कल्पयेच्च बिन्दुयुगम् ॥ २८ ॥
परिधिशलाकाग्रयुतौ पश्चिमभागे, तथा प्राच्याम् ।
दिक्सूत्रसंस्थमध्ये परिधिगताग्रद्वये शलाके वा ॥ २९ ॥
इष्टभुजद्विगुणमिते निधाय कार्यौ तदग्रगौ बिन्दू ।
दिनमध्यच्छायाग्रे शङ्कोरर्काङ्गुलकमितस्य ॥ ३० ॥
याम्योत्तराख्यसूत्रे तृतीयबिन्दुः पुनः कल्प्यः[3] ।
कुर्याद् [4]बिन्दुत्रितयस्पृग्वृत्तखण्डं तदुक्तमार्गेण ॥ ३१ ॥
तत्परिधिगताग्रैव छाया स्याद् वृत्तमध्यगशङ्कोः ।

अग्रद्वयं पूर्वापररेखायां वृत्तपरिधौ यावत्तिष्ठेत् । तत्र शलाकाग्रपरिधियोगे बिन्दुं कुर्यात् । एवं पश्चिमभागे पूर्वभागे च शलाकाग्रपरिधियुतौ बिन्दुद्वयं कुर्यात् । [5]यदा उत्तरदिशि शङ्कोश्छाया भवति, तदा उत्तरदिशि शलाका नीयते । यदा दक्षिणदिशि छाया वर्तते, तदा दक्षिणदिशि शलाका नीयते ।

शलाकास्थापनमेवं वा क्रियताम् । द्विगुणितभुजाङ्गुल्यां शलाकां पूर्वापररेखास्थमध्यां परिधिस्पृगग्रयां न्यस्य छायादिशि तदग्रपरिधियोगे बिन्दुं कुर्यात् । एवं पश्चिमभागे तथा पूर्वभागे चेति । एवं बिन्दुद्वयं स्यात् ।

पुनरर्काङ्गुलशङ्कोर्मध्यच्छायाङ्गुलितां शलाकां वृत्तमध्यगतां दक्षिणोत्तरसूत्रे छायादिशि नीत्वा तदग्रे तृतीयबिन्दुं कुर्यात् । एतद्बिन्दुत्रयस्पृग्वृत्तखण्डं छायावृत्तान्तर्गतं भवति । तत्परिधिगताग्रा सदा छायावृत्तमध्यस्थशङ्कोश्छाया भवति । बिन्दुत्रयस्पृग्वृत्तं तदुक्तमार्गेण कार्यं, त्रिशर्करा(? त्रिस्पृक्सूत्र)विधानेनेत्यर्थः ।

[1] G. पृथगभीष्ट. [2] A. C. G. छायाङ्गु; E. शलंका (corrupt.)
[3] G. परिकल्प्य, for कल्प्यः.
[4] A. C. बिन्दुत्रितयं; G. त्रितयस्य वृत्तं. [5] A. यथा.

[शङ्कुस्वरूपम्]

क्रमहीनोर्ध्वो [1]वृत्तस्तीक्ष्णाग्रोऽर्काङ्गुलोऽत्र शङ्कुः स्यात् ॥ ३२ ॥

[दोषरहितच्छायाभ्रमणरेखा]

[2]कालद्वयसूर्याभ्यामन्यैश्छायायुगं [3]च बाहुयुगम् ।
कृत्वा स्वे स्वे वृत्ते बाह्वग्रे कल्पयेत च बिन्दुयुगम् ॥ ३३ ॥
पूर्वापरकालभवक्रान्त्यो[4]र्भेदान्न दोष इह भवति ।
छायाभ्रम इति[5] गदितो **गोलविदा**[6] युक्तिरपि[7] च दृश्यात्र ॥ ३४ ॥
बिन्दुत्रितयं केन्द्रं कृत्वा वृत्तत्रयं समं विलिखेत् ।
मत्स्यद्वयं यथा स्यात्, मत्स्यद्वयमध्यगे नयेत्सूत्रे ॥ ३५ ॥
तत्सूत्रयोस्तु योगे केन्द्रं कृत्वैकबिन्दुगं[8] वृत्तम् ।
कुर्यात्तस्मिन्[9] वृत्ते तिष्ठन्ति हि बिन्दवस्त्रयोऽपि च ते ॥ ३६ ॥

३२b. अत्र शङ्कुर्वृत्तः क्रमाद्धीनोर्ध्वभागस्तीक्ष्णाग्रो ग्राह्य इत्याह—क्रमहीनेति ।

३३-३४. पूर्वापरकाल्योः क्रान्तिभेदाज्जातं दूषणमाशङ्क्य तत्परिहारार्थं प्रकारान्तरमाह—कालद्वयेति । समैर्गतगन्तव्यासुभिश्छायाद्वयं तद्बाहुद्वयं च पूर्वाह्णकालजैरपराह्णकालजैश्च साधनैर्यथाविध्यानीय पूर्वाह्णच्छायावृत्ते तद्बाह्वग्रे प्रथमबिन्दुः, अपराह्णच्छायावृत्ते तद्बाह्वग्रे द्वितीयो बिन्दुः, मध्याह्नच्छायाग्रे तृतीयबिन्दुरित्यर्थः ।

३५-३६. बिन्दुत्रयस्पृग्वृत्तलेखनोपायमाह—बिन्दुत्रितयमिति ।

[1] A. C. वृत्तस्तीक्ष्णाग्रा ; G. वृत्तस्तीक्ष्णाग्रे.
[2] A. च in. कालद्वय omitted.
[3] A. च omitted.
[4] Mss read भे.
[5] B. गदिते.
[6] A. C. गोलविदो (common corruption).
[7] D. G. युक्तिरत्र for युक्तिरपि च.
[8] All Mss. except G. गतं.
[9] E. अस्मिन्.

[कोणच्छायातः रव्यानयनम्]

कोणस्थोऽर्को यस्मिन् काले तस्माद्दिनार्धपर्यन्तम् ।
कालं विद्याद् घटिकायन्त्रेण[1] नताह्वयः स कालः स्यात् ॥ ३७ ॥
कोणप्रभार्ककृत्योर्योगपदं भवति कोणभाकर्णः ।
कोणप्रभाश्रुतिनरैः साध्ये कोणस्थशङ्कुदृग्ज्ये च ॥ ३८ ॥
कोणगतेऽर्के छायाकर्णस्य समे स्मृते भुजाकोटी ।
छायावर्गार्धपदं तस्मान्मानं भुजाकोट्योः ॥ ३९ ॥
पूर्वापरायता स्यात्कोटिर्याम्योदगायता[2] भुजा ।
छायाकोटिसमा स्यात् पूर्वापरगा द्युवृत्तकोटिरपि ॥ ४० ॥
कोटिर्घटिकावृत्ते पूर्वापरगा नतज्यया तुलिता ।

३७. कोणच्छायया तत्कालनतकालेन च स्फुटार्कानयनमाह—कोणस्थ इति । कृतदिग्विभागवृत्ते शङ्कुच्छायया हि कोणस्थितिरर्कस्य वेद्या । मध्याह्नकालश्च तस्मिन् वृत्ते छायया वेद्यः । नाडिकास्थापनेन तत्कालश्च वेद्यः ।

३८. तत्र कोणस्थद्वादशाङ्गुलशङ्कुच्छायया कोणस्थमहाशङ्कु-महाच्छाययोरानयनमाह—कोणप्रभेति ।

३९. कोणस्थेऽर्के भुजाकोट्योः साम्यात् छायाख्यस्य कर्णस्य वर्गार्धपदं भुजामानं कोटिमानं चेत्याह—कोणगतेऽर्क इति ।

४०a. भुजाकोट्योः स्थानमाह—पूर्वापरेति ।

४०b. द्युमण्डले दक्षिणोत्तरशलाकार्कयोर्विवरगतद्युवृत्तकोटिज्यायां छायाकोटिसाम्यमाह—छायाकोटिसमेति ।

४१. सूर्याधिष्ठितद्युमण्डलभागसमो यो घटिकामण्डलस्य भागस्तद्भाग-दक्षिणोत्तरशलाकयोरन्तरालगतघटिकामण्डलकोटिज्यायाः नतकालजीवासाम्य-

[1] Ms. read यन्त्रेण. [2] A. C. दृगायता for दगायता.

[कोणच्छायातः रव्यानयनम्]

कोणस्थोऽर्को यस्मिन् काले तस्मादिनार्धपर्यन्तम् ।
कालं विद्याद् घटिकायन्त्रेण[1] नताह्वयः स कालः स्यात् ॥ ३७ ॥
कोणप्रभार्ककृत्योर्योगपदं भवति कोणभाकर्णः ।
कोणप्रभाश्रुतिनरैः साध्ये कोणस्थशङ्कुदृग्ज्ये च ॥ ३८ ॥
कोणगतेऽर्के छायाकर्णस्य समे स्मृते भुजाकोटी ।
छायावर्गार्धपदं तस्मान्मानं भुजाकोट्योः ॥ ३९ ॥
पूर्वापरायता स्यात्कोटिर्याम्योदगायतात्र[2] भुजा ।
छायाकोटिसमा स्यात् पूर्वापरगा द्युवृत्तकोटिरपि ॥ ४० ॥
कोटिर्घटिकावृत्ते पूर्वापरगा नतज्यया तुलिता ।

३७. कोणच्छायया तत्कालनतकालेन च स्फुटार्कानयनमाह—कोणस्थ इति । कृतदिग्विभागवृत्ते शङ्कुच्छायया हि कोणस्थितिरर्कस्य वेद्या । मध्याह्नकालश्च तस्मिन् वृत्ते छायया वेद्यः । नाडिकास्थापनेन तत्कालश्च वेद्यः ।

३८. तत्र कोणस्थयार्काङ्गुलशङ्कुच्छायया कोणस्थमहाशङ्कु-महाच्छाययोरानयनमाह—कोणप्रभेति ।

३९. कोणस्थेऽर्के भुजाकोट्योः साम्यात् छायाख्यस्य कर्णस्य वर्गार्धपदं भुजामानं कोटिमानं चेत्याह—कोणगतेऽर्के इति ।

४०a. भुजाकोट्योः स्थानमाह—पूर्वापरेति ।

४०b. द्युमण्डले दक्षिणोत्तरशलाकार्कयोर्विवरगतद्युवृत्तकोटिज्यायां छायाकोटिसाम्यमाह— छायाकोटिसमेति ।

४१. सूर्याधिष्ठितद्युमण्डलभागसमो यो घटिकामण्डलस्य भागस्तद्भाग-दक्षिणोत्तरशलाकयोरन्तरालगतघटिकामण्डलकोटिज्याया नतकालजीवासाम्य-

[1] Mss. read यन्त्रेण. [2] A. C. दगायता for दगायता.

एवं स्थितेऽनुपातात्[1] स्वाहोरात्रार्धमपि च साध्यं स्यात् ॥ ४१ ॥
नतजीवया यदि स्यात् द्युवृत्तकोटिस्तदा कियती ।
त्रिभजीवयेति भवति स्वाहोरात्रस्य चार्धविष्कम्भः ॥ ४२ ॥
स्वाहोरात्रार्धात्[2] स्यात्क्रान्तिः, [3]क्रान्तेर्भुजाधनुरिनः स्यात्[4] ।
तेन युतं चक्रार्धं वोनं वा तेन रहितचक्रं वा[5] ॥ ४३ ॥
दक्षिणकोणच्छायावृद्धौ [6]याम्यं, भवेदयनम् ।

आह—कोटिर्घटिकेति । द्युवृत्तकोटिर्घटिकामण्डलकोटयोरेवं छायाकोटिनतज्याभ्यां साम्ये सति त्रैराशिकात् स्वाहोरात्रार्धविष्कम्भस्य सिद्धिः स्यात् ।

४२. तत्त्रैराशिकमाह—नतजीवयेति । स्वाहोरात्रार्धे विदिते तद्वर्गं त्रिज्यावर्गाद् विशोध्य शिष्टस्य मूलं क्रान्तिः स्यात् । क्रान्तिज्या त्रिज्याहता [7]परमक्रान्तिहृता सूर्यभुजाज्या[8] भवति । अस्या भुजाज्याया धनुरर्को भवति ।

४३. तेन चापेन युतं चक्रार्धं वा रविः, तेन चापेन हीनं चक्रार्धं वा रविः, तेन चापेन रहितं चक्रमण्डलं वा रविः, इत्येतदाह—स्वाहोरात्रार्धादित्यादिना ।

४४-४९. चक्रार्धेऽर्कस्य सूर्यस्य विभागो यो गोलदिग्भ्यां[9] वेद्य इति

[1] Mss. corrupt. A. नुखातान्; C. नुपातान्; E. सितेनुपतान्; D. स्थितेरनुपातात्.

[2] त् missing in Mss. In B. the original reading र्धा crossed out and र्धे written instead.

[3] D. G. क्रान्तिः,

[4] All Mss. except F corrupt; A. B. नोः स्यात्; C. नो स्यात्; D. G. नो स्याः; E. ना स्या.

[5] D. रहितचक्रार्धं वा; F. G. रहितचक्रार्धम् (corrupt).

[6] All Mss. except G. read याम्यो.

[7] A. परक्रान्ति. [8] A. सूर्यभुजाज्या. [9] B. यत्र गोलाभ्यां.

तत्र च्छायाह्रासे सौम्यं, याम्यं तु सौम्यकोणे[1] स्यात् ॥ ४४ ॥
दिवसद्वये[2] निरीक्ष्य छायामेवं प्रकल्पयेदयनम् ।
उदयाद् गोलविभागनिरताभ्यां निश्चीयतेऽत्र सूर्योऽपि ॥ ४५ ॥

[कोणच्छायातः अक्षानयनम्]

अविशेषकर्मणाक्षः[3] साध्यः स्यादुच्यतेऽत्र तस्य[4] विधिः ।
क्रान्तौ किंचित्क्षिप्त्वा तामर्काग्रां प्रकल्पयेदादौ ॥ ४६ ॥
[5]छायाबाहुदिनेशाग्रयोर्युति[6]र्भिन्नयोः, समदिशोस्तु ।
भेदः, शङ्क्वग्रं स्याच्छङ्कुकृतितदग्रवर्गयोगपदम् ॥ ४७ ॥
स्वाहोरात्रेष्टज्या, तया हरेत् त्रिभगुणघ्नशङ्क्वग्रम् ।
लब्धमिहाक्षज्या स्यादक्षगुणात्साधयेच्च लम्बज्याम् ॥ ४८ ॥

अयनगोलयोर्विभागमाह—दक्षिणकोणेति । दिवसद्वये निरीक्ष्य छायाया वृद्धिह्रासौ वेद्यौ । यदा पूर्वापरसूत्रात्सौम्यभागे उदयस्तदा सौम्यगोलगोऽर्कः । अन्यथा याम्यगोलग इति गोले वेद्ये ।

४६-५१. अस्मिन् कोणच्छायाविधानपक्षेऽप्यविशेषकर्मणा साध्यः स्यात् । तत्प्रकारमाह—क्रान्तौ किंचिदिति । एकद्वित्र्यादिसंख्याविशेषेण युतां क्रान्तिमर्काग्रामिति प्रथमं कल्पयेत् । तदर्काग्रच्छायाबाह्वोर्योगादन्तराद्वा[7] शङ्क्वग्रं भवति । शङ्क्वग्रशङ्कुवर्गयोर्योगपदं स्वाहोरात्रेष्टज्या भवति । तया स्वाहोरात्रेष्टज्यया त्रिराशिज्यागुणितं शङ्क्वग्रं हरेत् । तत्र लब्धम् अक्षज्या भवति । अक्षज्यातो लम्बज्या च सिध्यति । पुनस्त्रिज्यागुणितां क्रान्तिं लम्बकेन हरेत् । तत्र लब्धमर्काग्रा भवति । पुनस्तयार्काग्रया छायाबाहुना च

[1] D. G. कोण:. [2] D. G. द्वयं. [3] A. C. D. कर्णार्कः (corrupt).
[4] A. B. C. E. तत्र. [5] E. corrupt छायाबा.
[6] A. C. D. स्थान for युति (corrupt).
[7] A. योगान्तराद्वा, i.e. द missing. [8] A. शङ्क्वग्रं.

त्रिज्यागुणिता क्रान्तिर्लम्बकभजिता भवेदिनाग्रा च ।
प्राग्वच्छायाबाहुभ्रग्राग्राभ्यां[1] गवेश्य[2] शङ्क्वग्रम् ॥ ४९ ॥
शङ्क्वग्रशङ्कुकृत्योर्योगपदं स्याद् द्युवृत्तजेष्टज्या ।
शङ्क्वग्रं त्रिज्याघ्नं द्युवृत्तजीवोद्धृतं पलज्या स्यात् ॥ ५० ॥
लम्बश्च ततः क्रान्तेरर्काग्रा पूर्ववत्पुनश्चैवम् ।
अविशेषान्तं[3] कुर्यादविशिष्टा स्फुटतरा पलज्या स्यात् ॥ ५१ ॥

[मध्यच्छायातः अर्कानयनम्]

[4]मध्यच्छायातोऽपि च साध्योऽर्कः स्यात्पले तु विज्ञाते ।
नतपलधनुषोर्भेदः क्रान्तिधनुः स्याद्रवौ तु याम्यदिशि ॥ ५२ ॥
सौम्येऽर्के तद्योगः क्रान्तिधनुः क्रान्तितो रविः प्राग्वत् ।

[समशङ्कोरर्कानयनम्]

समशङ्कोः शङ्क्वग्रं तद्दिनाग्राऽतोऽपमोऽपमाच्चार्कः[5] ॥ ५३ ॥

योगविशेषवशात् शङ्क्वग्रलब्धिः । शङ्क्वग्रशङ्कुभ्यां प्राग्वत्स्वाहोरात्रेष्टज्या स्यात् । शङ्क्वग्रात् त्रिज्याघ्नात् स्वाहोरात्रेष्टज्यया लब्धमक्षज्या । अक्षतो लम्बकसिद्धिः । लम्बके विदिते क्रान्तितोऽर्काग्रासिद्धिः । पुनरप्येवं कृत्वा अविशेषयेत् । अविशिष्टाक्षज्या स्फुटतरा भवति ।

५२-५३a. मध्यच्छायातोऽप्यर्कः साध्य इत्याह—मध्यच्छायात इति ।

५३b. समशङ्कुतोऽप्यर्कः साध्य इत्याह—समशङ्कोरिति । समशङ्कोर्हि शङ्क्वग्रमर्काग्रा स्यात् ।

[1] A. बाहुर्भ्रग्राग्राज्यां (corrupt).

[2] All Mss. except G. omit च.

[3] A. C. D. corrupt, षान्तव. [4] D. G. मध्ये.

[5] E. पमाच्चार्कः (corrupt).

[भूच्छायाया योजनकर्णानयनम]

[1]अर्काग्रतिदिशि [2]भूमेश्छाया दीर्घा [3]सदा च वृत्ता स्यात् ।
मूले [4]भूसमपरिधिर्गोपुच्छाग्रेण संमिता साग्रे ॥ ५४ ॥
बिम्बं ह्यर्कस्य महत्तस्य करा भूमिपरिधिगा भूमेः ।
श्रुतिरूपेण समन्तात् [5]पतन्त्यतोऽल्पा क्रमेण सा छाया ॥ ५५ ॥
भूव्यासार्धोनरविव्यासार्धं[6] शङ्कुरस्य[7] रविकर्णः ।
छाया, भूदलशङ्कोः केति तदा दैर्घ्यमपि तमसः स्यात् ॥ ५६ ॥
इन्दोः श्रुत्या हीनं भूव्यासघ्नं हरेत्तमोदैर्घ्यम् ।
छायादैर्घ्येण फलं चन्द्रस्थाने तमोव्यासः ॥ ५७ ॥

५४. भूच्छायारूपमाह—अर्काग्रतीति ।

५५. मूलात् क्रमेण हीनव्यासत्वस्य हेतुमाह—बिम्बं हीति । भूपरिधौ पतितः अर्ककरा भूमेः समन्तात् श्रुतिरूपेण पतन्ति । परस्परं क्रमादासन्ना भवन्ति । तस्मात् छायाव्यासस्य क्रमाद्धीनत्वं भवति ।

५६. प्रदीपच्छायातुल्यया छायादैर्घ्यानयनमाह—भूव्यासेति । भूव्यासार्धोनं यत् रविव्यासार्धं तच्छङ्कुः, शङ्कुनदीपोन्नतिरित्यर्थः । रवेर्योजनकर्णस्तस्य शङ्कोश्छाया, शङ्कुप्रदीपान्तरालभूमिरित्यर्थः । भूव्यासार्धमिष्टशङ्कुः । यदि भूव्यासार्धोनरविव्यासार्धशङ्कोः रवेर्योजनकर्णतुल्या छाया, तदा भूव्यासार्धशङ्कोः केति भूच्छायादैर्घ्यलब्धिः ।

५७. इन्दुकक्ष्याप्रदेशे भूच्छायाया व्यासप्रमाणानयनमाह—इन्दोः श्रुत्येति ।

[1] The Mss. read only अर्कप्रतिदिशि ; G. has अर्के ; the emendation is in accordance with the commentary.

[2] A. C. D. भूम्योः (wrong).

[3] D. पदा ; A. C. सदा प्रवृत्ता.

[4] G. only has भू.

[5] E. तप.

[6] All Mss. except E. omit the *anusvāra*.

[7] A. C. E. F. रस्य omitted by haplography.

छायाग्रात्तद्दैर्घ्यान्तरे[1] यदि [2]क्षितिसमस्तमोव्यासः ।
इन्दोः श्रुत्यूनतमोदैर्घ्यान्तरे कस्तदेति युक्तिरिह ॥ ५८ ॥

[बिम्बकलाव्यासानयनम्]

योजनबिम्बं योजनकर्णे, त्रिगुणमिति कलाकर्णे ।
कियदिति लिप्ताबिम्बं तमसः शशिनश्च भानोः स्यात् ॥ ५९ ॥

[रविशशिग्रहणयोर्भेदः]

स्वाधःस्थितेन्दुना [3]यच्छादनमर्कस्य भवति तद् ग्रहणम् ।
प्रतिदेशमतो भिन्नं छादितमानं रवेस्तथा कालः ॥ ६० ॥
तमसि प्रवेश इन्दोर्ग्रहणं [4]स्व(? स्यात्)तुल्यमेव सर्वेषु ।
देशेषु, ततश्छादितमानं चन्द्रस्य भवति कालोऽपि ॥ ६१ ॥

[लम्बनयोजनानयनम्]

रविशशिनावेककलास्थावपि भूपृष्ठसंस्थितैर्मनुजैः ।
ऊर्ध्वाधःस्थौ प्राच्यां पश्चिमदिशि च प्रदृश्येते ॥ ६२ ॥

५८. तत्त्रैराशिकमाह—छायाग्रादिति ।

५९. सूर्येन्दुतमसां बिम्बलिप्तानयने त्रैराशिकमाह—योजनबिम्बमिति ।

६०. सूर्यग्रहणस्य स्वरूपमाह—स्वाध इति ।

६१. चन्द्रग्रहणस्य स्वरूपमाह—तमसीति ।

६२. रविशशियोगे दृग्भेदः संभवतीत्याह—रविशशिनोरिति ।

[1] Mss. have only दै for द्दै.

[2] A. C. D. E. क्षितितमा.

[3] G. यत् left out.

[4] G. स्व left out.

भूमध्यं ग्रहकक्ष्यामध्यं, दृक्ष्या कुपृष्ठगश्च यतः ।
तत्र तयोर्यद्विवरं तद्धि तयोर्लम्बनान्तरमितं स्यात् ॥ ६३ ॥
दृङ्मण्डलं तु विहगाभिमुखं [1]दृक्पृष्ठमध्यमिह भवति ।
[2]दृक्क्षेपर्क्षाभिमुखं तद्वद् दृक्क्षेपमण्डलं प्रोक्तम् ॥ ६४ ॥
क्षितिजं भूपृष्ठसमं दृङ्मण्डलमध्यगं कुपृष्ठे स्यात् ।
तत्क्षितिजेऽर्के शङ्कुः शून्यस्त्रिज्यामितः खमध्यगते ॥ ६५ ॥
एवं कुपृष्ठशङ्कुः, [3]कुमध्यशङ्कुर्हि गणितसिद्धः स्यात् ।
भूपृष्ठमध्यशङ्क्वोर्विवरं खेटस्य लम्बनं गदितम् ॥ ६६ ॥
योजनशङ्क्वोर्विवरं भूव्यासार्धेन तुलितमुदये स्यात् ।
शून्यं खमध्यगेऽर्के तस्माद् [4]दृग्ज्यावशात् कल्प्यं तत ॥ ६७ ॥

६३. दृग्भेदे हेतुमाह—भूमध्यमिति । ग्रहकक्ष्यादृङ्मण्डलयोर्भेदात् दृग्भेदः स्यादित्यर्थः ग्रहयोर्लम्बनकलान्तरतुल्यो दृग्भेद इत्याह—तत्रेति ।

६४. दृङ्मण्डलस्य दृक्क्षेपमण्डलस्य च संस्थानमाह—दृङ्मण्डलं त्विति । दृङ्मण्डलं दृक्क्षेपमण्डलं च भूपृष्ठमध्यमित्यर्थः । ग्रहकक्ष्या तु भूमध्यमध्या, इति भेदः ।

६५a. कुपृष्ठे क्षितिजमाह—क्षितिजं भूपृष्ठेति ।

६५b-६६a. दृङ्मण्डलगतभूपृष्ठशङ्कोरुत्पत्तिमाह—तत्क्षितिजे इति । गणितानीतः शङ्कुर्मध्यगतः स्यात् । तस्य दृग्ज्यायाः त्रैराशिकात् शङ्क्वोरन्तरं वेद्यम् ।

६६b. ग्रहस्य लम्बनस्वरूपमाह—भूपृष्ठमध्येति । भूपृष्ठे यः शङ्कुः भूमध्ये च यस्तयोश्चापितयोर्विवरं ग्रहस्य लम्बनं लिप्तात्मकं भवति ।

६७. शङ्क्वन्तरस्य त्रैराशिकसाध्यत्वमाह—योजनेति ।

[1] Mss. read दृक्. [2] A. C. D. दृक्क्षेपार्काभिमुखं.

[3] D. कुमध्य left out by haplography; G. कुमध्य (corrupt).

[4] B. दृग् left out.

भूव्यासार्धमितं चेत् त्रिगुणेन तदेष्टदृग्ज्यया तु कियत् ।
इति खगकक्ष्यायां तु [1]स्याद्विवरं शङ्कोस्तु योजनात्मकयोः ॥६८॥

एककलास्थखगानां सर्वेषां लम्बयोजनं तुलितम् ।
लम्बनलिप्ता भिन्नाः [2]कक्ष्याभेदात्तथापि सर्वेषाम् ॥ ६९ ॥
लम्बनलिप्ताविवरं यत्तत्तुलितं [3]तु खेटयोर्विवरम् ।
कक्ष्याल्पत्वादधिकाः शीघ्रगतेर्लम्बनकलाः स्युः ॥ ७० ॥

[लम्बनसंज्ञा]

हीनः कुपृष्ठशङ्कुर्दृङ्मण्डलतो[4] यतोऽत्र कक्ष्यास्थात् ।
शङ्कोर्लम्बनसंज्ञा शङ्कोर्विवरस्य कथ्यते तस्मात् ॥ ७१ ॥

[लम्बननत्योरानयनम]

कर्णात्मकमिदमुक्तं लम्बनमस्यैव बाहुभागभवम् ।

६८. ग्रहकक्ष्यागतशङ्कोर्विवरयोजनानयने [5]त्रैराशिकमाह—भूव्यासार्धमितमिति ।

६९. एकत्र गतानां ग्रहाणां लम्बनयोजनानि तुल्यानि स्युः। तेषां लम्बनकला भिन्ना एवेत्याह—एककलेति ।

७०. [6]ग्रहयोर्लम्बनलिप्तान्तरतुल्यं व्योम्नि दृश्यमानान्तरयोरेककलास्थयोर्विवरमित्याह—लम्बनलिप्तेति ।

७१. ग्रहयोर्विवरस्य लम्बनसंज्ञायां हेतुमाह—हीन इति । भूमध्यात्, भूमध्यनिरीक्षितग्रहात्, भूपृष्ठग्रहस्याधोगतत्वादित्यर्थः ।

७२-७३. शङ्कोरन्तरजातमिदं लम्बनं कर्णात्मकं स्यात् । अस्य

[1] E. स्यात् left out. [2] E. कक्ष्या left out. [3] G. हि.
[4] A. B. C. E. मण्डलगो. [5] A. adds तत् before त्रै.
[6] A. This sentence is left out by haplography.

संस्क्रियते पर्वान्ते [illegible] कोटिभागभवा ॥ ७२ ॥
दृग्ज्याश्रुतेर्हि कोटिदृक्क्षेपा दृग्गतिर्भुजा तस्याः ।
नतिलम्बने च ताभ्यां ग्रहणे भानोरतः [1]प्रसाध्येते ॥ ७३ ॥

[लम्बननत्योः विपरिणामः]

[illegible]शशिनोः षष्टिघ्नं लम्बनलिप्तान्तरं कलाभुक्त्योः ।
[illegible] हरेल्लब्धं घटिकाख्यं लम्बनं विनिर्दिष्टम् ॥ ७४ ॥
स्फुटयोजनकर्णे चेदियत्कियत्स्यात्तदा कलाकर्णे[2] ।
इति लम्बनलिप्ताभिः त्रिज्यातुलितो हि लिप्तिकाकर्णः ॥ ७५ ॥
[illegible] दृक्क्षेपज्या स्याद् दृक्क्षेपलग्नगे खेटे ।
दृक्क्षेपसिद्धलम्बनमेव नतिः सर्वदापि खेटस्य ॥ ७६ ॥

[illegible] [illegible]भागादुत्पन्नं लिप्तात्मकं लम्बनं ग्रहस्य नतिर्भवतीत्याह—
[illegible]मिति । कर्णात्मकस्य लम्बनस्य साधनं दृग्ज्या स्यात् ।
[illegible]र्णस्य भुजा दृग्गतिज्या । दृक्क्षेपज्या कोटिः । अतो [दृग्गति] दृक्क्षेपज्याभ्यां [3]लम्बनघटिनतिकले साध्येते इत्याह ।

७०. दृग्ज्याश्रुतेः(?) लम्बनघटिकानयनमाह—[illegible]शशिनोरिति ।

७५. लम्बनलिप्तानयने त्रैराशिकमाह—स्फुटयोजनेति । सर्वास्वपि [illegible] लिप्तिकाकर्णः त्रिज्यातुलितः स्यात् ।

[illegible]लग्नगे [4]खेटे [illegible] दृग्ज्या सा दृक्क्षेपज्या स्यात् । [illegible]दृग्ज्यातः सिद्धा लम्बनकलैव नतिः स्यादित्याह— दृग्ज्यैवेति ।

[1] [illegible] साध्येते.
[2] [illegible] common corruption [illegible]. [illegible] second letter [illegible] reviser [illegible] red off the vowel sign [illegible] to the [illegible]
[illegible] correct, दृक्स्थाक्षेपज्या.

वृत्ते [1]ह्यभीष्टदृग्ज्याकर्णे कोटिः सदापि दृक्क्षेपः ।
नतिसाधनं सदातो दृक्क्षेपज्यैव भवति खेटस्य ॥ ७७ ॥
भूमध्यपृष्ठशङ्कोर्मण्डलभेदाद्यथात्र[2] दृग्भेदः ।
मध्यस्फुटयोः कक्ष्याप्रतिमण्डलभेदतस्तथा भेदः ॥ ७८ ॥
लङ्कोदयप्रमाणानयने[3] विधिर्विलिख्यतेऽजादेः[4] ।
क्षेत्रे दोर्ज्या कर्णोऽत्रेष्टद्युज्या भुजापमः कोटिः ॥ ७९ ॥
त्रिज्याकर्णस्य भुजा परमद्युज्या यदीष्टकर्णस्य ।

दृक्क्षेपलग्नादन्यतः स्थितस्य खेटस्य दृक्क्षेपज्यावशात् कथं शङ्कोः नतिर्भवतीति शङ्कां परिहरति— वृत्ते ह्यभीष्टेति ।

७८. भूमध्यभूपृष्ठशङ्कोः यथात्र वृत्तभेदात् दृग्भेदः संभवति, तथा मध्यमस्फुटयोरपि कक्ष्याभेदाद् भेदो भवतीति स्फुटयुक्तिं संक्षेपेण प्रदर्शयति— भूमध्येति । भूमध्यमध्यायां कक्ष्यायां मध्यमचारः, ततो भिन्नकक्ष्यायां स्फुटचारः[5], तस्मादित्यर्थः ।

[लग्नानयनम्]

७९. लङ्कोदयप्रमाणानयनाय त्रैराशिकसिद्ध्यर्थं तदादिता(? श्रितं) क्षेत्रस्वरूपं प्रदर्शयति—लङ्कोदयेति । तस्मिन् क्षेत्रे इष्टभुजाज्या कर्णः स्यात् । दोर्ज्यान्तगतद्युमण्डले[6] इष्टज्या बाहुः इष्टक्रान्तिः कोटिः । एतदुक्तं भवति—पूर्वापरस्वस्तिकयोरुन्मण्डलास्त[7] [8]प्राप्तिकाले अपमण्डलगतेष्टभुजान्ताद् उन्मण्डलास्तापमण्डलज्या कर्णः । तद्भुजान्तात्तद्गतद्युवृत्ते उन्मण्डलान्ता द्युज्या भुजा । तद्द्युवृत्तपूर्वापरस्वस्तिकयोरन्तराले उन्मण्डलगता क्रान्तिज्या कोटिरिति ।

८०-८१. तत्त्रैराशिकमाह—त्रिज्येति । त्रिज्यातुलितदोर्ज्याकर्णस्य

[1] G. ह्य for ह्य.
[2] D. G. यतोऽत्र.
[3] D. G. नेऽपि.
[4] E. जादौ
[5] Mss. corrupt. A. चारित; B. चारंस्त.
[6] A. extra ति here.
[7] A. अस्त omitted.
[8] B. प्राप्त.

दोर्ज्यामितस्य केति स्वाहोरात्रेष्टजीवका भवति ॥ ८० ॥
इयती यदि द्युवृत्ते त्रिज्यावृत्ते[1] तदा कियती ।
इति कालज्या, तद्धनुरसवो बाहूदये निरक्षे स्युः ॥ ८१ ॥
[a]शशिकृतशशिरामघ्ना द्युज्यासदलोद्धृतेष्टबाहुज्या ।
चापीकृता निरक्षे बाहोरुदयासवोऽत्र हीत्युक्तम् ॥ ८२ ॥
[2]इष्टर्क्षस्याद्यन्तप्रमाणभेदो ह्यभीष्टराशिमितिः ।
स्वचरार्धोनयुता[3] सा मृगकर्क्याद्योः [4]स्वदेशराशिमितिः ॥ ८३ ॥
उदगुन्नतं भगोलं तस्माच्छीघ्रं मृगादिका यान्ति ।
उदयं शनैस्तु कर्कटकाद्यास्तस्माच्चरार्धविधिरेवम् ॥ ८४ ॥

परमद्युज्या हि भुजा । तदेष्टदोर्ज्यातुलितकर्णस्य का भुजेतीष्टद्युज्यालब्धिः । यदीष्टवृत्ते इयती ज्या तदा व्यासार्धमण्डले कियतीति घटिकामण्डलज्यालब्धिः । तच्चापलिप्ताः असवो भवन्ति । निरक्षदेशे इष्टबाहुभागस्योदयासवस्ते स्युः ।

८२. एवं ह्यत्रोक्तमित्यनुवादरूपेणैतत्कर्म च प्रदर्शयति—**शशिकृतेति**। त्रिज्यात्रैकत्र हारः । स एवान्यत्र गुणकारः । ततस्ताभ्यां विना कर्म क्रियते । भुजाभागस्योदयप्रमाणं ह्यत्रोक्तम् ।

८३a. इष्टराशिप्रमाणानयने पुनर्विशेषमाह—**इष्टर्क्षस्येति** ।

८३b. चरदलसंस्कारेण स्वदेशोदयमानानयनमाह—**स्वचरार्धेति** ।

८४. मृगादौ चरदलशोधनस्य, कर्क्यादौ तत्क्षेपणस्य च हेतुं प्रदर्शयति—**उदगुन्नतमिति** । क्षितिजस्य उदङ्नीचत्वादुदगन्ताः **शीघ्रम्**, अन्ये राशयः शनैरित्यर्थः ।

[1] E. त्रिज्यावृत्ते omitted by haplography.

[2] A. C. common corruption; A. इष्टस्यान्त; C. इ, then gap; G. इष्टक्षस्याद्यन्त. [3] G. मिता. [4] D. चोस्य.

[a] शशाख्यादि 3141.

[अयनचलनम्]

अयनचलनस्य[1] मानज्ञानाय विलिख्यतेऽथ चोपायः ।
छायाप्रसाधितो यः सूर्यस्तत्कालगणितसिद्धश्च ॥ ८५ ॥
योऽर्कस्तयोस्तु विवरं तत्काले प्रोच्यतेऽयनचलनमिति ।
भवति च यस्मिन् काले याम्योदग्गतिनिवृत्तिरर्कस्य ॥ ८६ ॥
अयनान्तस्य च तत्कालेऽर्कस्य च विवरमयनचलनं स्यात् ।
शङ्कुं कृत्वात्युन्नतमचल[2]स्तम्भादिकं प्रभां तस्य ॥ ८७ ॥
ईक्षेत गमनकाले चागमकाले च गणितविद् भानोः ।
अर्कस्य गमनकाले यस्मिन् काले त्वभीष्टबिन्दुगतम् ॥ ८८ ॥
छायाग्रमागमेऽपि च तद्बिन्दुगतं यदा प्रभाग्रं स्यात् ।
[3]तत्कालद्वयभवयोः [4]स्फुटभान्वोर्योगदलसमोऽर्कः स्यात् ॥ ८९ ॥

८५-८६a. अथ तत्कालेऽयनचलनज्ञानोपायमाह—अयनचलनस्येति । छायाप्रसाधितः सममण्डलच्छायया मध्यच्छायया वा प्रसाधितः ।

८६b-८७a. प्रकारान्तरेण चाह—भवति चेति । तत्काले, अर्कस्य याम्यगतिनिवृत्तिकाले, साधितस्य वा उदग्गतिनिवृत्तिकाले साधितस्य वार्कस्य, अयनान्तस्य, राशिनवकस्य राशित्रयस्य वा ।

८७b-९०. याम्योदग्गतिनिवृत्तिकालज्ञानोपायमाह—शङ्कुमिति । अत्युन्नतं दीपस्तम्भं ध्वजस्तम्भं वा देवालयोर्ध्वभागस्थापितबालकूटं वा भूमौ स्थापितवेण्वादि वा शङ्कुमिति प्रकल्प्य तस्य छायामीक्षेत । अचलं, सदा स्थिरं, दीपस्तम्भादि तस्येत्यर्थः । भानोर्गमनकाले, पूर्वापरसूत्रमतिक्रम्य दक्षिणां दिशं प्रति, उत्तरां दिशं प्रति वा गमनकाले छायामीक्षेत । तथा भानोरागमनकाले पूर्वापरसूत्रं प्रत्यागमनकाले च छायामीक्षेत । भूमौ दक्षिणोत्तरां कांचिद्रेखां विलिख्य तस्यां स्थितं छायाग्रमीक्षेतेत्यर्थः । गमनकाले यदा रेखायां छायाग्रं भवति तस्मिन् काले तच्छायाग्रे बिन्दुं कुर्यात् । तत्काले

[1] G. स्य omitted. [2] G. लं for ल. [3] F. reads तत्कालस्फुटद्वय.
[4] All Mss. other than F. corrupt; G. has भासोः for भान्वोः.

यस्मिन् काले तस्मिन् काले हि गतिनिवृत्तिरर्कस्य ।
ऋणमथवा धनमिति च प्रकल्प्यते तद्धि [1]गणितयुक्तिविदा ॥ ९० ॥

[ग्रन्थोपसंहारः]

समरेखायाः पश्चादष्टादशयोजनान्तरे[2] ग्रामे ।
[a]स्वरकृतषट्तुलिताक्षे वसता शाकेऽ[b]क्षषट्त्रिचन्द्रमिते ॥ ९१ ॥
परमेश्वरनाम्नेयं वदनभुवा **गोलदीपिका** रचिता ।
तिष्ठतु गणकवराणां द्विजमुख्यानां [3]हृदालये सुचिरम् ॥ ९२ ॥

इति गोलदीपिकायां चतुर्थोऽध्यायः

गोलदीपिका समाप्ता

स्फुटार्कं च कुत्रचित् स्थापयेत् । पुनरागमनकाले च यस्मिन् काले तस्मिन्नेव बिन्दौ तच्छायाग्रं भवति, तत्काले गणितसिद्धं स्फुटार्कं च कुत्रचित् स्थापयेत् । एवं स्थापितयोरर्कयोर्योगस्य दलं यत् तेन तुल्यः स्फुटार्को यस्मिन् काले भवति, तस्मिन् काले अयननिवृत्तिर्भवेत् । यद्यागमनकाले पूर्वबिन्दौ छायाग्रं न संभवति, तथापि तद्दिने पूर्वदिने परदिने च तस्यां रेखायां छायाग्रस्य स्थितिं ज्ञात्वा तदन्तरवशात् छायाग्रस्य पूर्वबिन्दौ [4]प्रवेशकालः कल्प्यः । यद्यवनान्तगतार्कात् प्रागेव याम्योत्तरगतिनिवृत्तिस्तदायनचलनं धनं स्यात् । अन्यथा ऋणं स्यात् । एतद् युक्त्या सिध्यति ।

९१-९२. अथ स्वाश्रितदेशं तत्काले शककालं च प्रदर्शयन्नुपसंहरति —समरेखाया इति ।

इति गोलदीपिकाविवृतिः[5] समाप्ता

---

[1] A. B. C. E. गणक

[2] F. breaks off here.

[3] A. C. common corruption, ग for ह.

[4] B. प्रवेशः कालः.

[5] A. वृत्तिः.

[a] स्वरेत्यादि 647.

[b] अक्षेत्यादि 1365.

CHAPTER I

Introduction

1. I bow to Vināyaka (the Lord of Obstacles), the elephant-faced child, sitting on the lap of Pārvatī (daughter of the mountain), at the foot of the Kalpa (all-giving) tree and absorbed in suckling at her breast.

2. Parameśvara, the Bhārgava (of Bhṛgu's *gotra*), residing on the sea coast on the northern bank of the Nilā river,[1] sets forth in brief the nature of spherical astronomy for the benefit of the young.

Construction of the armillary sphere

3a. A circle[2] kept [vertically, and therefore] extending from below upwards, [and placed] in the north-south direction is [to represent] the Solstitial Colure (*Dakṣiṇottara*).

3b. Another [similar] vertical circle [fixed] at the [upper and lower] middle [points] of the first, [and turned to] the east-west direction, is the Equinoctial or Celestial Equator (*Ghaṭikā-maṇḍala*).

4a. Still another circle [*viz.*, the Equinoctial Colure] is [fixed] around these, cutting them at right

[1] This river is well known locally as Bhāratappuzha and flows through central Kerala, falling into the Arabian Sea a little to the south of Calicut (Kozhikode).

[2] The commentator says that the circle is to be constructed with bamboo strips, etc.

angles and making crosses (*Svastika-s*)[1] at the four cardinal points.

4b. These three are called *Viṣuvad* circles.

4b-5a. Of these the Celestial Equator is divided into 60 equal divisions, and the other two into 360 divisions.

5a-6a. Another similar circle is fixed passing through the east and west crosses and inclined at 24° north and south of the zenith and nadir. This is the Ecliptic (*Apama-vṛtta*).

6b-7a. Construct across the Solstitial Colure on either side of the Celestial Equator, (*Ghaṭikāvṛtta*) and parallel to it, at the required declinations, several diurnal circles (*Ahorātra-vṛtta-s*), of different magnitudes.

7b-8a. The orbits of the Moon and other [Planets] are [then to be constructed] crossing the Ecliptic at the Planets' two nodes [*Pāta-s*] and diverging from it [north and south] by their maximum latitudes at three Signs [i.e., 90°] from these nodes.

8b. Through the north and south crosses formed by the intersection of the Equinoctial and the Solstitial Colures, the central axis [of the armillary sphere] is then inserted.

9a. The sphere thus formed is called the Starry sphere (*Nakṣatra-gola* or *Bha-gola*).

9a-10a. The Celestial sphere (*Kha-gola*) is constructed outside this.[2] Herein too, [three circles

[1] The four cardinal points and the zenith and the nadir are called the six *Svastika-s* on the globe.

[2] An inner Starry sphere and an outer Celestial sphere are conceived in the armillary sphere according to Indian astronomy

corresponding to] the *Viṣuvad* circles [are to be constructed] as before. Of these the horizontal circle is [termed] the Horizon (*Kṣitija*); the east-west circle is [termed] the Prime Vertical (*Sama-maṇḍala*); and the third is the north-south circle or Meridian (*Dakṣiṇottara*).

10b. A [model] Earth is [then] to be constructed with clay, etc., in the shape of a sphere, and placed at the centre of [the axis of] the armillary sphere.

11a. The situation of the armillary sphere is like this at places of zero-latitude.

11a-12a. At any other required place, however, two holes are made in the Celestial sphere at a distance equal to the latitude [of the place],[1] below and above, respectively, the south or north crosses and the axis of the Starry sphere is made to pass through them.

12b-13a. A circle termed *Unmaṇḍala* is now constructed [and fixed] so as to pass through the two ends of the axis and the east and west crosses. This will be the situation of the spheres at the desired place.

13b. Two pieces of reed (*śara-daṇḍikā-s*) are fitted [on the axis] between the two spheres to keep them in position.

14. The Starry sphere revolves constantly westwards, blown by the Pravaha wind. The Celestial sphere, however, remains stationary; it is constructed in order to reckon directions, etc.

to facilitate comparative measurements of the former with reference to the latter. See below, verse 14.

[1] *Pala-jyā*, here, as also elsewhere below, means only the latitude, *akṣa*, and not sine latitude, *akṣa-jyā*.

15. To measure the sine and cosine of the latitude, some construct a diurnal circle [with a radius equal to the sine latitude, *akṣa-jyā*,], with [a point on] the central axis as the centre and just touching the horizon. Here the ***Bhū-jyā*** (i.e., sin. decl. tan. lat.) is sine latitude and the sine declination is cosine latitude.

Thus, in *The Light of Spherical Astronomy*,
is the First Chapter entitled
"Construction of the Armillary Sphere"

CHAPTER II

Diurnal motion of Planets

1. The Sun is constantly moving eastwards along the Ecliptic; still on account of the more rapid [westward] rotation of the [Starry] sphere [of which it also forms a part], it [appears] to move westwards.

2. The Starry sphere, impelled by the Pravaha wind, keeps rotating westwards round the Earth in the *pradakṣiṇa* (clockwise) direction once in 60 *ghaṭikā-s*

3. Above the surface of the Earth, at a height equal to 12 *yojana-s*, the Pravaha wind blows with a constant westward motion. Below it (i.e., up to a height of 12 *yojana-s*) is the terrestrial wind; [the direction of] its motion is diverse.

4. By *ghaṭikā* (or *nāḍikā*), is meant the time required for the rotation [of the Celestial Equator] through its one-sixtieth part, and not one-sixtieth of

the duration of a [Sāvana] day,[1] for the day is [a little] longer[2] than the time of rotation of the [Starry] sphere.[3]

5. The horizon is the horizontal circle around the Earth. Planets become visible when they rise above it. Planets below it are not seen, being hidden by the body of the Earth.

6a. Thus is it said in the ancient texts.

6a-b. [However,] only those Planets which rise above [the level of] the Earth's surface [*viz.*, the visual or sensible horizon] are seen by us; and those below [the level of] the Earth's surface are not visible.[4]

7-8a. Since the Sun is on the Ecliptic [which is inclined to the Celestial Equator], it rises [a little] to the north or south [of the central point, *viz.*, due east] according to its position; it also sets accordingly.[5] The Moon and other [Planets] move further north or south than the Ecliptic due to their Celestial latitude (*vikṣepa*).

8b. In places having [north] latitude [i.e., north of the terrestrial equator], the Planets reach the centre

[1] The Sāvana day is from sunrise to sunrise.

[2] The difference between a Sāvana day and a Nākṣatra day is about 10 *vināḍikā-s* or 4 minutes.

[3] That is called the Siderial (Nākṣatra) day.

[4] The difference in the position of Planets viewed from the surface of the Earth and from the centre of the Earth is termed *Lambana* or Parallax. See below, Ch. IV.

[5] The angle subtended by the east or west point and the point of rising or setting, respectively, is called the amplitude. See below, verse 14.

of the heavens [*viz.*, the Celestial Meridian] at a more southerly position than at their rising.[1]

9. The Sun on the eastern *Unmaṇḍala* reaches the western *Unmaṇḍala* in 30 *nāḍikā-s*, and from there in an equal length of time it reaches the eastern [*Unmaṇḍala*].

10. Here by *ghaṭikā* (*nāḍikā*) is meant one-sixtieth of the [Sāvana] day. This will be its connotation elsewhere than in the case of the rotation of the Starry sphere.

11-12. Rising and setting take place on the horizon. In the northern [hemisphere] the horizon is below the *Unmaṇḍala*. Hence [when the Sun is] in the northern hemisphere, the day will be more than 30 *ghaṭikā-s*. In the southern [hemisphere] the horizon is above the *Unmaṇḍala*; and so, here, the day is less than 30 *ghaṭikā-s*. At all places, as the day increases, night becomes shorter, and as it shortens, the night grows longer.

13. At places of zero-latitude [i.e., on the equator], the day is [always] 30 *ghaṭikā-s*, and so also the night, since there the *Unmaṇḍala* itself is the horizon.

Definition of Sine Amplitude, etc.

14a. Sine Amplitude (*Arkāgrā*) is the distance in the shape of the sine of the point from where the Sun

[1] This is generally known as 'Southing'. For places south of the equator, however, the deflection will be to the north. This phenomenon for the southern hemisphere is not envisaged by Indian astronomers and hence 'Northing' is not separately described here.

touches the horizon [i.e., points of rising and setting] to the east-west line.[1]

14b. The *Astodaya-sūtra* or the line of rising and setting, is the east-west line joining the two points [of rising and setting, respectively].

15-16a. Sine Declination (*Krāntijyā*) is the sine of the [angular] distance between the point where the Sun touches the *Unmaṇḍala* and the east or west point (*Svastika*). Let this be the *Bhujā* (altitude). Let the radius of the diurnal circle on which the Sun is, *viz.*, cos. declination (*Dyu-dala*) be the *Koṭi* (base); the radius of the sphere will [then] be the hypotenuse (*Karṇa*) of this right-angled triangle.

16b. The circle along which the position of the Sun moves is called the Diurnal Circle (*Dyuvṛtta*).

17. The sine of the [arc of the] diurnal circle between the horizon and the *Unmaṇḍala* is called *Kṣitijyā*. Let it be the *Bhujā*. Let sine declination be the *Koṭi* here. Then sine amplitude will be the hypotenuse; these three make a [right-angled] triangle.

The true eastward motion of Planets

18-19. The Sun on the Celestial Equator at Laṅkā moves in the heavens westwards along the Prime Vertical, and so also at all places on zero-latitude.

[1] This angle of amplitude is subtended at the centre of the Earth (or the Earth's surface, which makes little difference) by the point of rising or setting and the east or west point respectively. At the equator it is equal to the declination and at other places it is a function of the declination and the latitude of the place: sine amplitude = sin. decl. sec. lat.

The same [Equinoctial] Sun moves around along the horizon at Meru. At other places it moves between the zenith and the horizon according to the latitude [of the place].

20-21. The stars are stationary. Below them are, in order, Saturn, Jupiter, Mars, the Sun, Venus, Mercury and the Moon, all moving eastwards by their individual motion, and westwards with reference to [places on zero-latitude, like] Laṅkā, due to the rotation of the entire Starry sphere, in the same manner as insects on a potter's wheel moving in a direction opposite [to that of the wheel].

22. The [distance in] *yojana-s* covered per day by all Planets, whether high or low, [i.e., distant or near] in their easterly motion is the same. But their motion in terms of minutes of arc is diverse.

23-24. The orbit of a Planet which is low down is small and that of one high up is great. The number of minutes, degrees and Signs is the same in both small and big circles. Moving along a smaller circle, a Planet completes its circle in a shorter time, and moving along a bigger circle [completes it only] in a longer period. Hence the number of minutes covered in a day varies [from one Planet to another].

[Objection]

25. All the Planets are seen moving only westwards. This being the case, by what reasoning is their easterly motion presumed?

[Answer]

26. The Moon [seen] in conjunction with the *Aśvinī* constellation, is seen the next day in [conjunction with] *Bharaṇī*.[1] Mars and other Planets also behave in the same way. Their easterly motion is determined from this.

[Objection]

27. The Moon is slow; Saturn moves fast; and the stars are faster still. All move westwards. [If we suppose thus, then also will they behave as stated in verse 26]. So argue some.

[Answer]

28. We assert, however, that this [explanation], too, is wrong, because a retrograde Planet in *Kṛttikā*[2] is seen a few days later in *Bharaṇī* which is to its west, and not in an easterly position.

Position of the Moon in relation to the Sun

29. In the statement of the sages that the Moon is above the Sun, it is not the visible Moon that is envisaged; there a distinct Moon-deity is to be presumed.[3]

[1] The *Aśvinī* constellation is called *Dasra*, because it is presided over by the Aśvins, also called *Dasrau*. *Bharaṇī* is called *Yāmya* because its presiding deity is Yama, the God of death.

[2] The God *Anala* (Fire) is the presiding deity of *Kṛttikā*.

[3] The reference is to Upanisadic statements like the description of the 'Path of the Gods' (*Devayāna*) in the *Chāndogya Upaniṣad*: *Ādityāc candramasam, candramaso vidyutam . . . Brahma gamayati. Eṣa devayānaḥ panthāḥ*, etc. (IV. 15. 5). Śaṅkara in his *Brahmasūtra-bhāṣya* IV. 3. 4 says that distinct deities are to be presumed in cases like these.

30. It is stated by those sage-authors of the Purāṇa-s that the stars are above the Planets; above them are the Seven Sages (the Great Bear), and above them the Pole.

These statements necessarily mean that the Narāyaṇa and Nīlakaṇṭha had found a common interest in astronomy in which discipline they held fruitful discussions. One of the results of these discussions was the *Āryabhaṭīya-Bhāṣya*, though Nīlakaṇṭha actually commenced writing the *Bhāṣya* only after the demise of Nārāyaṇa. To have been the teacher and patron both of Nīlakaṇṭha (1444-1545) and of Śaṅkara (1500-60), Nārayaṇa should have lived to a grand old age, from about A.D. 1435 to 1535.[1]

3. *Jyeṣṭhadeva* (A.D. 1500-1610)

As noted earlier, in the concluding verses of the different chapters of his *TS Com.*, Śaṅkara states that he had presented in the preceding verses the matters set out by a 'brāhmin of the Parakroḍa family.' *Cf.*, for instance :

---

1. A post-colophonic statement in Malayalam to certain manuscripts of Śaṅkara's *Laghu.* on *TS* says, as noted earlier, that that work 'had been composed with care for the sake of Āzhvāñceri' (*Āzhāñcerikku veṇṭiṭṭu sukhame śikṣiccu camaccu*) (see above, p. l). While the expression *Āzhvāñceri* naturally stands for *Āzhvāñceri Tamprākkaḷ*, it need not necessarily stand for the elder Āzhvāñceri Tamprākkaḷ, *viz.*, Śaṅkara's teacher Nārāyaṇa, who, for reasons stated above, should have passed away by A.D. 1535, long before Śaṅkara composed the *Laghu.* in about 1556. The 'Āzhvāñceri' meant here should, therefore, be his successor who continued to extend to Śaṅkara the patronage which his predecessor had been extending to him.

इत्येष परकोडावासद्विजवरसमीरितो योऽर्थः ।
स तु तन्त्रसंग्रहस्य प्रथमेऽध्याये मया कथितः ॥

(*TS Com.*, I. 821, p. 77)

It has also been noted that the 'brāhmin' referred to was a Namputiri of the Paraṅṅoṭṭu family, by name Jyeṣṭhadeva, and the expression *samīrito yo'rthaḥ*, 'the meaning expounded' referred to his Malayalam work *Yuktibhāṣā*. While the verse quoted above does not warrant Śaṅkara being a formal disciple of Jyeṣṭhadeva, the intellectual indebtedness of Śaṅkara to *Jyeṣṭhadeva* is explicit in the paraphrasing of substantial sections of the Malayalam *Yuktibhāṣā* in his Sanskrit *Yuktidīpikā* (*TS Com.*), which Śaṅkara dutifully acknowledges in the verse extracted above.

The *Yuktibhāṣā*, which has been referred to earlier in several contexts, is an elaborate treatise in two Parts, devoted, respectively, to the logical elucidation of Mathematics and Astronomy, and is perhaps, one of the most instructive texts of the type produced during mediaeval times.[1] Another work attributed to Jyeṣṭhadeva is the *Dṛkkaraṇa*, a comprehensive astronomical manual in Malayalam verse. It is divided into ten sections called *paricchedas* and gives the date of its composition in its concluding line as :

Kolambe 'barhisūnau' vihagagatiyatum nokki ittham camappū /

'Compute thus substracting the planetary positions given for the Kollam year *barhisūnu* (783) (=A.D. 1607-8).

An old astronomical document in palmleaf, written in Malayalam script, at the end of a manuscript of a Malayalam commentary on *Sūryasiddhānta*, preserved in the Oriental Institute, Baroda, (No. 9886)[2]

---

1. While Part I of this work has been edited with detailed Notes by Rama Varma Maru Thampuran and A.R. Akhileswara Iyer (Trichur, 1948), an edition of Part II with Notes is in preparation by the present editor.

2. For an edition and study of this interesting document which gives the names and records the writings of several Kerala astronomers, see, K.V. Sarma, 'Direct lines of astronomical tradition in Kerala', *Charudeva Shastri Felicitation Volume*, (Delhi, 1973), 601-4.

contains some welcome information about our author. The relevant passage reads ;

पूर्वोक्तस्य दामोदरस्य शिष्यः ज्येष्ठदेवः। इद्देहं परङ्ङोट्टु-नम्पूतिरियाकुन्नू। युक्तिभाषा-ग्रन्थत्ते उण्टाक्कियतुं इद्देहं तन्ने।

ज्येष्ठदेवन्टे शिष्यन् तृक्कण्टियूर अच्युतपिषारटि। इद्देहं स्फुटनिर्णयं, गोलदीपिका मुतलाय ग्रन्थकर्तावाकुन्नू।

'Jyeṣṭhadeva is the disciple of Dāmodara mentioned earlier. He is a Nampūtiri of Paraṅṅoṭṭu (family). It was he who composed the work *Yuktibhāṣa*.

'Tṛkkaṇṭiyūr Acyuta Piṣāraṭi is the pupil of Jyeṣṭhadeva. He is the author of *Sphuṭanirṇaya, Goladīpikā* and other works.'

Apart from corroborating some of the information gleaned from other sources, the above-quoted document provides some additional details. Thus, the astronomer Dāmodara, teacher of Nīlakaṇṭha, was the teacher also of Jyeṣṭhadeva. Jyeṣṭhadeva was, obviously, a younger contemporary and pupil also of Nīlakaṇṭha, for, in the *Yuktibhāṣa* composed with a view to elaborating the rationale of the latter's *TS*, Jyeṣṭhadeva quotes a verse from Nīlakaṇṭha's *Siddhāntadarpaṇa* with the prefatory statement :

इप्रकारत्ते उण्टु चोल्लीट्टु सिद्धान्तदर्पणत्तिल् आचार्यन् etc.

'This procedure has been stated in the *Siddhāntadarpaṇa* by the Teacher (Nīlakaṇṭha)' (p. 64 of the present editor's press copy of Pt. II of *Yuktibhāṣa*).

The mention, in the above-quoted document, about Jyeṣṭhadeva's being the teacher of Acyuta Piṣāraṭi (A.D. 1550-1621), who wrote the *Sphuṭanirṇaya*[1] and other works, is corroborated Acyuta himself in the closing verse of his *Uparāgakriyākrama*. *Cf.* :

'प्रोक्तः प्रवयसो ध्यानात्' ज्येष्ठदेवस्य सद्गुरोः।
विच्युताशयदोषेणेत्यच्युतेन क्रियाक्रमः॥

---

1. Cr. ed. by K.V. Sarma, with Auto-commentary, Introduction and Ten Appendices, (Hoshiarpur, 1974).

'(The work *Uparāga)kriyākrama* has (thus) been set out by Acyuta, bereft of mental confusion on account of his contemplating on his aged and noble teacher Jyeṣṭhadeva.'

An early Malayalam commentary explains that the expression *proktaḥ pravayaso dhyānāt* in the above-quoted verse gives, in *kaṭapayādi* notation, the Kali day of the completion of the *Uparāgakriyākrama, viz.*, 17,14,262 (=A.D. 1592). Jyeṣṭhadeva who was 'very old' (*pravayasaḥ*) in 1592, should have lived up to about A.D. 1610, since he is said to have composed the *Dṛkkaraṇa* in A.D. 1607-8.

4. *Citrabhānu* (A.D. 1475-1550)

A senior contemporary astronomer whom Śaṅkara quotes with respect and possibly, might have received instruction from, is Citrabhānu, a namputiri brāhmin of the Gautama-gotra, who belonged to the village of Covvaram (Skt. Śivapuram) near Trichur in Central Kerala. Śaṅkara quotes extensively, in his *Kriyākramakarī*, from Citrabhānu's *Ekaviṁśati-praśnottara*. He adds also his own exposition to Citrabhānu's *kārikās*, which are introduced with the following prefatory statement :

अत्र राश्योः योग-भेद-घात-वर्ग-घन-तन्मूलेषु द्वाभ्यां द्वाभ्यां विदिताभ्यां राशिद्वयानयनं एकविंशतिधा कार्यमित्युपदिष्टं चित्रभानु-नामक-गणितगोलयुक्तिविदग्रेसरेण भूसुरोत्तमेन । तत्र दिङ्मात्रम् अस्माभिः तदुपदेशवशादिह लिख्यते ।

(*Līlavatī with Kriyākramakarī, op.cit.*, pp. 109-25)

'Now, of two numbers, if from among their sum, difference, product, squares, cubes and the (square and cube) roots, sets of two each are known, the (original two) numbers can be calculated, through methods enunciated by the respected (namputiri) brāhmin named Citrabhānu, foremost among mathematicians and astronomers. Herein-below the same is set out by me, by way of indication, from his instructions.' Whether Śaṅkara was the recepient of any *direct* instructions from Citrabhanu or not, the above-quoted statement is a pointer to the high regard which he had for that savant.

Besides the *Ekaviṁśati-praśnottara* noticed above, Citrabhānu is the author of an advanced astronomical manual entitled *Karaṇāmṛta*.[1]

---

1. Ed. by V. Narayanan Namboodiri, with an anonymous commentary, *Trivandrum Skt. Series*, No. 240, (Trivandrum, 1975).

The work contains just over a hundred and thirty verses, in four chapters devoted, respectively, to the computation of the planets, gnomonic shadow and allied matters, the eclipses, and astronomical corrections for observation. Citrabhānu's reverence for Nīlakaṇṭha is indicated in the very first verse of the work, which reads :

प्रणम्य भास्वद्विघ्नेशवाग्विष्णुपरमेश्वरान् ।
ग्रहान् गुरूंश्च गार्ग्यादीन् करिष्ये करणामृतम् ॥ १.१ ॥

An anonymous commentary available on the work[1] explains the expression *gārgyādīn*, occurring in the above verse, as 'teachers like Gārgya-kerala-Nīlakaṇṭha.' The date of completion of the *Karaṇāmṛta* is given in the concluding verse of that work which reads :

'बुद्धघोन्मध्योद्धृतं यत्नात्' तन्त्राब्धेश्चित्रभानुना ।
तदेतत् 'कालतत्त्वज्ञा' गृह्णन्तु करणामृतम् ॥ ४.३४ ॥

The commentary explains : ग्रथ च 'बुद्धघोन्मध्योद्धृतं यत्नात्' (16,91,513) इत्यनेन ग्रन्थनिर्माणकालाहर्गणो दर्शितः । 'कालतत्त्वज्ञा' (4631) इत्यनेन तदानीन्तनः कल्यब्दः । इति सर्वं शिवम् ।

The Kali date and year given above fall in A.D. 1530-31. Citrabhānu is also a good connossieur of literature as exemplified by his erudite commentary called *Śabdārthdīpikā* on the *Kirātārjunīya* of Bhāravi.[2]

5. *Subrahmaṇya* (*c.* 1450-1550)

Another scholar of eminence whom Śaṅkara refers to with great respect is Subrahmaṇya mentioned in an introductory verse to his *Pañca-bodha-vyākhyā* which reads as follows :

---

1. In the Introduction to the edition of the work, the commentary is attributed to the *TS* Commentator Śaṅkara but without any evidence being offered.

2. Ed. by T. Ganapati Sastri, Trivandrum, 1918, (*Trivandrum Skt. Series*, No. 63). The commentary, which is highly scholarly, extends only to the first three cantos of the poem.

शक्त्या शश्वन्निखिलसुमनस्संहृतिस्तद्विपक्षं
जित्वा सद्यो निजनिजपदे स्थापिता यस्य भाति ।
अक्षोभ्यः सन् निखिलजगतां वन्द्यपादः सुशीलः
सुब्रह्मण्यः स जयतितमां नीलकण्ठावलम्बी ॥ ८ ॥

It cannot be ascertained whether Subrahmaṇya was an astronomer, but Śaṅkara's high regard for both his scholarship and personal qualities is very much apparent in the verse quoted above. The reference by Śaṅkara of Subrahmaṇya's rapport with Nīlakaṇṭha (*Cf. Nīlakaṇṭhāvalambī*), is fully corroborated by Nīlakaṇṭha himself when he describes himself as 'a friend of Subrahmaṇya' (*Subrahmaṇya-sahṛdayena*) (p. xxiv, above). A post-colophonic statement in a manuscript of this work reads *Śrī-Subrahmaṇyāya namaḥ* (see above, p. lx), which also is, possibly, a reference to the said Subrahmaṇya.

9.3. Date of Śaṅkara (A.D. 1500-60)

The date of Śaṅkara can be fixed within reliable limits on the basis of the chronograms contained in his works. He gives the date of completion of his *Pañcabodha-vyākhyā* in the concluding verse of that work (see above, p. lx) through the Kali chronogram *prājñalokoddhṛtaṁ yatnād* (16,91,302), which falls in A.D. 1529. In his *Kriyākramakarī* occurs a problem for the calculation of Kali days, whose solution is 16,92,972, a date occurring in A.D. 1534. In his *Karaṇasāra*, Śankara gives the *khaṇḍadina*, the day for the commencement of calculations according to that work, as *anūnajñānasādhya* (17,00,000), occurring in the year A.D. 1554. The date of the last work he wrote, *viz.*, the *Laghuvivṛti* on the *TS*, is said to be Kollam year 971 (A.D. 1556)[1]. The above dates refer to a period of literary activity from A.D. 1529 to 1556. One would be justified, on the above basis, in fixing Śaṅkara's date as *c.* A.D. 1500-60.

10. CONTENTS OF THE YUKTIDĪPIKĀ

1. Notable exposition of theories and rationales

While even a cursory glance of *Yuktidīpikā* would give an idea of the extent and the variety of the topics dealt with in it, a closer

---

1. Ulloor, *Kerala Sāhitya Charitram*, vol. II, (Trivandrum, 1954), pp. 273-75.

examination would reveal the depth of treatment and the logical approach adopted by the author in explaining astronomical theories and mathematical rationale. The exposition which is couched in simple, racy *anuṣṭup* verses makes his treatment all the more effective. As mentioned earlier in this Introduction, (see above, pp. xlv-xlvi), *Yuktidīpikā* introduces and discusses a large number of topics which are not actually stated in the textual verses of the *TS*, but which are useful for their correct understanding and proper appreciation, besides giving the rationale of the enunciations of the text. From among these, special attention might be drawn to the more important topics which are noticed below.

1. *Approach to astronomical studies*

Touching upon the invocation in the *Tantrasaṅgraha*, the commentary specifies the purpose of astronomical computation, the determinants of time, the aim of the discipline and the proper approach to the study of the science (pp. 1-3).

2. *Measurement of time*

Speaking of time measures (*TS*, I. 2-13), the commentary elaborates upon the rotation of the celestial sphere (pp. 4-5), the civil and sidereal days, and lunar measure of time (pp. 5-6), intercalary and lunar months (pp. 6-8) and the general nature of time measures (p. 8).

3. *Planetary revolutions*

Apropos the enumeration of the number of revolutions of the planets per aeon (*yuga*) (*TS* I. 14-22), the commentary speaks of the theory of *yugas* (pp. 11-12), intercalation (pp. 12-14), verification of aeonic revolutions by means of planetary conjunctions and by inference (pp. 14-18) and the revolution of the planets in circular orbits (pp. 18-19).

4. *Mathematical operations*

In three verses and a half (1. 23-26a), the *TS* enunciates a method for the calculation of the current Kali day. Since the said calculation involves mathematical operations, the commentary takes the occasion to set out the theory and practice of the different mathematical operations, including the square and cube and the roots thereof, zero, simple, associated and dissociated fractions, etc., stating also the

rationale of the methodology of the derivations of each (pp. 19-47). An interesting depiction herein is the theory of numbers (pp. 24-30).

5 *Rule of three and Pulverisation*

Two verses of the *TS* (I. 26b-28a), giving the method of computing the Mean planets, spark off, at the hands of the commentator, a twenty-page exposition (pp. 48-67) on the rule of three and the application of the rule in the determination of the current Kali day, Mean planets and Pulverisation (*Kuṭṭaka*), with the rationale underlying each of these calculations. It is of interest to note that Nīlakaṇṭha had adopted, for ease in calculation, the 'reduced' (*apavartita*) *yuga* of 576 (*tatsama*) years with the corresponding number of days 2,10,389 (*dhījagannūpura*) and gives the zero-corrections of planets at the beginning of the ninth 'reduced' *yuga* (= A.D. 1507-8) which is contemporaneous to his own times (A.D. 1444-1545) (*Cf.*, *TS* I. 35-39). The commentator gives the *Kuṭṭaka*-calculations relating to the same (pp. 63-67). The rationale of reduced multipliers and divisors in calculations with huge numbers is also explained later on (pp. 75-77).

6. *Situation of the Earth*

Under *TS* I. 28b-34, on the 'correction for longitude' (*deśāntara-saṁskāra*), the commentary dwells at length (pp. 68-73) with the position of the Earth as suspended in the atmosphere, gravitational pull, longitudinal difference of time and allied topics.

7. *The Circle*

Commencing the *Sphuṭaprakaraṇa* (ch. II), the text defines the circle, and sine and cosine (II. 1). The commentator takes the occasion to provide a 27-page exposition (pp. 78-104) of the entire gamut of mathematical conceptions thereof and the rationale involved therein. In respect of the circle, he first takes up the construction of a circle of diameter equal to the side of a given square and the computation of its circumference (pp. 80-88). Later, in the same context, he follows this up with the rationale on the derivation of the circumference of a circle in terms of its diameter and mentions several formulae involving the summation of infinite series and implying highly accurate approximations of the value of π (pp. 101-3).

8. *Summation of Series*

In as much as the formulae referred to above involves an understanding of the summation of series, the commentator deals elaborately with the rationales and formulae relating to the series (pp. 88-94). The series dealt with include the summation of natural numbers, squares, cubes and the sum of a summation of an infinite series.

9. *Rsine and Arc*

Since the computation of the True planets involves Rsines and arcs of circles (*TS*, II. 2-21a), the commentary, in its turn, sets out the conceptions thereof and the rationale involved. Among the topics dealt with here are the mathematical derivation of Rsines, Arcs, the accurate determination of the 24 ordained Rsines (*paṭhita-jyās*), sectional Rsines and Rsine differences, the summation of Rsines and Rsine differences, and the accurate computation of the Rsine at any desired point (pp. 105-12).

It has to be noted here that the formulae mentioned by the commentator above as also those similarly mentioned by him later in his commentary, are not all his own, but belonged to the tradition which he inherited. Some of these have been specifically stated by Nīlakaṇṭha and others to have been enunciated by an earlier astronomer Mādhava of Saṅgama-grāma (A.D. 1340-1425) who was known by the honorific title *Golavid.*

The rationale of certain methodologies and formulae of Mādhava, who is mentioned by name, are also set out here. These include the computation of the arc of a given Rsine, the derivation of the phrases *vidvān* etc. to be used for the accurate computation of any desired Rsine and Rversed sine, and the *jīve paraspara-nyāya* for calculating the Rsine of the sum or difference of two angles (pp. 112-26). In the same context, the properties of cyclic quadrilaterals are also taken up and discussed (pp. 127-43) and a formula derived for the surface area of a sphere (pp. 146-51).

10. *Ascensional differences*

In connection with the computation of True Sun, the *TS* refers to Ascensional difference (*Cara*). The commentary gives, in this context, a detailed treatment of the rationale of the derivation of *cara* and the application thereof to the Sun and the different planets (pp. 153-58).

11. *Theory of Epicycles*

The computation of True planets involves the conception of epicycles. The commentator gives in this context, the Hindu epicyclic theory and analyses in detail the calculation of true planets (pp. 159-85). The *Golasāra* of Nīlakaṇṭha comes in for substantial citation. Special mention deserves to be made, in this connection, to the commentator's explanation of planetary motion, daily motion of the Sun and the Moon, and the specialities in the computation of Mercury and Venus.

12. *Celestial globe : Different conceptions*

Chapter Three of *Tantrasaṅgraha* deals with computations relating to the gnomonic shadow and allied matters. Introducing the chapter, the commentary sets out the three conceptions of the celestial globe as *Bhūgola* (Earth sphere), *Vāyugola* (Atmospheric sphere) and *Rāśigola* (Zodiacal sphere) (pp. 186-88), and the rationale of determining the directions accurately (pp. 188-90).

13. *Rising of the signs*

In the *TS*, the method of calculating the Rising of the signs (*Lagna*) is enumerated in III. 14-16a, in which context, the *Yuktidīpikā* explains the cause for the difference of the rising of the signs at different places and gives the rationale for its derivation at any desired place (pp. 194-97).

14. *Gnomon and the Great Gnomon*

Several propositions are enunciated in the *TS* relating to the 12-inch Gnomon (*Dvādaśāṅgulaśaṅku*), Great gnomon (*Mahāśaṅku*), Great gnomon when the Sun is at the Prime vertical (*Samaśaṅku*) and Midday shadow (*Madhyāhnacchāya*), (*TS* III. 16b-59), the rationale of all of which are provided for in the *Yuktidīpikā* (pp. 197-218). Some of the interesting topics elaborated here are : (1) the theory of the Precession of the equinoxes (*Ayanacalana*) (pp. 204-7), (2) determination of the directions from the shadow (pp. 209-13), and (3) graphical representation of the Shadow circle (pp. 213-14).

15. *The Ten Shadow problems* (*Daśapraśna*)

Ch. III, verses 60-62a of the *Tantrasaṅgraha* mention that from among the five items, *viz.*, Great gnomon (*Mahāśaṅku*), Parallax in latitude (*Nata*), Declination (*Krānti*), Amplitude at rising (*Digagrā*) and

Latitude (*Akṣa*), if three are known, the other two can be derived in ten ways. The *TS* also enunciates the methods for such derivations (III. 62b-87). The *Yuktidīpikā* takes up these ten Shadow problems and discusses in detail the rationale of their solution, one by one (pp. 219-36).

16. *Great shadow (Mahācchāyā) in any direction*

In III. 88-91, the *TS* mentions a formula for *Iṣṭadikchāyā*, being the *Mahācchāyā* in any direction. The commentary sets out the derivation thereof from the data given, *viz.*, Declination, Latitude and Amplitude at rising (pp. 237-39).

17. *Rising point of the Ecliptic*

The last topic dealt with in chapter Three of the *TS* relates to the Rising point of the ecliptic (*Lagna*) and allied computations. The *Yuktidīpikā* takes the occasion to delve upon the astronomical situation at the Orient ecliptic, the rationale of deriving the ecliptic-zenith distance (*Dṛk-kṣepa*) and also the rising, setting and meridian points of the ecliptic (*Udaya-*, *Asta-* and *Madhya-lagna*) (pp. 241-50).

18. *Lunar eclipse*

Chapter Four of the *TS* is concerned with eclipses, particularly that of the Moon. From among the rationales given in the *Yuktidīpikā* in this connection, attention might be directed to : The celestial situation at an eclipse (pp. 255-56), (2) the detailed elucidation of the factors of the eclipse and the computation thereof (pp. 259-75), (3) the rationale of *Valana* (deflection due to latitude and declination) (pp. 275-77) and (4) the graphical representation of the eclipse (pp. 277-79).

2. Extent of Yuktidīpikā

1. *Portion now available*

The known manuscripts of *Yuktidīpikā* do not extend beyond ch. IV of the work. One of the manuscripts carries also a post-colophonic statement to the effect that the work is complete. But this statement cannot be taken as confirmative, since, as shown earlier, (see above, p. xx), all these manuscripts are derived from a common archetype which should have contained only these four chapters. Neither can the adaptation of verses from the *Yuktidīpikā* in the *Kriyākramakarī*

(see above, pp. xlvii-viii) be of help, for the subject matter of *Līlāvatī*, of which *Kriyā.* is a commentary, is limited to mathematics and one could expect herein *YD* verses only from chs. I to III of the *TS* which are relevant also to mathematics, and not from chs. IV to VIII.

2. *Evidence for YD on the entire work*

However, there are evidences to show that Śaṅkara had continued the commentary to completion. In the *Yuktidīpikā*, when a topic which has been discussed in detail at one place is mentioned also at another place, attention is generally drawn to the said detailed treatment. Thus, the detailed treatment of the epicycles in Ch. II, com. verses 865-95, (pp. 159-61), is referred to in an earlier context in the words :

स्पष्टीकरिष्यते चैतदुपरि स्फुटकर्मणि ॥ I. com. 147 ॥ (p. 16)

Referring to *Lambana* (parallax in longitude) to be elaborated in ch. V, where the Solar eclipse is dealt with, he says in ch. IV :

तदेतद् ग्रहणेऽर्कस्य पश्चात् स्पष्टीकरिष्यते ॥ IV. com. 128 ॥ (p. 267)

In the same manner, while speaking about the computation of Moon's orb in ch. IV, the Śaṅkara says :

स्पष्टीकरिष्यते चैतदूर्ध्वं शृङ्गोन्नतौ विधोः ॥ IV. com. 38 ॥ (p. 256)

The reference is to the last chapter, *viz.*, *Śṛṅgonnati-Prakaraṇa*, of the *Tantrasaṅgraha*, indicating, at least, that Śaṅkara intended to comment up to the last chapter. Definitive proof in the matter is provided by Śaṅkara in his concise commentary *Laghuvivṛti* on *TS* VII. 4-6 (p. 322 below), where the corresponding portion of the larger commentary *Yukti-dīpika* is referred to in the passage ; अत्र विक्षेपस्वरूपं प्रति यद् वक्तव्यं तन्मयैव एतद्व्याख्यायां युक्तिदीपिकायां प्रपञ्चितम् इति तत एव अवधार्यम्, proving that the *Yuktidīpikā* extended to ch VII. It is to be hoped that further searches would unearth complete manuscripts of *Yuktidīpikā* covering all the eight chapters.

3. Authorities cited in the Yuktidīpikā

The *Yuktidīpikā* being a repository of the mathematical and astronomical tradition prevalent in Kerala about A.D. 1500, it is but natural that it should digest the contributions of several earlier authorities besides presenting the author's own views. Indeed, a few works and

authors have been named in the *YD*. These include the *Āryabhaṭīya*, *Sūryasiddhānta* and *Siddhāntaśiromaṇi* among authorities of all-India prevalence, and Saṅgamagrāma-Mādhava, Nīlakaṇṭha (*Golasāra*, *Siddhāntadarpaṇa*, etc.) and Śaṅkara's primary source, '*Parakroḍāvāsa-dvijavara*' Jyeṣṭhadeva. There are also a number of passages which are apparently quotations given anonymously, some of which could be identified and their references indicated in the edition below.

General views are introduced by such expressions as *golavittamaiḥ*, *tantrāntare*, *kaiścit*, etc. Śaṅkara refers also to his *Ācārya* or *Guru* and some of the passages could be traced to Nīlakaṇṭha's works. In a passage of this type, speaking about the determination of the number of revolutions in a *yuga*, he says :

> प्रत्यक्षसिद्धात् सम्बन्धात् कालयुक्त्योरितीदृशात् ।
> इयत्ता भगणादीनां युगादिष्वनुमीयते ॥
> आचार्यैस्तदिदं ज्योतिर्मीमांसायां प्रदर्शितम् ॥ I. com. 148-49 ॥ (p. 16)

If the *Ācārya* mentioned is Nīlakaṇṭha and a work is referred to, both of which are quite likely, we have, here, a reference to a hitherto unknown and important work of Nīlakaṇṭha entitled *Jyotirmīmāṁsā* ('Investigations into astronomical theories'). Judged from its title and the context in which it is cited, this treatise should have contained an instructive exposition of current astronomical conceptions, some of which Śaṅkara has set out in his commentary verses, I. 123-79 (pp. 14-19).

11. CONTENTS OF LAGHUVIVṚTI

The commentary *Laghuvivṛti* of Śaṅkara, his 'last' work, 'composed with care for Āzhvāñceri' (See above, pp. 1, lx) is, as its name implies, 'concise' (*laghu*) and primarily concerned with setting out the 'collocation of computations' (*kriyā-kalāpa*) enunciated in the *Tantrasaṅgraha*. But for an instace or two, (see, for *e.g.*, *TSS* edn., p. 69), there are no poetic elaborations which characterise the *Yuktidīpikā*. However, several authorities are cited with or without the indication of their sources. Among the former are *Āryabhaṭa*, *Sūryasiddhānta*, *Brahmasiddhānta*, Bhāskara, Śrīpati, Nīlakaṇṭha and Śaṅkara's own earlier commentary *Yuktidīpikā*. It deserves to be noted here that in respect of the 'Ten Shadow problems' (*Daśapraśna*), enunciated in the *Tantrasaṅgraha*, III. 60-87, Śaṅkara supplies 39 illustrative problems and also

one problem relating to *Iṣṭadikcchāyā*. Most of these problems are also worked out by him (see *TSS* edn., pp. 66-91).

12. ACKNOWLEDGEMENTS

Most of the manuscripts of the *Tantrasaṅgraha* and its two commentaries used for the present edition are preserved in the Kerala University Oriental Research Institute and Mss. Library, which is the biggest repository of Kerala manuscripts. I am beholden to the Director Dr. K. Raghavan Pillai, and other members of that institution, especially Shri M. Madhavan Unni, Research Officer, and Shri N. Sundaram, Scribe, for enabling me to make use of the wealth of material available there. I could make use of one manuscript each from the Vishveshvaranand Library, Hoshiarpur, the Govt. Sanskrit College Library, Trippunithura, and the Govt. Oriental Mss. Library, Madras, for enabling which I am highly thankful to the authorities of these institutions.

तन्त्रसंग्रहः

युक्तिदीपिका-लघुविवृत्याख्य-व्याख्याद्वयोपेतः

नीलकण्ठसोमयाजिविरचितः

तन्त्रसंग्रहः

अथ प्रथमोऽध्यायः

[मङ्गलाचरणम्]

हे विष्णो निहितं कृत्स्नं जगत् त्वय्येव कारणे ।
ज्योतिषां ज्योतिषे तस्मै नमो नारायणाय ते ॥ १ ॥

तन्त्रसंग्रहस्य पद्यव्याख्या*

अथ प्रथमोऽध्यायः

[मङ्गलाचरणम्]

कारणभूतो जगतां वारणवक्त्रः स विजयतां देवः ।
भक्तजनप्रत्यूहप्रशमनपटुचरितसर्वस्वः ॥ १ ॥

करकमलकलितपुस्तकवराभयाक्षस्रजं[1] विशुद्धाङ्गीम् ।
मौलिलसच्चन्द्रकलां त्रिलोचनां[2] भारतीं वन्दे ॥ २ ॥

यत् तन्त्रसंग्रहं नाम पूर्वैः प्रकरणं कृतम् ।
हितायाल्पधियां तस्य पद्यैर्व्याख्या विलिख्यते ॥ ३ ॥

हे विष्णो इति (I. 1)[3]—

मृत्तिकायां यथा भाति कृत्स्नं कुम्भघटादिकम् ।
नारायणे तथा भाति जगदेतच्चराचरम् ॥ ४ ॥

जगत्कारणता तस्य निर्विवादा स्थिता ततः ।
ज्योतिष्ट्वं ज्योतिषां तस्य ज्ञेया भगवदुक्तितः ॥ ५ ॥

---

*Com. Mss. used : A. R. No. 2505 of the GOML, Madras ; B. No. C-1375, C. No. 16932-B, and D. No. 586-E of the KUORIML, Trivandrum.

व्याख्या—1. C. D. वराभयात्मप्रजं (C. °बृजं) 2. C. Om. त्रिलोचनां
3. C. adds इति मूलश्लो॰

"यदादित्यगतं तेजो जगद् भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥" ६ ॥
(भगवद्गीता, १५. २)

इति यत् किल गीतायामुक्तं भगवता स्वयम् ।
नारायणाख्यया नाम्न:[1] सहस्रमुपलक्षितम् ॥ ७ ॥

ततो नामसहस्रेण तस्योक्त्या कीर्त्यमानता ।
कायवाङ्मनसानां य: परमेश्वरगोचर: ॥ ८ ॥

प्रह्वीभावो नमस्कारशब्दार्थ: सर्वविन्मत: ।
सर्वानुग्राहके विश्वोत्कृष्टे युक्त: स तादृश: ॥ ९ ॥

अतस्तादृङ्नमस्कारात् सिद्धयेत् सर्वं यथेप्सितम् ।
शास्त्राणां मङ्गलादीनां प्रथमानत्वमिष्यते[2] ।
तथा[3] प्रकृष्टव्याख्यातृश्रोतृलाभश्च जायते ॥ १० ॥

[गणितप्रयोजनम्]

श्रुतिचोदितकर्माङ्गभूतकालावबोधिन: ।
शास्त्रस्यास्य तदङ्गस्य कालज्ञानं प्रयोजनम् ॥ ११ ॥

[कालपरिच्छेद:]

कालो यत: परिच्छेद्यो ज्योतिश्चक्रे ग्रहभ्रमात् ।
भचक्रसप्तविंशांशै: चन्द्रचारा[4]द्वजादित: ॥ १२ ॥

अश्विन्यादीनि भानि स्युस्तत्र तत्प्रमितार्कत:[5] ।
त्रिंशांशे चन्द्रचारेण तिथय: प्रतिपन्मुखा: ॥ १३ ॥

तत्तदंशेषु तद्बिम्बघनमध्यप्रवेशत: ।
तन्निर्गमाच्च नक्षत्रतिथ्याद्यन्तौ प्रकीर्तितौ ॥ १४ ॥

एवमन्येऽपि[6] कालांशा वेद्या भ्रमवशात् तयो: ।
स्वदेशे प्रतिपच्छेदो भग्रहोद्गमनादिना ॥ १५ ॥

व्याख्या—1. B. D. नाम
2. B. प्रथमं नत्वमिष्यते
3. D. यथा
4. D. om. चारा
5. D. प्रतिमार्कत:
6. C. ग्रहमन्येऽपि

व्यवस्थिता गतिस्तेषां निजवृत्तेषु सर्वदा ।
वृत्तान्तरेण भ्रमिता भिन्नरूपानुभूयते ॥ १६ ॥

भूयोदर्शनतस्तर्कानु[1]विद्धात् तद्विनिश्चयः ।
बुधैरीषत्करो गोलयुक्तिविद्भिरसंशयम् ॥ १७ ॥

गणिताधीनविज्ञाना भगोलप्रमिता गतिः ।
त्रैराशिकोपपत्त्याथ ग्रहाणां क्षेत्रकल्पनात् ॥ १८ ॥

[शास्त्रप्रयोजनम्]

उपायभूतं गणितं शास्त्रेण प्रतिपाद्यते ।
गणिते प्रतिपाद्येत शास्त्रे[2] च प्रतिपादके ॥ १९ ॥

सम्बन्धोऽप्यनयोर्वेद्यः स तथाभावलक्षणः ।
गणितग्रहभुक्त्योरप्युपायोपेयलक्षणः ॥ २० ॥

ग्रहभुक्तिपरिच्छिन्नः[3] कालभेदो भवेद् यतः ।
श्रौतकालपरिच्छेदः शास्त्रस्यास्य प्रयोजनम् ॥ २१ ॥

[शास्त्राध्ययनम्]

"अवश्यमेतच्छ्रोतव्यमध्येयं च द्विजातिभिः ।
वेदार्थस्य विचारोऽत्र यतः साङ्गो विधीयते ॥ २२ ॥

रहस्यमेतद्देवानां न देयं यस्य कस्यचित् ।
सुपरीक्षितशिष्याय दातव्यं ज्ञानमुत्तमम्" ॥ २३ ॥

इत्येतत् सूर्यसिद्धान्तवचो नात्र विरुध्यते ।
गुणिनामेव नान्येषां विप्राणामधिकारतः ॥ २४ ॥
[4]तत्र शिष्यपरीक्षार्थं गुरुरेव नियुज्यते ।
शिष्यस्यास्य नियोज्यत्वात् तदुक्तिर्न विरुध्यते ॥ २५ ॥
प्रतिपत्तुर्हि[5] दोषेण शास्त्रानर्थक्यकीर्तनात् ।
तादृशामिह सर्वत्र प्रसिद्धाऽनधिकारिता ॥ २६ ॥ इति ॥

व्याख्या—1. A. दर्शनतस्त्वर्कानु 2. D. प्रतिपाद्ये तच्छास्त्रे
3. A. D. परिच्छिन्नं
4. D. About 4 cm. of the recto of the folio broken off, causing the loss of three letters each in the five lines in the folio. 5. C. D. प्रतिपत्तिर्हि (D. °त्तर्हि)

[सावननक्षत्रदिनमानम्]

रवेः प्रत्यग्भ्रमं प्राहुः सावनाख्यं दिनं नृणाम् ।
आर्क्षमृक्षभ्रमं तद्वत्, ज्योतिषां प्रेरको मरुत् ॥ २ ॥

भ्रमणं पूर्यते तस्य नाडीषष्ट्या मुहुर्मुहुः ।
विनाडिकापि षष्ट्यंशो नाड्या गुर्वक्षरं ततः[1] ॥ ३ ॥

प्राणो गुर्वक्षराणां स्याद् दशकं चक्रपर्यये ।
खखषड्घनतुल्यास्ते वायुः समजवो यतः ॥ ४ ॥

[कालस्वरूपम्]

रवेः प्रत्यग्भ्रममित्यादि[1] (I. 2-13)—

[भगोलभ्रमणम्]

प्रत्यहं भ्रमणं प्रत्यङ्मुखं दृष्टं द्युचारिणाम् ।
परतोऽथ स्वतस्तेषां प्राङ्मुखं चानुमीयते ॥ २७ ॥

भगोलं भ्रामयेन्नित्यं प्रत्यक् प्रवहमारुतः[2] ।
तद्वशादेव तत्स्थानि ग्रहर्क्षाणि मुहुर्मुहुः ॥ २८ ॥

अतः प्रत्यङ्मुखं तेषां भ्रमणं परतो मतम् ।
ज्योतिश्चक्रे यदा येन नक्षत्रेण युतो ग्रहः ॥ २९ ॥

कालान्तरे पुनस्तस्मात् संयुक्तोऽन्येन दृश्यते ।
नक्षत्राणि स्थिराण्येव स्वप्रदेशेषु तु स्वतः ॥ ३० ॥

न कदाचित् क्वचिद्यान्ति स्वदेशाद् गत्यभावतः ।
प्रदेशान्तरसंयोगो नोपपन्नोऽप्यगच्छतः ॥ ३१ ॥

ततः प्रतीच्यनक्षत्रात् प्राच्यनक्षत्रयोगतः ।
प्रत्यहं प्राङ्मुखी भुक्तिर्ग्रहाणामनुमीयते ॥ ३२ ॥

भिन्ना प्रतिक्षणं चासौ भगोलावयवैर्मिता ।
भगोलमध्यवर्तिन्यां भूमौ द्रष्टुरवस्थितेः[3] ॥ ३३ ॥

मूलम्— 1. B. omits the line.

व्याख्या—1. C. adds 'मूलश्लो०' 2. A. मारुतम्

3. A. स्थितेः; C. रपि स्थितेः

[चान्द्रमासः]

पूर्वपक्षः शशाङ्कस्य विप्रकर्षो रवेः स्मृतः ।
सन्निकर्षोऽपरः पक्षः सितवृद्धिक्षयौ ययोः ॥ ५ ॥

ततोऽन्यफलभिन्नस्वकेन्द्रे वृत्ते च तद्गतेः[1] ।
प्रत्यहं भिन्नरूपेण प्राग्भ्रमेण समन्वितम् ॥ ३४ ॥

प्रत्यङ्मुखं तद्भ्रमणं प्रत्यावृत्ति विभिद्यते ॥ ३५ ॥

[सावन-नाक्षत्र-दिनमानम्]

रवेः प्रत्यग्भ्रमेणात्र प्रमितं सावनं दिनम् ।
दिनव्यक्तिषु सर्वासु भिन्नकालतया मिथः ॥ ३६ ॥

दुष्करं चानुपातेन मध्यभुक्ति[2]रहर्गणात् ।
तुल्यकालैस्तु[3] नाक्षत्रैर्यद्येषा सुकरा भवेत् ॥ ३७ ॥

तदर्थमिह नाक्षत्र[4]दिनमानं प्रदर्शितम् ।
[5]नन्वर्कभगणैर्युक्तादर्कसावनवासरात् ॥ ३८ ॥

दिनान्यार्क्षाणि तेभ्योऽर्कभगणास्तैश्च सावनैः ।
दिनान्यार्क्षाणि कल्प्यानीत्यन्योन्याश्रयता भवेत् ॥ ३९ ॥

नैवं गतार्कभगणहीनार्क्ष[6]दिनसञ्चयः ।
यातसावनतुल्योऽत्र कल्पनीयोऽपवर्तनात् ॥ ४० ॥

अतो युगार्क्ष[7]दिवसा युगार्कभगणोनिताः[8] ।
युगसावनतुल्यास्ते कल्प्या येन सजातिता ।
ग्रहाणां मध्यभुक्तिर्वा कर्तव्या मध्यसावनैः ॥ ४१ ॥

[सौर-चान्द्र-मानम्]

अतीतकालसाध्यास्ते[9] कालो नानाविधश्च सः ।
तथाहि वत्सरः सौरो मासश्चान्द्रोऽथ सावनम् ॥ ४२ ॥

व्याख्या—1. A. गते ; C. गतौ
2. D. बुद्धिः for भुक्तिः
3. D. कालेषु
4. D. नक्षत्र
5. A. सम्पर्क; B. न त्वर्क
6. B. हीनार्क
7. A. B. युगार्क
8. A. B. D. भगणोनितः
9. A. साम्यास्ते; D. Broken.

मासस्ताभ्यां [1]मतश्चान्द्रस्त्रिंशत्तिथ्यात्मकः स च ।

[सौरमासः]

सौरोऽब्दो[2] भास्करस्यैव ज्योतिश्चक्रपरिभ्रमः ॥ ६ ॥

मासस्तु राशिभोगः[3] स्यादयने चापि तद्गती[4] ।

[अधिमासः]

त्रयोदशस्य चैत्रादिद्वादशानामियं भिदा ॥ ७ ॥

दिनमेतैस्त्रिभिः साध्यः सावनो द्युगणो गतः ।
अतीतानां च गणना तेषां नातीव दुष्करा ॥ ४३ ॥

तथाहि मासश्चान्द्रोऽसौ प्रत्यक्षेणोपलभ्यते ।
चित्रानक्षत्रयुक्तस्य पूर्णेन्दोर्निशि दर्शनात् ॥ ४४ ॥

चैत्रमासो विशाखाद्यैर्वैशाखाद्यास्तथा युतैः ।
मासाश्चैत्रादयश्चान्द्राः सौरैर्मेषादिभिः समाः[1] ॥ ४५ ॥

[अधिमासः]

यस्त्वलक्ष्मा[2] बहिष्कार्यः स चान्द्रोऽसौ त्रयोदश ।
संबद्धाः स्वोचितैः सौरैश्चान्द्राश्चैत्रादयस्ततः ॥ ४६ ॥

न्यूनत्वात् सर्वचान्द्राणां सौरेभ्यो विप्रकृष्टताम्[3] ।
त्रयोदशं परिहरेद् योग्यः सौरान्वयप्रदः ॥ ४७ ॥

अतो नियतसङ्क्रान्तिगर्भत्वं लक्षणं कृतम् ।
चैत्रादीनामसङ्क्रान्तिस्त्वधिमासोऽपि लक्षितः ॥ ४८ ॥

मेषाद्येकैकसङ्क्रान्तिगर्भाश्चैत्रादयस्ततः ।
असङ्क्रमोऽधिमासोऽपि स्यादंहस्पत्यबाधितः ॥ ४९ ॥

[संसर्पांहस्पती]

कवलीकृतसङ्क्रान्तियुगलोंऽहस्पतिर्यदा ।
तदा तत्पार्श्वयोः स्यातामुभौ चान्द्रावसङ्क्रमौ ॥ ५० ॥

मूलम्— 1. B. अतः for मतः 2. B. सौराब्दो
3. A. राशिभागः 4. A. तद्गतिः

व्याख्या—1. C. तदा for समाः 2. A. यस्त्वलक्ष्या
3. C. सौरेभ्योऽतिप्रकृष्टताम्

मेषाद्येकैकराशिस्फुटगतिदिनकृत्सङ्क्रमैकैकगर्भा-
श्चान्द्राश्चैत्रादिमासा इह न यदुदरे सङ्क्रमः सोऽधिमासः ।
संसर्पः स्यात्, स चांहस्पतिरुपरि यदि ग्रस्तसङ्क्रान्तियुग्म-
स्तौ चाब्दत्वेऽङ्गभूतौ सह सुचिरभवौ सोऽधिमासोऽत्र पश्चात् ॥८॥

तयोः पूर्वोऽत्र[1] संसर्प उत्तरस्त्वधिमासकः ।
संसर्पांहस्पती[2] वर्षत्वेऽङ्ग[3]भूतौ, न चाधिकः ॥ ५१ ॥

तथाहि संसर्पाख्योऽयं चैत्रादिषु यदूर्ध्वगः ।
चैत्राद्यनुप्रविष्टोऽसौ ऊर्ध्वसङ्क्रमगर्भवत् ॥ ५२ ॥

तदूर्ध्वसङ्क्रमयुतास्ततो[4]ऽप्यूर्ध्वोर्ध्ववत् स्थिताः ।
ततः संसर्पतो[5] यावदंहस्पति भवन्ति ये ॥ ५३ ॥

असङ्क्रान्त्यन्यसंक्रान्तिसंक्रान्तिद्वितयाश्रिताः ।
तेषां चैत्राविशेषत्व[6]मब्दत्वेऽङ्गतया स्थितम् ॥ ५४ ॥

असङ्क्रमस्तूर्ध्वगतो नोपयाति तदङ्गताम्[7] ।
यदि वा सोर्ध्वमासेन संयुक्तोऽसौ त्रयोदशः ॥ ५५ ॥

दिनषष्ट्यात्मकं मासं तद्युक्तं व्यवहारयेत् ।
त्रयोदशभिरेवाब्दमासैर्यद्वा तदन्वितम् ॥ ५६ ॥

[चान्द्रमासः]

अर्केन्द्वोर्भिन्नकक्ष्यावस्थितयोरपि सर्वदा ।
एकस्यामिव कक्ष्यायां लक्ष्ययो[8]रर्कतो विधोः ॥ ५७ ॥

वर्धते विप्रकर्षेण शौक्ल्यं[9] कार्ष्ण्यं च सन्निधेः ।
शुक्लकृष्णौ ततः पक्षौ स्यातां पूर्वापरौ च तौ ॥ ५८ ॥

पक्षद्वयसमारब्धश्चान्द्रमासः प्रकीर्तितः ।
चन्द्रबिम्बविकाराणां सर्वेषां तत्र सम्भवात्[10] ॥ ५९ ॥

व्याख्या—1. D. पूर्वत्र
2. A. स्पतिः
3. A. स्पतिर्वर्षत्वेङ्ग; D. वर्षत्वाङ्ग
4. D. युता ततो
5. A. संसर्पको; B. संसर्पयो
6. C. मेषात् चैत्रादि; D. om. शेषत्व
7. A. तदङ्गतः
8. C. रक्षयो
9. D. om. शौक्ल्यं
10. A. सम्भवेत्

अर्केन्द्वोः स्फुटतः[1] सिद्धास्त्रयो मासा मलिम्लुचाः[2] ।
इति च ब्रह्मसिद्धान्ते मलमासास्त्रयः स्मृताः ॥ ९ ॥

द्वाभ्यां द्वाभ्यां वसन्तादिर्मध्वादिभ्यामृतुः स्मृतः ।
मध्वादिभिस्तपस्यान्तैर्वर्षं द्वादशभिः स्मृतम् ॥ १० ॥

त्रयोदशभिरप्येकं वर्षं स्यादधिमासके ।
स्वोत्तरेणाधिमासस्य सम्बन्धो मुनिभिः स्मृतः ॥ ११ ॥

भानुना लङ्घितो मासो ह्यनर्हः सर्वकर्मसु ।
षष्टिभिर्दिवसैर्मासः कथितो बादरायणैः ॥ १२ ॥

इति केषुचिदब्देषु सन्ति मासास्त्रयोदश ।
श्रूयते [3]चतुर्यागादिष्वयमेव[4] त्रयोदश ॥ १३ ॥

[वर्षमासदिनलक्षणानि]

अयनद्वयसंवेद्यः सौरः संवत्सरः स्फुटम् ।
अस्तंगते रवेर्बिम्बे चित्रानक्षत्रसंयुतात् ॥ ६० ॥

[1]पूर्णेन्द्वोरुदयाद् यद्वा चैत्रोऽब्दादिः प्रकीर्तितः[2] ।
यतःकुतश्चिन्नक्षत्राद् यद्वा राकेन्दुसंयुतात् ॥ ६२ ॥

रवेः प्रत्यग्भ्रमेणैव प्रमितं सावनं दिनम् ।
वर्षमासदिनात्मातः कालो ज्ञेयः स्वलक्षणैः ॥ ६३ ॥

[ग्रहपर्ययाः]

दिव्यं दिनमित्यादि[3] (I. 14-22)—

[संख्याविन्यासः]

ये[4] यत्संख्याः[5] प्रतीयन्ते पदार्था लोकशास्त्रयोः ।
तेषां संख्यावतां संख्याप्रतीत्यनुपपत्तितः ॥ ६४ ॥

मूलम्— 1. A. B. अर्केन्दुस्फुटतः 2. A. मलिम्लुचः
3. B. C 1. 2. 5. 6. यागेयं मास एव (B. यागेय)
4. A. om its the line haplographically.

व्याख्या—1. A. B. C. सूर्येन्द्वोः 2. B. C. D. प्रतीयताम्
3. C. adds: मूलश्लो० 4. A. यो
5. A. C. संख्योः

[दिव्यदिनादिः]

दिव्यं दिनं तु सौरोऽब्दः[1], पितॄणां मास ऐन्दवः ।
सर्वेषां वत्सरोऽह्नां स्यात् षष्ट्युत्तरशतत्रयम् ॥ १४ ॥

[ग्रहादीनां युगपर्ययाः]

दिव्याब्दानां सहस्राणि द्वादशैकं चतुर्युगम् ।
सूर्यस्य पर्ययास्तस्मादयुतघ्नरदार्णवाः ॥ १५ ॥

खाश्विदेवेषुसप्ताद्रिशराश्चेन्दोः, कुजस्य तु ।
वेदाङ्गाहिरसाङ्काश्विकरा, ज्ञस्य स्वपर्ययाः ॥ १६ ॥

नागवेदनभःसप्तरामाङ्कस्वरभूमयः ।
व्योमाष्टरूपवेदाङ्गपावकाश्च बृहस्पतेः ॥ १७ ॥

अष्टाङ्कदस्रनेत्राश्विखाद्रयो भृगुपर्ययाः ।
भास्कराङ्करसेन्द्राश्च शनेः, शश्युच्चपातयोः ॥ १८ ॥

मुख्यार्थबाधे संख्यैव कथ्यते गुणवृत्तितः ।
अर्थभूतादिभिस्तद्वत्संख्या छन्दोविधायिभिः ॥ ६५ ॥

संख्या प्रख्याप्यते शब्दैर्नभः शून्यार्थवाचकम् ॥ ६६ ॥

[ग्रहादीनां युगपर्ययाः]

तस्मात्—

खाश्विदेवेषुसप्ताद्रिशराश्चन्द्रस्य पर्ययाः ।
वेदाङ्गाहिरसाङ्काश्विकरा भूमिसुतस्य ते ॥ ६७ ॥

बुधस्य नागवेदाभ्रशैलाग्न्यङ्कस्वरेन्दवः ।
स्वकेन्द्राक्रान्त[1]मध्यार्ककक्ष्यावृत्तमितं तु तत् ॥ ६८ ॥

बुधभार्गवयोर्वृत्तं शीघ्रघनीचोच्चवृत्तताम् ।
याति तस्मिन्[2] स्वगत्यैव चरतो बुधशुक्रयोः ॥ ६९ ॥

मूलम्— 1. A. B. सौराब्दः

व्याख्या—1. A. B. D. स्वकेन्द्राक्रान्त　　2. A. कोऽस्मिन्; C. केऽस्मिन्

नेत्रार्काष्टाहिवेदाश्च खखरामरदाश्विनः ।

[युगे सावनदिवसादिः]

खखाक्षात्यष्टिगोसप्तस्वरेषुशशिनो युगे ॥ १९ ॥

सावना दिवसाश्चार्क्षा मार्ताण्डभगणाधिकाः ।
अधिमासाः खनेत्राग्निरामनन्देषुभूमयः ॥ २० ॥

अयुतघ्नाब्धिवस्वेकशरा मासा रवेः स्मृताः ।
खव्योमेन्दुयमाष्टाभ्रतत्त्वतुल्यास्तिथिक्षयाः ॥ २१ ॥

खखषण्णवगोनन्दनेत्रशून्यरसेन्दवः ।
तिथयः, चान्द्रमासाः स्युः सूर्येन्दुभगणान्तरम् ॥ २२ ॥

युगोत्थाः पर्ययास्त्वेते तत् स्वशब्देन वर्णितम् ।
व्योमाष्टरूपवेदाङ्कपावकाश्च बृहस्पतेः ॥ ७० ॥

अष्टाङ्कवसुनेत्राश्विखाद्रयो भृगुपर्ययाः ।
भास्कराङ्करसेन्द्राश्च शनेस्तु युगपर्ययाः ॥ ७१ ॥

शश्युच्चपर्यया नेत्रार्काष्टौ वेदा[1] युगोदिताः ।
पातस्य पर्ययास्तत्र खखरामरदाश्विनः ॥ ७२ ॥

[भूभ्रमणम्]

आर्क्षाः[2] खखेषुसप्ताग्निनेत्राश्व्यष्टेषुभूमयः ।
ऋक्षपर्ययतुल्यं च प्राङ्मुखं भ्रमणं भुवः ॥ ७३ ॥

[युगे सावनदिवसादिः]

रव्यादेरुदयाः स्वस्वभगणोनार्क्षपर्ययाः ।
खखाक्षात्यष्टिगोसप्तस्वरेषुशशिनो युगे ॥ ७४ ॥

सावना दिवसाश्चार्क्षा मार्तण्ड[3]भगणाधिकाः ।
द्वादशघ्नाश्च रव्यब्दा रविमासाः प्रकीर्तिताः ॥ ७५ ॥

अयुतघ्नाब्धिवस्वेकशरास्ते च युगोद्भवाः ।
चान्द्रा मासाश्च[4] सूर्येन्द्वोर्भगणान्तरतो युगे ॥ ७६ ॥

व्याख्या—1. A. नेत्राष्टार्कवेदा; B. C. नेत्रार्काष्टवेदा 2. A. भार्क्षं; B. भार्क्षाः
3. A. मार्तण्ड 4. C. चान्द्रमासाश्च

ते चात्र नेत्रहुतभुग्वेदाम्बुधिगुणेषवः ।
मासानां सौरचान्द्राणां विशेष[1]स्त्वधिमासकः ॥ ७७ ॥

युगोदिताः खनेत्राग्निरामनन्देषुभूमयः ।
चान्द्रसावनयोर्भेदा दिनयोरवमोद्भवः ॥ ७८ ॥

खव्योमेन्दुयमाष्टाभ्रतत्त्वतुल्यास्तिथिक्षयाः ।
खखषण्णवगोनन्दनेत्रशून्यरसेन्दवः ।
तिथयः स्युर्युगे चान्द्रमासास्त्रिशद्गुणास्तु ते ॥ ७९ ॥ इति ।

किञ्च—

[ग्रहयुगानि ग्रहसामान्ययुगं च]

ग्रहाणां प्राङ्मुखी भुक्तिः स्वव्यापारकृतोदिता ।
दृक्संवादविशुद्धासौ गृह्यते गोलवित्तमैः ॥ ८० ॥

यत्कृतो निखिलः कालो वर्षमासदिनादिकः ।
ग्रहभुक्ति विना यस्मान्न कालो जातु जायते ॥ ८१ ॥

तथा[2] कृत्स्नस्य कालस्य व्याप्तिस्तदवगम्यते ।
ग्रहाणां यत्र सर्वेषां भुक्तिर्भगणरूपिणी ॥८२ ॥

सावनै[3]र्द्युगणैर्व्याप्ता[4] निरंशत्वेन तद्युगम् ।
तादृशानि युगानि स्युरन्तरा सुबहूनि चेत् ॥ ८३ ॥

पूर्वाचार्यानुरोधेन तादृशं कथितं युगम् ।
अत्रान्तरा बहूनि स्युः कुजादीनां युगानि हि ॥ ८४ ॥

रसाद्रिबाणा भगणा नियता रविसावनैः ।
नवाष्टज्वलनाकाशमूर्च्छनाप्रमितै रवेः ॥ ८५ ॥

चन्द्रस्यापि षडङ्कर्तुशैलाष्टद्विरदाश्विभिः ।
नियताः स्युः शराद्रिषष्टबाणाङ्काष्टाहिभूधराः[5] ॥ ८६ ॥

नियता भगणाः कौजा भूपाश्व्यब्ध्यद्रिसायकाः ।
बाणाद्रिपुष्कराङ्काद्रिवेदाब्ध्यङ्कहुताशनैः ॥ ८७ ॥

बुधस्य वेदबाणाद्रिवेदाङ्कार्णव[6]भूमिभिः ।
बाणार्कहुतभुङ्नन्दशक्वरीविश्वसम्मिताः ॥ ८८ ॥

व्याख्या—1. D. विश्लेष　　2. C. तया for तथा
3. D. सागर्णै　　4. A. B. न्यासा
5. A. भूरयः
6. A. C. वेदाङ्काणयः (C. °य); B. वेदाङ्का-gap-य

गुरोरङ्काभ्रनेत्राहिभूमिभिर्नियता गणैः ।
शर्विवसुबाणाङ्कनागस्तम्बेरमाग्नयः ॥ ८९ ॥

भगणैर्नन्दवस्वेकशरवस्विषुभिर्भृगोः ।
बाणार्कपुष्कराङ्काब्धिरूपवह्निनिशाकराः ॥ ९० ॥

नियता भगणैर्मन्दिर्गुणेष्वङ्करसाग्निभिः[1] ।
बाणाद्रिपुष्कराङ्काद्रिवेदाब्ध्यङ्कहुताशनाः ॥ ९१ ॥

रूपाभ्रखाब्धयस् तोङ्गा भगणा नियता दिनैः[2] ।
खेष्वद्रिहुतभुग्वह्निनन्दाब्दैरर्कसावनैः[3] ॥ ९२ ॥

पातस्य हुतभुग्दन्त[4]यमला नियता दिनैः ।
शर्विभूमिनन्दाद्रिमहीधरशरेन्दुभिः ॥ ९३ ॥

शराद्रिसुरनन्दार्के रसाभ्राग्नीन्दवोऽधिकाः ।
तिथयो वस्त्रामग्निपुष्कराब्धिगुणेन्दवः ॥ ९४ ॥

तिथिक्षयाश्च सप्ताभ्ररसाग्निवसवो दिनैः ।
तत्त्वाश्वाङ्केषु[5]नेत्राक्षैर्नियता रविसावनैः ॥ ९५ ॥

सन्तीत्थं भगणाद्यैः स्वैर्नियता रविसावनाः ।
निरंशत्वं तु सर्वेषां युगपद् यत्र तद् युगम् ॥ ९६ ॥

इति चेत् तादृशान्यत्र सन्त्येव सुबहून्यपि ।
पूर्वाचार्यानुरोधेनैवोक्तमेतादृशं युगम् ॥ ९७ ॥

गतिभेदेऽभ्युपगते तस्मिन्नेव युगे ततः ।
भगणा एव केषांचित् ग्रहाणां परिवर्तिताः ॥ ९८ ॥

संस्कारच्छद्मनैवान्ये यथा मध्ये न्यधुर्भिदाम्[6] ।
सावनो द्युगणो भास्करोक्त एव प्रदर्शितः ॥९९॥

[अधिकावमयुक्तिः]

अधिकावमयोरुक्तिर्यदेषा युगनिष्ठयोः ।
न परं द्युगणार्थं सा[7] किन्त्वर्केन्द्वोः स्वमध्यमे ॥ १००॥

व्याख्या—1. D. रसादिभिः 2. B. गणैः
3. B. नन्दार्कैरकं सावनैः
4. A. पातभूस्यनभूर्दन्तः; B. पातस्य हूतभूर्दन्त
5. A.B. तत्त्वाश्चाङ्केषु
6. A. न्युदुर्भिदाम् ; B. न्यपुर्भिदाम् ; C. व्यपुर्भिदाम् ; D. यधुर्भिदाम्
7. A. या

आचार्यसम्मतान् मार्गभेदान् दर्शयितुं स्फुटम् ।
ग्रहाः सर्वे यथासिद्धयविवादं ग्रहान्तरात् ॥ १०१ ॥

अधिकावमयोः शेषात् तद्वत् सावयवावपि ।
यद्वा चान्द्रमसा मासाः सूर्येन्द्वोर्भगणान्तरम् ॥ १०२ ॥

सूर्यातिरिक्तेन्दुगतिश्चान्द्रः कालो भवेद् यतः ।
तथाहि वृत्तमार्गेण भ्राम्यतोर्ग्रहयोर्द्वयोः ॥ १०३ ॥

भगणान्तरतः स्वल्पा[1]नल्पभुक्त्योर्युतिर्भवेत् ।
स्वल्पभुक्त्यतिरिक्तान्यगत्या योगस्तयोस्ततः ॥ १०४ ॥

चान्द्रा मासाश्च[2] सूर्येन्द्वोर्योगा एव युगोद्भवाः ।
पर्ययान्तरतोर्केन्द्वोश्चान्द्रमासा भवन्त्यतः ॥ १०५ ॥

अधिकाः सौरमासेभ्यश्चान्द्राः स्युरधिमासकाः ।
सौरमासाश्च[3] ते द्वादशाभ्यस्ताः सूर्यवत्सराः ॥ १०६ ॥

सूर्यपर्ययतुल्यास्ते तदूनाच्चन्द्रपर्ययात् ।
द्वादशघ्नार्कभगणे त्यक्ते स्यादधिमासकः ॥ १०७ ॥

अतोऽधिकसमानीतं मध्यमं ग्रहमध्यवत् ।
त्रयोदशघ्नेऽर्कमध्ये क्षिपेच्चन्द्रस्य सिद्धये ॥ १०८ ॥

त्यक्तेऽस्मिंश्चन्द्रमध्याद् वा त्रयोदशहृतो[4] रविः ।
अधिवत्सरशश्यब्दनीतयोर्वाथ मध्ययोः[5] ॥ १०९ ॥

विश्लेषो वार्कमध्यस्य द्वयोर्भेदोऽर्कपर्ययः ।
यथा भेदोऽधिमासः स्यान्मासयोः सौरचान्द्रयोः ॥ ११० ॥

सौरचान्द्राब्दयोस्तद्वद् विशेषोऽ[6]प्यधिवत्सरः ।
त्रयोदशहृतेऽर्कस्य पर्यये चन्द्रपर्ययात् ॥ १११ ॥

त्यक्ते सत्यधिमासानामुत्पत्तिः प्राक् प्रदर्शिता ।
शश्यब्दस्तत्र रव्यब्दादधिकाब्दाधिको भवेत् ॥ ११२ ॥

चान्द्रमासाः सौरमासावधिमासाधिका यतः ।
त्रयोदशघ्ने शश्यब्दे रव्यब्दाः स्युस्त्रयोदश ॥ ११३ ॥

अधिकाब्दाश्च तावन्तश्चान्द्राब्दास्तद्युतिर्यतः ।
त्रयोदशघ्नोऽधिकाब्दोऽधिकः स्वेनाधिमासकः[7] ॥ ११४ ॥

व्याख्या—1. D. भगणान्तरस्स्वल्पा　　2. D. चान्द्रमासाश्च
3. A. वारमासाश्च; B. D. सौरमास्याश्च　　4. A. B. हृतो
5. C. Hapl. om. after मध्ययोः to चान्द्रयोः of verse 110.
6. B. विश्लेषो　　7. B. D. मासतः

द्वादशघ्नोऽधिकाब्दो[1] येनाधिमास इति स्मृतः ।
त्रयोदशघ्नाः सूर्यस्य पर्ययाः साधिमासकाः ॥ ११५ ॥

चान्द्राः स्युर्भगणास्तत्र यदि चान्द्रोऽपि वत्सरः ।
त्रयोदशघ्नः क्रियते सोऽधिकाब्दाधिकस्ततः ॥ ११६ ॥

अतो विश्वघ्नशश्यब्दादधिकाब्दे विशोधिते ।
शिष्यते चन्द्रभगण इत्येतदुपपद्यते ॥ ११७ ॥

ततो युगाधिकहतात् क्ष्माहैरवमशेषतः ।
लब्धेन युक्तादधिकशेषाच्चान्द्रमसैर्दिनैः ॥ ११८ ॥

लब्धं दिनादिकं त्याज्यं चंद्रादितिथिसञ्चयात्[2] ।
केवलाद् विश्वनिहताच्चार्कचन्द्रौ लवादिकौ ॥ ११९ ॥

स्यादेतद्यदि विज्ञातास्तिथयोऽवयवान्विताः ।
तदभावे[3] कथं याततिथीनां सूक्ष्मता भवेत् ॥ १२० ॥

तदर्थं सावनदिनैर्व्यष्टिघ्नादवमशेषतः ।
लब्धं[4] कलादि चंद्रादेर्यातासु तिथिषु क्षिपेत् ॥ १२१ ॥

ततः प्राग्वत्समानीतमधिशेषफलं त्यजेत् ।
अर्केन्द्वोर्मध्यमविधावुपायान्तरमीदृशम् ।
दर्शयन् भगणान् कृत्स्नान् युगसम्बन्धिनो व्यधात् ॥ १२२ ॥

[ग्रहयोगेन भगणपरीक्षणम्]

युगादौ भगणादीनां किंकृतेयं व्यवस्थितिः ।
अतीन्द्रियत्वात् प्रत्यक्षं यत्र नैव प्रवर्तते ॥ १२३ ॥

तन्मूलादनुमानाच्च दुष्करस्तद्विनिश्चयः ।
न ग्रहग्रहयोगादेः प्रत्यक्षविषयत्वतः ॥ १२४ ॥

ज्ञातभुक्तेर्द्वयोर्योगात् सिद्ध्येत् तदितरो ग्रहः ।
अतुल्यभुक्त्योरुभयोर्भुक्त्या स्वल्पातिरिक्तया ॥ १२५ ॥

वृत्ताकारेण मार्गेण भ्रमतोर्योगसम्भवः ।
स्वल्पगत्यन्विताद्योगात् स्यादनल्पगतिस्ततः ॥ १२६ ॥

योगोनितानल्पगतेः स्वल्पभुक्तिर्भवेदपि ।
योगः स्वल्पानल्पभुक्त्योर्भुक्त्यन्तरकृतो यतः ॥ १२७ ॥

व्याख्या—1. B. धिमासो for धिकाब्दो   2. A. सम्भवात्
3. A. C. तदाभावे   4. A. प्रलब्धं

ततः क्षित्यर्कयोगोनावर्कभुक्तिः क्षितेः भ्रमात् ।
अर्केन्द्वोर्योगसंयुक्तावर्काच्चन्द्रो भवेत् तथा ॥ १२८ ॥

चन्द्रभौमादियोगोनाच्चन्द्रात् भौमादयस्तथा ।
ग्रहणग्रहयोगादेस्ततः प्रत्यक्षसिद्धतः ॥ १२९ ॥

उक्तरूपेण मार्गेण तद्व्यवस्था न दुष्करा ।
ननु नीचोच्चवृत्ते स्वे भ्राम्यति प्रतिमण्डलम् ॥ १३० ॥

ग्रहस्तत्परिधौ नित्यं स्वगत्या प्राङ्मुखं व्रजेत् ।
अतो निरर्गलत्वं तु ग्रहभुक्तेः प्रसज्यते ॥ १३१ ॥

सत्यं भूयःपरीक्षातः सा बुधैस्त्वनुमीयते ।
नीचोच्चवृत्ते स्वोच्चस्थकेन्द्रं तत्प्रतिमण्डलम् ॥ १३२ ॥

यात्युच्चभुक्त्या तन्नेम्यां प्राङ्मुखं गच्छति ग्रहः ।
विप्रकर्षः परो यत्र तत्र नीचोच्चकेन्द्रतः ॥ १३३ ॥

तत्रोच्चं[1] कल्प्यते नीचं चक्रार्धान्तरितं ततः ।
सन्निकर्षः परस्तत्र ग्रहनीचोच्चकेन्द्रयोः ॥ १३४ ॥

तुल्यकालान्तरितयोः पार्श्वयोरुभयोर्यतः ।
विप्रकर्षो भवेत् तुल्यो नीचोच्चजनितो हि सः ॥ १३५ ॥

तन्मध्यगतमुच्चं च नीचं च प्रतिमण्डले ।
अन्तरं पार्श्वयोस्तुल्यकालयोर्भिन्नमन्यतः[2] ॥ १३६ ॥

अत्यल्पो विप्रकर्षः स्याद्यतस्तत्पार्श्वयोर्द्वयोः ।
तन्मध्यगतमुच्चं तत्रानल्पे नीचसंस्थितिः ॥ १३७ ॥

[3][स्वदोःफलचापाद्वा प्रसाध्या] [4]तन्महदल्पता ।
नीचोच्चवृत्तव्यासार्धं दोःफलं परमं भवेत् ॥ १३८ ॥

तत्कोटिफलयुग्व्यासदलेनोर्ध्वंस्थितो[5] ग्रहः ।
उच्चासन्नस्तदूनेन नीचासन्नस्त्वधोगतः ॥ १३९ ॥

तस्य तद्दोःफलस्यापि कर्णौ वर्गयुतेः पदम् ।
नीचोच्चवृत्तग्रहयोः कर्णः स्याद् विवरं सदा ॥ १४० ॥

कर्णे महति बिम्बोऽल्पो ग्रहाणां स्वल्पके महान् ।
बिम्बानां महदल्पत्वं स्पष्टं स्याद् ग्रहणादिषु ॥ १४१ ॥

व्याख्या—1. A. B. D. ततोच्चं 2. A. मन्यदा

3. Mss. read स्वदोःफलावापोद्वापसाध्या (A. om. दोः)

4. For त following, A has क, B. क with त written above and D. त, correctly. 5. B. स्थितौ

व्यक्तं परीक्षणीयेत्थं[1] स्थितिरत्नोच्चनीचयोः ।
नीचोच्चवृत्तव्यासार्धं तत्रान्त्य[2]फलसंज्ञितम् ॥ १४२ ॥

एतदर्थं हि तत्कक्ष्याप्रतिमण्डलयोर्द्वयम् ।
कक्ष्यामण्डलकेन्द्रस्थं नीचोच्चं च प्रकल्प्यते ॥ १४३ ॥

भगोलमध्यकेन्द्रं च भवेन्नीचोच्चमण्डलम् ।
प्रतिमण्डलकेन्द्रं च स्वोच्चे नीचोच्चमण्डले ॥ १४४ ॥

प्रतिमण्डलतो गच्छन् स्वया गत्यान्वहं ग्रहः ।
कक्ष्यावृत्ते स्वनीचोच्चवृत्तमध्यस्थकेन्द्रके ॥ १४५ ॥

प्रतिमण्डलतुल्येऽथ भगोले वा विधीयते ।
स्फुटीकरणतो येन गतिः सैवाव्यवस्थिता ॥ १४६ ॥

व्यवस्थितैव लक्ष्येत ग्रहाणां प्रतिमण्डले ।
स्पष्टीकरिष्यते चैतदुपरि स्फुटकर्मणि ॥ १४७ ॥

प्रत्यक्षसिद्धात् सम्बन्धात् कालभुक्त्योरितीदृशात् ।
इयत्ता भगणादीनां युगादिष्वनुमीयते ॥ १४८ ॥

आचार्यैस्तदिदं[3] ज्योतिर्मीमांसायां च दर्शितम्[4] ॥ १४९ ॥

[अनुमानादिना भगणपरीक्षणम्]

अर्थापत्त्यनुमानाभ्यां भगणादिर्नियम्यते ।
युगादिषु यतस्तत्र न स्यादन्धपरम्परा ॥ १५० ॥

भगोलमध्यकेन्द्रं यत् कक्ष्यावृत्तं द्युचारिणाम् ।
[ये][5] तु तत्परिधौ यान्ति[6] ग्रहास्ते तुल्यभुक्तयः ॥ १५१ ॥

भगोलविषया भुक्तिस्तुल्यरूपा यतो भवेत् ।
वृत्तयोः केन्द्रभेदेन गत्योरत्र विभिन्नता ॥ १५२ ॥

अतस्तत्केन्द्रतः स्वान्त्यफलान्तरितकेन्द्रके ।
निजोच्चदिशि तत्तुल्ये[7] यान्त्यमी प्रतिमण्डले ॥ १५३ ॥

व्याख्या—1. A. D. णीयेर्थं   2. A. तत्राम्य
3. A. सुराचार्यैरिदं; B. आचार्यैरिदं
4. A. प्रदर्शितम् for च दर्शितम्   5. Mss. न for ये
6. D. यन्ति
7. A. निजोच्चदर्शितं तुल्ये ; B. निजोच्चा दिशि तत्तुल्ये ; D. निजोच्च-दिशतत्तुल्ये

भगोलापावनाद् भुक्तेस्तस्याः स्याद् भिन्नरूपता ।
प्रत्यहं भिन्नरूपत्वं भुक्तीनां चानुभूयते ॥ १५४ ॥

भुक्तयोरनयोरन्त्यफलतो विप्रकृष्टता ।
प्रत्यक्षेणावगम्येत मध्ये नीचोच्चयोर्द्वयोः ॥ १५५ ॥

कालेन यावता स्वोच्चाद् ग्रहो नीचाश्रितो भवेत् ।
नीचतोऽपि व्रजेदुच्चं द्वयोरपि तदर्धयोः ॥ १५६ ॥

नीचोच्चवृत्तव्यासार्धेनाग्रतः पृष्ठतोऽपि च ।
कक्ष्यामण्डलनीचोच्चस्थितो मध्यान्न भिद्यते ॥ १५७ ॥

किन्तु स्वान्त्यफलेनास्मादधऊर्ध्वस्थितो भवेत् ।
तद्बिम्बमहदल्पत्ववशादेतत्तु गम्यते ॥ १५८ ॥

ग्रहणग्रहयोगादौ तत्तु स्पष्टीकरिष्यते ।
स्वोच्चतो नीचतो वापि विप्रकर्षो ग्रहस्य यः ॥ १५९ ॥

ततः स्वान्त्यफलव्यासार्धाभ्यां त्रैराशिकागतम् ।
मध्यस्फुटान्तरालं स्यात् सर्वत्रापीष्टकालजम् ॥ १६० ॥

ततः स्वान्त्यफलव्यासवलं नीचोच्चमण्डलम् ।
कक्ष्यावृत्तस्य परिधौ याति नीचोच्चमण्डलम् ॥ १६१ ॥

मध्यभुक्त्याथवा तस्य परिधौ प्रतिमण्डलम् ।
कक्ष्यामण्डलकेन्द्रस्थ[1]स्वकेन्द्रस्योच्चभुक्तितः[2] ॥ १६२ ॥

क्षिप्येत यदि तत्राद्यराश्योर्यस्तु महान् भवेत् ॥ ६६१ ॥

यश्चान्ययोस्तद्युतितः स्वल्पद्वययुतिं त्यजेत् ।
स्यादन्तरद्वययुतिरथ यत्रान्तरान्तरम् ॥ ६६२ ॥

व्याख्या—1. A. रन्तराद् दलम् 2. Mss. read तयोर्योगान्तरा वा

कार्यं तत्राल्पमहतोर्योगावन्ययुतिं त्यजेत् ।
शिष्टं द्वयोरन्तरयोरन्तरं स्यादितीरितम् ॥ ६६३ ॥

"अन्तरयोगे कार्ये राशिद्वयायो[1]र्महद्युतेस्त्याज्या ।
इतरयुतिरन्तरे चेन्न्यूनाधिकयोगतोऽन्ययुतिः" ॥ ६६४ ॥

यत्रेष्टकर्णमूले वा तदग्रे वा महाभुजे ।
संयुते तत्र महतोर्भुजयोर्वर्गयोगतः[2] ॥ ६६५ ॥

त्याज्योऽन्यकृतियोगोऽतः प्रतिदोर्गतयोगतः ।
संयुज्येते तदा ह्यधद्वयोस्थमहदल्पयोः ॥ ६६६ ॥

दोर्वर्गयोगः कार्योऽतः प्रतिदोर्वर्गयोगतः ।
प्रतिदोर्वर्गयोगोनाद् दलं यत्तत् समीहितम् ॥ ६६७ ॥

यत्रैकभवयोर्दोष्णोर्महती कर्णमूलगा ।
[3]तदग्रगान्योस्थमहाभुजा तत्र महद्युतेः[4] ॥ ६६८ ॥

यतस्त्याज्योऽल्पयोगतः प्रतिदोर्वर्गयोगतः ।
इतरप्रतिदोर्वर्गयोगोनार्धमिहापि तत् ॥ ६६९ ॥

तदेव प्रतिदोर्वर्गयोगार्धद्वितयान्तरम् ।
सर्वत्रातः प्रतिभुजावर्गयोगदलान्तरात् ॥ ६७० ॥

इष्टकर्णोद्धृतं भूम्यां लम्बपातद्वयान्तरम् ।
प्रतिदोर्वर्गयोगार्धविवरस्य कृतेस्ततः[5] ॥ ६७१ ॥

यदीष्टकर्णवर्गाप्ता सा लम्बान्तरभुजाकृतिः ।
लम्बान्तरकृतित्यागादितरश्रुतिवर्गतः ॥ ६७२ ॥

लम्बयोगकृतिः स्यादित्यपि वेद्यं यथोदितम् ॥ ६७२ ॥

"आबाधयोरेककुप्स्थयोर्यत्स्यादन्तरं तत्कृतिसंयुतस्य ।
लम्बैक्यवर्गस्य पदं द्वितीयकर्णो भवेदि"त्यत एव सिद्धम् ॥ ६७३ ॥

(लीलावती, १८१)

व्याख्या—1. A. द्वयतो   2. A. C. योगग:

3. A. उदग्र   4. B. महद्युते

5. C. कृतेऽस्तु ते

लम्बैक्यवर्गगुणिताविष्टकर्णस्य वर्गतः ।
तुर्यांशश्चतुरश्रक्षेत्रफलस्य कृतिर्भवेत् ॥ ६७८ ॥

यतो लम्बगुणं[1] भूमेर्दलं त्र्यश्रफलं[2] भवेत् ।
त्र्यश्रद्वयोत्थफलयुक् चतुर्भुजफलं भवेत् ॥ ६७५ ॥

यतश्चतुर्भुजस्यास्य भवेत् त्र्यश्रद्वयात्मता[3] ।
यत्रेष्टकर्णवर्गघ्नादितरश्रुतिवर्गतः ॥ ६७६ ॥

त्यज्येत लम्बान्तरजा[4] कृतिः साप्यत्र हन्यताम् ।
वर्गेणेष्टश्रुतेर्यस्मात् कार्या सच्छेदतानयोः ॥ ६७७ ॥

अतो लम्बान्तरकृतिं चान्यकर्णकृतिं पृथक् ।
हत्वेष्टकर्णवर्गेण फलवर्गस्तदन्तरम् ॥ ६७८ ॥

द्विगुणोऽयमतोऽस्माच्चतुरंशो यः स केवलः ।
फलवर्गो यतो भूम्यर्धघ्नो लम्बः फलं भवेत् ॥ ६७९ ॥

इष्टकर्णकृतिर्हारो यत्तदर्धकृतिर्गुणः ।
चतुर्घ्नतुर्यो वर्गो यद् द्विगुणार्धस्वमूलयोः ॥ ६८० ॥

अतः प्रतिभुजार्धद्वितयकृत्यन्वयात् पदम् ।
तादृशं कृतियोगं त्यक्त्वा तच्छिष्टकृतिं त्यजेत् ।
कर्णघातार्धवर्गः स्यात् फलवर्गो यथोदितम् ॥ ६८१ ॥

"प्रतिभुजदलकृतियुत्योर्यदन्तरं यच्च कर्णघातदलम् ।
वर्गान्तरपदमनयोश्चतुर्भुजे क्षेत्रफलमधिकम्" ॥ ६८२ ॥

इति ।

कर्णाग्रश्रितयोर्दोष्णोर्घातोन्याहतिसंयुतः ।
तथान्यकर्ण[5]सम्बन्धि प्रतिदोर्घातयुक् परः ॥ ६८३ ॥

आद्यौ गुण्यौ क्रमाद् व्यस्तं तौ हारौ गुणकोऽपरः ।
लब्धावाद्यद्वितीयौ स्तां पृथक्कर्णावितीरितम् ॥ ६८४ ॥

व्याख्या—1. A. लम्बान्तरं (wr.); C. लम्बाणां
2. A. C. तत् त्रिफलं   3. A. द्वयोत्थता
4. B. लम्बान्तरजः   5. A. B. खण्ड for कर्ण

इत्युक्तन्यायतः कर्णसंवर्गो यदि वीयते ।
गुणघ्नाद् गुण्यघातात् स हारघातेन लभ्यते ॥ ६८५ ॥

अत्राद्यराश्योर्घातो यः सैव गुण्याहतिर्यतः ।
स एव हारघातोऽतस्तुल्यत्वान्नष्टयोर्द्वयोः ॥ ६८६ ॥

लभ्यते गुण एवातः फलत्वेन ततः स्थितम् ।
प्रतिबोर्घातयोगो यः सः स्यात्कर्णाहतिस्त्विति ॥ ६८७ ॥

तद्वर्गवर्गतस्त्याज्यमिष्टकर्णार्धसंगुणम्[1] ।
लम्बपातान्तरकृति शिष्टं फलकृतिर्भवेत् ॥ ६८८ ॥

इह प्रतिभुजावर्गयोगयोर्भवतो वलम् ।
इष्टकर्णेन हार्यं भूयो गुण्यं तत्फलेन तम्[2] ॥ ६८९ ॥

यतोऽतः प्रतिबोर्वर्गयोगद्वितयतुर्ययोः ।
या भिदा सैव नेयात्र ततः प्रतिभुजार्धयोः ॥ ६९० ॥

वर्गयोगद्वितययोरन्तरेणापि लभ्यते ।
यतो यत्कृतितुल्यांशः स तद्दलकृतेः समः ॥ ६९१ ॥

घातार्धतुल्यो वलयोर्घातो द्विगुणितो यतः ।
अतो घातो द्विगुणितो प्रतिबोर्वलयोः पृथक् ॥ ६९२ ॥

यो तयोः संयुतेस्तुल्यं कर्णघातवलं मतम् ।
योगभेदार्द्धयोरेको राशिः सोऽतः परः पुनः ॥ ३९३ ॥

प्रतिबोरर्धवर्गद्वितययोगद्वयान्तरम् ।
तौ द्वौ राशी ययोर्योगान्तरघातात्[3] फलं भवेत् ॥ ६९४ ॥

यद्वान्तरं तयोर्योगश्चेत्थमत्र निरूप्यताम् ।
भूमुखार्धहतौ द्विघ्न्यां युञ्ज्यात् कृतियुतं तयोः ॥ ६९५ ॥

अन्यद्द्वोरर्धघाताद् द्विघ्नात् तत्कृतियुतिं त्यजेत् ।
तयोर्योगस्तु योगान्तरयोरन्यतरो भवेत् ॥ ६९६ ॥

व्याख्या—1. C. संगुण: 2. A. C. तदल्पेन तत्

3. C. Hapl. om. after घातात् to घातात् in the third line below.

पार्श्वयोर्वलघाते द्विघ्ने तत्कृतियुतिं[1] क्षिपेत् ।
भूमुखार्धहते द्विघ्न्यास्त्याज्यं स्यात् तत्कृतिद्वयम् ॥ ६९७ ॥

तयोर्योगश्च योगान्तरयोरन्यतरो भवेत् ।
वर्गयोगो द्वयो राश्योर्द्विघ्नघातेन संयुतः ॥ ६९८ ॥

हीनो वा तत्पदे राश्योर्योगभेदौ यतस्ततः ।
[2]उक्ता यत्कृतियुत्यूनद्विघ्नघातस्य योज्यता ॥ ६९९ ॥

तदाधिक्यात् कृतियुतेस्ततः शिष्टमृणं मतम् ।
[3]अतो भूमुखयोरर्धयोगवर्गाद्यदान्ययोः ॥ ७०० ॥

दोष्णोरर्धान्तरकृतिस्त्यक्तव्या स्यात् तदा द्वयोः ।
वर्गात्मकत्वात् तद् भेदो राश्योर्वर्गान्तरं मतम् ॥ ७०१ ॥

भूमुखार्धयुतौ तस्मात् पृथक् पार्श्वार्धदोर्भिदाम् ।
क्षिपेत् त्यजेच्च तौ राशी स्यातां योगान्तरात्मकौ ॥ ७०२ ॥

पार्श्वयोरर्धविवरं योज्यं यत्रोक्तयुक्तितः ।
महद्युतिस्वल्पभेदात् तत्र सिद्धयेच्च तद्युतम् ॥ ७०३ ॥

कार्यान्तरवियोगेऽत्र स्वल्पं योज्यं महत् त्यजेत् ।
तदन्तरवियुक्तं स्यादथवेत्थं नयेदिमौ ७०४ ॥

सर्वदोर्बलयोगात् तत्कृत्स्नं पार्श्वभुजां कृशाम् ।
त्यजेत् पृथक्स्थान्महतीं चात्र शिष्टौ क्रमादिमौ ॥ ७०५ ॥

एवं पार्श्वस्थदोरर्धयोगादर्धाद् भिदा कृतिम् ।
मुखभूम्यर्धयोस्त्याज्या यदत्राप्येवमूह्यताम् ॥ ७०६ ॥

सर्वदोर्वलयोगात्तन्मुखं त्याज्यं पृथङ् महीम् ।
तौ द्वौ चतुर्णां घातः स्यात् फलवर्गो यथोदितम् ॥ ७०७ ॥

"सर्वदोर्युतिदलं चतुःस्थितं बाहुभिर्विरहितं च तद्युतेः ।
मूलितं नियतकर्णके फलं स्पष्टमेवमुदितं त्रिबाहुके" ॥ ७०८ ॥

(लीलावती, १६६)

इति ।

व्याख्या — 1. A. तत्कृतिं 2. C. उक्तयत्कृति
3. A. भवो

कर्णत्रयाहृतिवलाद् व्यासेनाप्येतवाप्यते ।
यदुक्तं "कर्णयोर्घाताद् व्यासाप्तो लम्ब" इत्यसौ ॥ ७०९ ॥

लम्बयोगसमोऽतोऽयमन्यकर्ण[1]बलाहृतः ।
चतुर्भुजक्षेत्रफलं भवतीत्युपपद्यते । ७१० ॥

कर्णत्रयाहृतिवलात् फलाप्तं व्यास इत्यपि ।
तत एव च कर्णत्रितयवर्गसमाहृते ॥ ७११ ॥

फलकृत्या चतुर्घ्न्याप्तं यत् सा व्यासकृतिर्भवेत् ।
षोडशघ्नी फलकृतिर्यत्तया तूक्तघाततः ॥ ७१२ ॥

भवेद् व्यासार्धवर्गश्चेत्युपपन्नं यथोचितम् ।
दोष्णां द्वयोर्द्वयोर्घातयुतीनां तिसृणां वधे[2] ॥ ७१३ ॥

एकैकोनेतरत्र्यैक्यचतुष्के वधभाजिते ।
लब्धमूलेन यद्वृत्तं विष्कम्भार्धेन निर्मितम् ॥ ७१४ ॥

सर्वं चतुर्भुजं क्षेत्रं तस्मिन्नेवावतिष्ठते ।
यत्सर्वतोर्युतिदलमेकैकभुजवर्जितम् ॥ ७१५ ॥

द्विगुणेनामुना तुल्यमेकैकोनेतरत्रियुक् ।
तद्घातः षोडशगुणं फलवर्गो भवेद् यतः ॥ ७१६ ॥

चतुष्कस्थो द्विगुणितः षोडशघ्नो भवेदतः ।
कर्णकृत्या हतेस्तेनाऽऽप्यते व्यासार्धजा कृतिः ॥ ७१७ ॥

जीवाभिरेव तद्व्याससिद्धिरेवमुदीरितम् ॥ ७१८ ॥

[वृत्तान्तर्गतचतुरश्रफलन्यायस्य त्र्यश्रक्षेत्रफले अतिदेशः]

चतुरश्रफलन्यायस्त्र्यश्रक्षेत्रेऽतिदिश्यते ।
यत्सर्वदोर्युतिदलं चतुर्धा परिकल्पितम् ॥ ७१९ ॥

तदिदं कर्णयोगार्धं भूम्यर्धेन च संयुतम् ।
तत्र भूमिविहीनं यद् यच्च केनाप्यनूनितम् ७२० ॥

व्याख्या—1. C. Hapl. om. after कर्ण to कर्ण in the second line below.

2. C. लये for वधे

भूम्यर्धयुक्तहीने द्वे[1] कर्णयोगदले उभे ।
लम्बवर्गसम: प्रायस्तयो: संवर्ग इष्यते ।। ७२१ ।।

राश्योर्योगान्तराभ्यासो यतो वर्गान्तरं मतम् ।
यत्संवर्गयोर्युतिदलं भुजाभ्यां रहितं क्रमात् ।। ७२२ ।।

भुजान्तरार्धयुक्तोनं भूम्यर्धद्वितयं हि तत् ।
ततस्तयोर्द्वयोर्घातो हीनो भूम्यर्धवर्गत: ।। ७२३ ।।

भुजान्तरार्धवर्गेणेत्येतद् वर्गे प्रदर्शितम् ।
"इष्टोनयुग्राशिवध: कृति"रित्युदितं यत: ।। ७२४ ।।

आबाधाभुजयोर्वर्गान्तरं लम्बकृतिर्यत: ।
भुजयोर्वर्गयोगार्धादाबाधावर्गयोर्दले[2] ।। ७२५ ।।

विशुद्धे लम्बवर्गोऽत्र शिष्यते त्रिभुजे यत: ।
भुजयोगार्धवर्गादत्राबाधायोगयोर्दले ।। ७२६ ।।

वर्गीकृत्य विशुद्धेऽस्मिन् अधिकं लम्बवर्गत: ।
बाह्वोराबाधयोश्चान्तरार्धयोर्वर्गभेदत: ।। ७२७ ।।

तथाहि वर्गयोगार्धे घाते भेदकृतेर्दलम् ।
योगार्धवर्गे तु तयोर्घातस्तद्भेदवर्गत: ।। ७२८ ।।

तुर्यांशश्च स्थित: सोंऽशोऽप्यन्तरार्धकृते: सम: ।
योगार्धवर्गतस्तस्माद् वर्गयोगदलस्य तु ।। ७२९ ।।

आधिक्यमन्तरार्धस्य वर्गेण स्यादिति स्थितम् ।
योगार्धवर्गे भुजयोस्तथैवाऽबाधयोरपि ।। ७३० ।।

स्वस्वभेदार्धवर्गेण न्यूनत्वं यत्पुनर्द्वयो: ।
आबाधयोरन्तरार्धवर्गस्तत्राधिकोऽन्यत: ।। ७३१ ।।

स शोध्यराशेर्न्यूनोंशऽस्त्यक्तेऽन्यत्रावशिष्यते ।
न्यूनोंऽश:[3] शोध्यराशिस्थ: शुद्धराशौ तु शिष्यते ।। ७३२ ।।

व्याख्या—1. C. ते for द्वे 2. Mss. read योगतो बले
3. A. C. न्यूनांश:

योगार्धवर्गे भुजयोर्वर्गो भेददलस्य यः ।
स न्यूनोंऽशोऽन्तरार्धस्य वर्गाबाबाधयोस्ततः ॥ ७३३ ॥

त्यक्तेऽस्मिन् लम्बवर्गे तु स एवांशोऽतिरिच्यते ।
योगार्धयोर्यो नियमः स स्याद् भेदार्धयोरपि ॥ ७३४ ॥

तादृक् तद्वर्गयोस्तस्मात् तद्वर्गान्तरयोरपि ।
योगार्धयोर्वर्गभेदात् ततस्तद्भुजयोर्हृतात्[1] ॥ ७३५ ॥

अन्तरार्धस्य वर्गेण भक्त आबाधयोर्द्वयोः ।
योगार्धकृत्या भेदार्धवर्गभेदोऽत्र लभ्यते ॥ ७३६ ॥

स एव लम्बवर्गेऽस्मिन्नधिकोंऽशो यतस्ततः ।
ताभ्यां च गुणहाराभ्यां लब्धं भूम्यर्धवर्गतः ॥ ७३७ ॥

शोध्यं ततो भुजाभेददलवर्गसमं च तत् ।
भुजान्तरार्धवर्गघ्नाद् यतो भूम्यर्धवर्गतः ॥ ७३८ ॥

आबाधयोर्योगदलवर्गाप्तः स्वगुणो भवेत् ।
भूमध्यवर्गो ह्याबाधायोगार्धस्य[2] कृतिर्यतः ॥ ७३९ ॥

गुणहारकयोः साम्ये गुण एव फलं यथा ।
तत्सवंबोर्युतिदलद्वये बाहुद्वयोनिते ॥ ७४० ॥

तयोर्द्वयोस्तु संवर्गस्तत्र लब्धफलोनितः ।
भूम्यर्धवर्गो भवतीत्येव लब्धफलोनितः ॥ ७४१ ॥

योगार्धयोर्वर्गभेदहतो वर्गः फलोद्भवः ।
तन्मूलं त्रिभुजक्षेत्रफलं भवति सुस्फुटम् ॥ ७४२ ॥

इति ।

[शरानयनम्]

वृत्ते वृत्तान्तरग्रस्ते सति[3] न्यायोऽयमूह्यताम् ।
वृत्तकेन्द्रद्वयस्पृष्टो व्यास एको भवेत् तयोः ॥ ७४३ ॥

व्याख्या—1. C. कृतात् 2. Mss. read योर्थस्य
3. A. स हि ; C. समि

साधारणी समस्तज्या तत्सम्पातान्तरोद्भवा ।
कृत्स्नज्यामध्यगौ व्यासे शरौ वृत्तद्वयोद्भवौ ॥ ७४४ ॥

तत्राल्पवृत्तस्य शरो महानन्यस्य चाल्पकः ।
शरोनव्यासशरयोर्घातस्तुल्यस्तयोर्भवेत् ॥ ७४५ ॥

समस्तज्यार्धवर्गस्य तुल्यत्वादुभयोरपि ।
शरोनव्यासयोर्यादृङ्नियमो महदल्पयोः ॥ ७४६ ॥

तादृशो नियमो वेद्यः शरयोर्महदल्पयोः ।
व्यासयोर्नियमस्तादृक् शर[1]द्वयविहीनयोः ॥ ७४७ ॥

शरद्वयोनितौ व्यासौ शरवर्गहृतौ पुनः ।
शरद्वयोनितव्यासयोगभक्तौ शरौ ततः ।
एष एव विधिः सम्यगाचार्येण प्रदर्शितः ॥ ७४८ ॥

"ग्रासोने द्वे वृत्ते ग्रासगुणे भाजयेत् पृथक्त्वेन ।
ग्रासोनयोगलब्धौ सम्पातशरौ परस्परतः" ॥ ७४९ ॥

(आर्यभटीयम्, गणित० १८)

इति ।

[गोलपृष्ठक्षेत्रफलम्]

वृत्तव्यास-धनु-र्बाण-जीवा-न्यायं सविस्तरम् ।
इत्थं प्रोच्याथ तत्साम्याद् घनगोलफलं ब्रुवे ॥ ७५० ॥

यज्ज्ञातवृत्तव्यासाभ्यां तदन्यदनुपाततः ।
सिद्ध्येत् खण्डान्तरयुतिः पिण्डज्यायोगतश्च यत् ॥ ७५१ ॥

ततस्तन्न्यायतः सिद्ध्येद् गोलस्यान्तर्बहिःफलम् ।
[2]तुल्यचापान्तरे मध्यात् पार्श्वयोरुभयोरपि ॥ ७५२ ॥

व्याख्या—1. A. C. तादृक् करे

2. Verses 752b-94 are the same as verses 1-44 of the *Kriya-kramakarī*, on the *Līlāvatī*, 201-03, (Edn., pp. 395-99).

गोलपृष्ठं तथा छिन्द्यात् परिध्यंशो यथा समः ।
चापभागान्तरेखास्तु तुल्यान्तरायता यत:[1] ॥ ७५३ ॥

रेखान्तरालविस्तारं रेखामध्यसमायतम् ।
ऋजूकृतं यथा क्षेत्रं समलम्बं चतुर्भुजम् ॥ ७५४ ॥

रेखाऽऽस्य महती भूमि: स्वल्पा च मुखमिष्यते ।
रेखान्तरालं लम्बोऽस्य चापभागसमो भवेत् ॥ ७५५ ॥

मुखातिरिक्तं तद्भागमादायाऽऽस्यैकपार्श्वत: ।
तत्पार्श्वेऽन्यत्र तु व्यस्तन्यस्ते दीर्घचतुर्भुजम् ॥ ७५६ ॥

रेखान्तरालविस्तारं रेखामध्यायतं भवेत् ।
आयामविस्ताराभ्यासो गोलपृष्ठफलं भवेत् ॥ ७५७ ॥

घनानपेक्षं सर्वत्र फलं समचतुर्भुजम् ।
तदर्थमर्धजीवानां व्यासार्धत्वप्रकल्पनात् ॥ ७५८ ॥

तत्तत्परिधयो नेया: क्षेत्रायामप्रसिद्धये ।
तत्तत्पिण्डगुणात् कृत्स्नज्यावर्गनिहताद् यथा ॥ ७५९ ॥

त्रिज्यावर्गेण विहृतं[2] तत्तत्खण्डान्तरं भवेत् ।
तत्तत्खण्डान्तरात्तद्वत् त्रिज्यावर्गसमाहतात् ॥ ७६० ॥

कृत्स्नज्यावर्गविहृता: पिण्डज्या: प्रातिलोम्यत: ।
तद्वत् खण्डान्तरयुते: पिण्डज्यायुतिराप्यते ॥ ७६१ ॥

सा गोलपरिधिक्षुण्णा व्यासार्धेन च संहृता ।
लब्ध: परिधियोग: स्याच्चापखण्डहत: स च ॥ ७६२ ॥

फलं गोलैकपार्श्वस्थं द्विघ्नं कृत्स्नफलं भवेत् ।
अत्र खण्डान्तरयुति: प्रायश्चापं प्रकल्प्यते ॥ ७६३ ॥

स त्वाद्यो गुणकार: स्याच्चापभागस्तथान्तिम: ।
हार: समस्तज्यावर्ग[3]स्तुल्यत्वादुभयोस्तत: ॥ ७६४ ॥

व्याख्या—1. A. om. यत: 2. A. B. निहतं
3. A. B. C. वर्ग

चापवर्गेण गुणनं विधूय हरणं तथा ।
व्यासार्धवर्गगुणने तेनैव हरणे पुनः ॥ ७६५ ॥

गुणनं केवलेनैव व्यासार्धेन विधीयते ।
परिधेर्द्विगुणत्वार्थं व्यासेन गुणनं मतम् ॥ ७६६ ॥

जिज्ञासितफलं गोलं घनसाम्येन खण्डयेत् ।
यथा दर्पणवृत्ताभाः खण्डा नानाप्रमाणकाः ॥ ७६७ ॥

तेषां व्यासार्धनिहतं परिध्यर्धं फलं भवेत् ।
वृत्तक्षेत्रे द्विधा भक्ते पार्श्वयोरुभयोस्ततः ॥ ७६८ ॥

खण्डाः केन्द्रस्थतीक्ष्णाग्रा नेमिस्थस्थूलमूलकाः ।
ऋजूकृत्य तयोर्योगे तदायतचतुर्भुजम् ॥ ७६९ ॥

तीक्ष्णाग्रसूचीकान्योन्यविवरं निबिडं[1] भवेत् ।
परिध्यर्धं यदायामो व्यासार्धं चापि विस्तृतिः ॥ ७७० ॥

अतो व्यासार्धनिहतं परिध्यर्धं फलं भवेत् ।
तद्गोलव्यासनिहतं ज्ञातव्यासहृतं फलम् ॥ ७७१ ॥

व्यासोऽत्र गोलमध्यस्थो विदितो नापरस्ततः ।
व्यासार्धान्यान्यखण्डानामानेयानि पृथक् पृथक् ॥ ७७२ ॥

तत्तद्व्यासार्धतो गोलपरिधिघ्नात् ततो हृतम् ।
गोलव्यासेन सर्वेषां परिध्यर्धमवाप्यते ॥ ७७३ ॥

स्वव्यासार्धहते तस्मिन् वृत्तकेन्द्रफलं भवेत् ।
तत्तद्व्यासार्धवर्गेण गोलस्य परिधिर्हतम् ॥ ७७४ ॥

गोलव्यासेन विहृतं तत्तत्क्षेत्रफलं भवेत् ।
फलं समुदितं तेषां गोलक्षेत्रफलं भवेत् ॥ ७७५ ॥

व्यासार्धवर्गाः खण्डानामर्धज्यावर्गसम्मिताः ।
शरयोर्वर्गयोगोन कृत्स्नव्यासस्य या कृतिः ॥ ७७६ ॥

व्याख्या — 1. A. विविदं

वलिता शरसंवर्गतुल्यार्धज्याकृतिर्भवेत् ।
यावद्वा खण्डितो व्यासो गच्छे तत्खण्डसम्मिते ॥ ७७७ ॥

एकाद्येकोत्तराङ्कानां वर्गसङ्कलितं तु यत् ।
शरवर्गयुतिः केन्द्रस्यैकपार्श्वस्थिता भवेत् ॥ ७७८ ॥

सैव द्विगुणिता वेद्या वृत्तपार्श्वद्वयोत्थिता ।
[1]यः स्वल्पशरवर्गस्तत्रैकपार्श्वगतो भवेत् ॥ ७७९ ॥

स त्वन्यपार्श्वस्थमहाशरवर्गेण संयुतः[2] ।
शरयोरल्पमहतोर्वर्गयोगो भवेद् ध्रुवम् ॥ ७८० ॥

यावानल्पशरो व्यासस्तदूनस्तु महाशरः ।
शरयोरल्पमहतोर्योगो व्याससमो यतः ॥ ७८१ ॥

यावन्तोऽल्पशरास्तावन्तोऽन्यपार्श्वे महाशराः ।
वर्गयोगस्ततस्तेषां शरसंवर्गसम्मितः ॥ ७८२ ॥

वर्गयोगोनिते योगे वर्गघात[3]द्वयं भवेत् ।
यावद्वा खण्डितं वृत्तं व्यासवर्गाच्च तावता ॥ ७८३ ॥

गुणिताच्छरवर्गाणां त्याज्यं सङ्कलितं ततः ।
खण्डानां व्याससंख्यात्वात् तद्वर्गस्तद्गुणो घनः ॥ ७८४ ॥

व्यासस्य घनतस्तस्माद् वर्गसङ्कलितं त्यजेत् ।
शिष्टार्धमर्धजीवानां गोले वर्गयुतिर्भवेत् ॥ ७८५ ॥

सा गोलपरिधिक्षुण्णा गोलव्याससमुद्धृता[4] ।
लब्धं गोलफलं ज्ञेयमित्याहुर्गणकोत्तमाः ॥ ७८६ ॥

द्विघ्नी गच्छकृतिः सैकगच्छघ्नी षड्भिरुद्धृता ।
एकाद्येकोत्तराङ्कानां वर्गसङ्कलितं भवेत् ॥ ७८७ ॥

तत्र गच्छस्य सैकत्वमाद्याङ्कस्य जिघृक्षया ।
अत्यल्पत्वाद्विहाद्यस्य सैकत्वं न विधित्सितम् ॥ ७८८ ॥

व्याख्या—1. A. यत् स्वल्प 2. B. C. संयुतं

3. A. C. वर्गे घात

4. A. B. C. Hapl. om. of two lines after °द्धृता to °द्धृता. These lines have been restored from this verse occurring as *Kriyākramakarī* verse 35, (p. 398).

तत्र गच्छकृतिर्गच्छनिहता तद्घनो भवेत्[1] ।
छिन्नाद् घनाद् यः षष्ठांशो वर्गसङ्कलितं भवेत् ॥ ७८९ ॥

केवलश्चेद् घनत्र्यंशो वर्गसङ्कलि[तं ततः][2] ।
भवेत् पार्श्वद्वयापेक्षं छिन्नं त्र्यंशद्वयं तु तत् ॥ ७९० ॥

तस्मिन् व्यासघनात् त्यक्ते त्र्यंशो व्यासघनाद् भवेत् ।
एवंकृतो घनत्र्यंशो दलितोऽत्र विधीयते ॥ ७९१ ॥

शिष्टं घातद्वयं वर्गयोगोनाद् योगवर्गतः ।
स पुनः परिधिक्षुण्णो व्यासेन च विभज्यते ॥ ७९२ ।

तत्र व्यासेन गुणनं तेनैव हरणं तथा ।
त्यक्त्वोभयं[3] व्यासवर्गो गुण्यः परिधिनैव तु ॥ ७९३ ॥

षड्भिर्हृतं गोलघनफलं भवति सुस्फुटम् ।
अर्धज्यानां च सर्वेषां व्यासार्धत्वप्रकल्पनात् ॥ ७९४ ॥

तद्योगाद् गोलपरिधिक्षुण्णाद् व्यासदलोद्धृतम् ।
गोलक्षेत्रे क्षेत्रफलमित्याहुर्गणकोत्तमाः ॥ ७९५ ॥

['जीवे परस्पर'-न्यायेन ज्या-चापानयनम्]

यन्निजेतरकोटिघ्नजीवयोर्युतिभेदतः ।
त्रिज्याप्ते तद्धनुर्योगभेदज्ये स्तामितीरितम् ॥ ७९६ ॥

ज्याचापीकरणेऽप्येष विधिर्योज्यो मनीषिभिः ।
मिथः कोटिघ्नयोर्यद्वा त्रिज्याप्ता वा युतिर्भिदा ॥ ७९७ ॥

तच्चापान्तरजीवा स्यात्तच्चापिता धनुरन्तरम् ।
ज्याबाणवर्गयोर्योगे त्र्यंशं बाणकृतेः क्षिपेत् ॥ ७९८ ॥

तन्मूलं तद्धनुश्चैवमूनाधिकधनुर्नयेत् ।
अन्योन्यकोटिहतयोर्भेदादासन्नयोर्ज्ययोः[4] ॥ ७९९ ॥

व्याख्या—1. B. Hapl. om. after भवेत् to भवेत् , in the third line below.
2. Mss. तो for तं ततः
3. Mss. त्यक्तोभयं
4. A. B. सन्नयोर्ज्ययोः

शिष्टचापघनषष्ठभागतो
    विस्तरार्धकृतिभक्तवर्जितम् ॥
शिष्टचापमिह शिञ्जिनी भवेत्
    स्पष्टता भवति चाल्पतावशात् ॥ १७ ॥

[इष्टज्यानयनम्]

ऊनाधिकधनुर्ज्यां च नीत्वैवं पठितां न्यसेत् ॥ १८ ॥
ऊनाधिकधनुःकोटिजीवया तां समीपजाम् ।
निहत्य पठितां तस्याः कोट्या शिष्टगुणं च तम् ॥ १९ ॥
तद्योगं वाथ विश्लेषं हरेद् व्यासदलेन तु ।
इष्टज्या भवति, स्पष्टा तत्फलं स्यात् कलादिकम् ॥ २० ॥
न्यायेनानेन कोट्याश्च मौर्व्याः कार्या सुसूक्ष्मता ॥ २१a ॥

त्रिज्याप्तवर्गे तद्बाणवर्गं सत्र्यंशकं क्षिपेत् ।
तन्मूलमधऊर्ध्वस्थचापसन्धेर्धनुर्भवेत् ॥ ८०० ॥

तद्युक्तोनाधऊर्ध्वस्थचापसन्धिधनुर्धनुः ।
इति ज्याग्रहणोपायस्तच्चापीकरणे भवेत् ॥ ८०१ ॥

इति ॥

शिष्टचापेति (II. 17-21a)—

[इष्टज्यानयनम्]

इष्टचापसमस्तज्यावर्गाद् व्यासोद्धृतः शरः ।
व्यासेन हरणात् पूर्वं स तु व्यासाहतो भवेत् ॥ ८०२ ॥

अत एव शरस्यास्य वर्गस्तद्वर्गसम्मितः ।
कृत्स्नज्यावर्ग[वर्गस्त][1]च्छरवर्गे स्थिते सति ॥ ८०३ ॥

व्याख्या—1. A. B. om. वर्गस्त. B has a gap here.

[रविस्फुटः]

ज्यभ्यस्तबाहुकोटिभ्यां अशीत्याप्ते फले उभे ॥ २१b ॥
चापितं दोःफलं कार्यं स्वर्णं सूर्यस्य मध्यमे ।
केन्द्रोर्ध्वार्धे च पूर्वार्धे तत्कालार्कस्फुटः, स च ॥ २२ ॥

कृत्स्नव्यासस्य वर्गोऽपि हारकः परिकल्प्यते ।
चापार्धज्यान्तराप्तौ च तत्र्यंशोऽस्मिन्शिवकीर्तिते ॥ ८०४ ॥

कृत्स्नज्यावर्गवर्गोऽयं चतुर्घ्नो ह्रियते त्रिभिः ।
अथवा व्यासवर्गस्य चतुर्थोंऽशोऽत्र हारकः ॥ ८०५ ॥

स तु व्यासार्धवर्गः स्यात् स च त्रिघ्नोऽत्र हारकः ॥
वर्गाभ्यां गुणहाराभ्यामिह वर्गात्मकं फलम् ॥ ८०६ ॥

बाणवर्गात् कर्णकोट्योर्योगलब्धं तदन्तरम् ।
कर्णकोट्योर्योगदलमिष्टचापमिह स्मृतम् ॥ ८०७ ॥

तदीयमर्धकरणं हारके परिकल्पिते ।
इष्टचापं तथा त्रिज्यावर्गो द्विघ्नयोर्वधस्तथा[1] ॥ ८०८ ॥

कृत्स्नज्यावर्गवर्गस्य हारकाः स्युरमी त्रयः ।
इष्टचापोद्धृतः कृत्स्नज्यावर्गस्तद्धनस्त्विह ॥
ततः षड्भिर्हृता त्रिज्याकृत्या तद्धनु[2]रन्तरम् ॥ ८०९ ॥

इति ॥

ज्यभ्यस्तेति (II. 21b-23a)

[रविस्फुटः]

व्यस्तं गच्छति नीचोच्चपरिधौ[3] मध्यतः स्फुटः ।
दोःफलेन स पूर्वार्धे, पश्चार्धे गच्छति क्रमात् ॥ ८१० ॥

स्वर्णं तद्दोःफलं तस्मात् केन्द्रे जूकक्रियादिगे ।
कक्ष्यामण्डलनेमिस्थं वेद्यं मन्दफलं स्फुटम् ॥ ८११ ॥

व्याख्या—1. A. द्विघ्न्योस्तथा वधः 2. Mss. तत्तद्धनु
3. B, C. परिधा

मध्यसावनसिद्धोऽतः कार्यः स्यादुदये पुनः ॥ २३a ॥

[चरप्राणाः]

संस्कृतायनभागादेर्दोर्ज्या कार्या रवेस्ततः ॥ २३b ॥

चतुर्विंशतिभागज्याहतायास्त्रिज्यया हृतः ।
अपक्रमगुणोऽर्कस्य तात्कालिक इह स्फुटः ॥ २४ ॥

[चरप्राणवासना]

स्वदोःफलचापोद्वापसाध्यो मध्यात् स्फुटस्ततः ।
पश्चात् पुरोऽपि चोदेति सोऽर्कस्तद्भ्रमकालतः ॥ ८१२ ॥

तद्भोगोऽपि ततः कार्यस्तद्वन्मध्ये स्फुटेऽपि वा ।
भिन्ने रव्युदये प्राणकलान्तरचरासुभिः ॥ ८१३ ॥

तद्गतिः[1] भिन्न कर्तव्या तद्वत् तदवधौ ग्रहे ।
भगोलेन ग्रहो गच्छन् यदा यत्रैव दृश्यते ॥ ८१४ ॥

ततो दिनान्तरे दृश्यो दिनभोगकलान्तरे ।
स्वभोगलिप्तासहिताश्चक्र[2]लिप्तास्ततो दिने ॥ ८१५ ॥

भ्राम्यन्ति प्रत्यहं तत्र भोगकालो विभिद्यते ।
तत्कलाप्रतिबद्धानां राशीनां कालभेदतः ॥ ८१६ ॥

कालस्तु चक्रलिप्तानां भ्रमणे सर्वदा समः ।
प्रत्यहं सञ्चितो भोगः स यावान् गोलसन्धितः ॥ ८१७ ॥

कलात्मा तावतः कालाद् भेदः प्राणकलान्तरम् ।
अधिकाः स्युः कलागोलाद्यन्तयोः प्राणपिण्डतः ॥ ८१८ ॥

अयनाद्यन्तयोर्लिप्तापिण्डात् प्राणास्तथाधिकाः ।
अतो युग्मौजपदयोः स्वर्णं प्राणकलान्तरम् ॥ ८१९ ॥

उदेति क्षितिजस्थोऽर्कः प्राक्, पश्चादस्तमेति च ।
सौम्यगोलेऽथ, याम्येऽस्मिन् व्यस्तमस्तोदयौ ततः ॥ ८२० ॥

दक्षिणोत्तरवृत्तस्थं क्षितिजोन्मण्डलान्तरम् ।
अक्षज्या सा क्षितिज्या स्यादिष्टक्रान्तिप्रवेशजा ॥ ८२१ ॥

व्याख्या—1. A. तत्कृतिः; B. तद्···तिः 2. A. सहितौ चक्र

तत्त्रिज्याकृतिविश्लेषान्मूलं द्युज्याथ कोटिका ।
दोर्ज्यापक्रमकृत्योश्च भेदान्मूलमथापि वा ॥ २५ ॥

अन्त्यद्युज्याहता दोर्ज्या त्रिज्याभक्तेष्टकोटिका ।
त्रिज्याघ्नेष्टद्युजीवाप्ता चापितार्कभुजासवः ॥ २६ ॥

दोःप्राणलिप्तिकाभेदमविनष्टं तु पालयेत् ।
विषुवद्भाहता क्रान्तिः सूर्याप्ता क्षितिमौर्विका ॥ २७ ॥

त्रिज्याघ्नेष्टद्युजीवाप्ता चापिता स्युश्चरासवः ॥ २८a ॥

सेयमिष्टद्युवृत्तस्था क्षितिजोन्मण्डलान्तरम् ।
चरज्या सा स्ववृत्तांशप्रमिता यद्धनुश्चरम् । ८२२ ॥

घटिकावृत्तमार्गेण भ्राम्यति प्रवहोऽन्वहम् ।
भगोलं प्रेर्यते येन ग्रहनक्षत्रसंश्रयः ॥ ८२३ ॥

इष्टक्रान्त्यन्तरे तस्मात् स्वद्युवृत्ते द्युचारिणः ।
प्रवहप्रेरिता भ्राम्यन्त्युदग्दक्षिणतस्ततः ॥ ८२४ ॥

घटिकासमपार्श्वस्थं निरक्षक्षितिजं भवेत् ।
निरक्षदेशे यत्रार्कः सदोदेत्यस्तमेति च ॥ ८२५ ॥

स्वाक्षे स्वक्षितिजे ज्ञेयावुदयास्तमयौ रवेः ।
उन्मण्डलक्षितिजयोरन्तरालधनुश्चरम् ॥ ८२६ ॥

सौम्ये पूर्वमुदेत्यर्कः पश्चात्तेनास्तमेति च ।
अतश्चरेण द्विघ्नेन दिनं तत्र तु वर्धते ॥ ८२७ ॥

क्षीयते च निशा यस्मान्मिथो भिन्ने दिनक्षये ।
याम्ये पश्चादुदेत्यर्कस्तेन प्रागस्तमेति च ॥ ८२८ ॥

अतश्चरेण द्विघ्नेन तत्र तु क्षीयते दिनम् ।
वर्धते च निशा यस्माद् व्यस्तत्वं गोलयोर्मिथः ॥ ८२९ ॥

चरप्राणगतिः स्वर्णं याम्योदग्गोलयोस्ततः ।
उदयेऽस्तमये व्यस्तं ग्रहे रव्युदयावधौ ॥ ८३० ॥

मध्यार्कप्रमितं तुल्यरूपमेव सदा दिनम् ।
तुल्यत्वात् तद्गतेर्भिन्नं स्फुटार्कप्रमितं दिनम् ॥ ८३१ ॥

[रवेर्गतिकलाः]

लिप्ताप्राणान्तरं भानोर्दोःफलं च चरासवः ॥ २८b ॥

स्वर्णसाम्येन संयोज्या भिन्नेन तु वियोजयेत् ।
भानुमध्यमभुक्तिघ्नं चक्रलिप्ताहृतं फलम् ॥ २९ ॥

भानुमध्ये तु संस्कार्यं स्फुटभुक्त्याहृतं स्फुटे ॥ ३०a ॥

[ग्रहेषु चरस्य संस्कारप्रकारः]

उदक्स्थेऽर्के चरप्राणाः शोध्याः स्वं याम्यगोलगे ॥ ३०b ॥

व्यस्तमस्ते तु संस्कार्या, न मध्याह्नार्धरात्रयोः ।
युग्मौजपदयोः स्वर्णं रवौ प्राणकलान्तरम् ॥ ३१ ॥

दोःफलं पूर्ववत्कार्यं रवेरेभिर्द्युचारिणाम् ।
मध्यभुक्तिं स्फुटां वापि हत्वा चक्रकलाहृतम् ॥ ३२ ॥

स्वर्णं कार्यं यथोक्तं, तद् व्यस्तं वक्रगतौ स्फुटे ॥ ३३a ॥

भिन्नत्वाद् दोःफलप्राणकलान्तरचरैर्गतैः ।
तदृक्षचक्रलिप्तानां भ्रमकालाद् दिनं यतः ॥ ८३२ ॥

दोःफलाद्युपयुक्तार्कात् कर्तव्या दोःफलादयः ।
तत्कृतस्य विशेषस्य तेष्वर्केऽपि च सम्भवात् ॥ ८३३ ॥

अर्कतद्दोःफलादीनां यदिष्टा तुल्यकालता ।
अन्यथा भिन्नकालत्वाद् व्रजन्त्यस्फुटताममी ॥ ८३४ ॥

दिनभेदादर्कभेदो दोःफलादेर्भिदा ततः ।
इत्यन्योन्याश्रयो दोषस्त्वविशेषान्निरस्यते ॥ ८३५ ॥

इति ।

[चरसंस्कारेण दिनरात्रिमानम्]

अहोरात्रचतुर्भागे चरप्राणान् क्षिपेदुदक् ॥ ३३b ॥

याम्ये शोध्या दिनार्धं तद् रात्र्यर्धं व्यत्ययाद् भवेत् ।
दिनक्षपे द्विनिघ्ने ते चन्द्रादेः स्वैश्चरासुभिः ॥ ३४a ॥

अहोरात्रचतुर्भागे इति (33b-34)—

[चरसंस्कारवासना]

राशिकूटायनान्तौ द्वौ व्यस्तदिक्कौ समोदयौ ।
सौम्यायनान्ते क्षितिजं याते वा दक्षिणोत्तरम् ॥ ८३६ ॥

याम्यं भकूटं याम्ये च सौम्ये गच्छति तद्वयम् ।
परस्परानुसारित्वात् सदैव तु तयोर्द्वयोः ॥ ८३७ ॥

परमक्रान्तितुल्या च भकूटस्योन्नतिः परा ।
अयनान्तौ यदा साक्षौ दक्षिणोत्तरमण्डले ॥ ८३८ ॥

कोटयपक्रम[1]तुल्या स्यात्ततोऽन्यत्र तदुन्नतिः ।
अयनान्तोन्नतिवशाद् भकूटस्योन्नतिस्ततः ॥ ८३९ ॥

भकूटस्योन्नतिवशाद् भवेत् क्षेपाग्रमुन्नतम् ।
भकूटाभिमुखं सर्वे विक्षिप्यन्ते ग्रहा यतः ॥ ८४० ॥

कोट्यपक्रम[2]कोटिघ्नः क्षेपस्त्रिज्याहृतः स्फुटः ।
क्षेपस्यास्य तथा क्रान्तेः क्रान्तियोगान्तरात् स्फुटः ॥ ८४१ ॥

मिथः कोटिहतत्रिज्याहरणाभ्यां च तद्विधिः ।
ययोर्योगो वियोगो वा दोःक्रान्तिक्षेपशालिनाम् ॥ ८४२ ॥

अन्त्यक्रान्तीष्टविक्षेपौ मिथः कोटिज्यया हतौ ।
तद्योगविरहाद्यन्त्यक्रान्तिस्त्रिज्याहृता स्फुटा ॥ ८४३ ॥

तत् त्रिज्याकृतिविश्लेषान्मूलं द्युज्यान्तिमा भवेत् ।
अन्त्यद्युज्याहृता दोर्ज्या त्रिज्याभक्तेष्टकोटिका ॥ ८४४ ॥

व्याख्या—1, 2. C. कोटयापक्रम

[चन्द्रस्फुटः]

इन्दूच्चयोः स्वदेशोत्थचरज्यानीतचरादिजम् ।
संस्कारं मध्यमे कृत्वा स्फुटीकार्यो निशाकरः ॥ ३५ ॥

क्रान्तिज्या क्षेपकोटिघ्ना क्षेपोऽन्त्यक्रान्तिताडितः ।
व्यस्तं तद्योगविश्लेषात् कोटिज्या त्रिज्यया हृता ॥ ८४५ ॥

दोर्ज्याहृता परक्रान्तिकोटिस्त्रिज्याहृताऽथवा ।
भूयस्त्रिज्याहृता स्वद्युज्याप्ता सा कालदोर्गुणः ॥ ८४६ ॥

तच्चापं कालदोःप्राणाः पदयोः प्रथमान्त्ययोः ।
चरप्राणास्ततः शोध्याः पदयोस्त्वन्ययोः क्षिपेत् ॥ ८४७ ॥

काललग्नं तदेवाद्ये द्वितीये तु तदूनितम् ।
राशिषट्कं पदेऽन्यस्मिंस्तद्युतं चरमे पुनः ॥ ८४८ ॥

तदूनं मण्डलं लग्नकालः स्यात् स्वोदयो विधोः ।
क्षेपसंस्कृतया क्रान्त्या कर्तव्या स्वचरासवः ॥ ८४९ ॥

दिनान्तरितयोरेवं नीतयोः काललग्नयोः ।
विवरं दिनमानं स्याच्चक्रलिप्तासमन्वितम् ॥ ८५० ॥

एतत्सर्वमभिप्रेत्य चन्द्रादेः स्वैश्चरासुभिः ।
तद्दिनानयनं प्रोक्तमाचार्यैः सूक्ष्मदर्शिभिः ॥ ८५१ ॥

दिनपार्श्वस्थयोः काललग्नयोर्विवरं दिनम् ।
तात्कालिकार्कदोःप्राणचरभेदेन भिद्यते ॥ ८५२ ॥

इन्द्वोरविकृतक्षेपक्रान्तितत्कोटिभेदतः ।
दोःप्राणचरतो भिन्ने काललग्ने ततो दिनम् ॥ ८५३ ॥

इति ।

[चन्द्रस्फुटः]

इन्दूच्चयोरिति (35-39)—

[चराविज्यानां चापीकरणम्]

स्वोच्चात् स्ववृत्तपादेन विप्रकृष्टे स्वमध्यमे ।
नीचोच्चवृत्तव्यासार्धेनोच्चासन्नस्फुटग्रहः ॥ ८५४ ॥

दोःकोटिज्ये तु सप्तघ्ने अशीत्याप्ते फले उभे ।
चापितं दोःफलं कार्यं स्वमध्ये स्फुटसिद्धये ॥ ३६ ॥

[चरज्यादीनां चापीकरणम्]

ज्याचापान्तरमानीय शिष्टचापघनादिना ।
युक्त्वा, ज्यायां धनुः कार्यं पठितज्याभिरेव वा ॥ ३७ ॥

उच्चमध्यान्तरे स्वीयवृत्तव्यासार्धसम्मिते ।
मध्यस्फुटान्तरं स्वोच्चान्नीचव्यासार्धसम्मितम् ॥ ८५५ ॥

तन्मध्ये च तयोस्तादृङ्नियमेन विना कथम् ।
उच्चमध्यान्तरालज्यां मन्दवृत्तहृतां ततः ॥ ८५६ ॥

विभजेद् ग्रहवृत्तेन स्फुटमध्यान्तराप्तये ।
यद्वोच्चमध्यमेवज्यं[1] मन्दान्त्यफलताडितम् ॥ ८५७ ॥

त्रिज्यया विभजेल्लब्धं स्फुटमध्यान्तरं भवेत् ।
अपवर्तितयोस्तत्र वृत्तयोरर्धपञ्चमैः ॥ ८५८ ॥

तादृङ्नीचोच्चवृत्तघ्नां तादृग्वृत्तेन संहरेत् ।
मध्यस्फुटान्तरं लब्धं कर्णवृत्तस्य केन्द्रतः ॥ ८५९ ॥

तन्नेमिगतनीचोच्चवृत्तकेन्द्रानुसारतः ।
या कर्णवृत्तनेम्यन्ता रेखा सा तद्युतोनिता ॥ ८६० ॥

प्रतिवृत्तगतो मध्यः कर्णवृत्ते स्फुटो भवेत् ।
उक्तं चापघने षड्घ्नत्रिज्यावर्गे कलासमम् ॥ ८६१ ॥

वशांशे तत्कृतेश्चापज्यान्तरं विकलासमम् ।
एकादिघ्नात्ततस्त्रिज्यावर्गतो वशभिर्हृतात् ॥ ८६२ ॥

घनमूलं तु यल्लब्धं तत्तुल्ये धनुषि स्थिते ।
एकद्व्याद्या विलिप्ताः स्युश्चापज्याविवरोद्भवाः ॥ ८६३ ॥

तदूनं चापमर्धज्या तद्युता ज्या च तद्धनुः ।
कार्योऽविशेषश्चापाप्तौ चापाल्पत्वे वृढं च तत् ॥ ८६४ ॥

इति ।

व्याख्या—1. A. यदोच्चभेदमध्यज्यं

118,18,103

त्रिखरूपाष्टभूनागरुद्रैः त्रिज्याकृतिः समा ।
एकादिघ्न्या दशाप्ताया घनमूलं, ततोऽपि यत् ॥ ३८ ॥

तन्मितज्यासु योज्याः स्युरेकद्व्याद्या विलिप्तिकाः ।
चरदोःफलजीवादेरेवमल्प[1]धनुर्नयेत् ॥ ३९ ॥

[गोलसंस्थानम्]

"निजमन्दपरिधिगोच्चं केन्द्रीकृत्य भ्रमन्ति कक्ष्यासु ।
विहगा, रविचन्द्रमसोर्भगोलमध्यं स्वमन्दवृत्तिमध्यम् ॥ ८६५ ॥

अपमण्डलमध्यस्थस्वशीघ्रवृत्तिसङ्गतोच्चमन्येषाम् ।
पाताद् विक्षिप्तमुदङ् मृदुवृत्तार्धं, ततोऽन्यतोऽन्यार्धम् ॥ ८६६ ॥

चन्द्रादीनां मन्दानुसारतः स्वस्वकक्ष्याः स्युः ।
क्षयवृद्धिः सर्वेषां परिधेर्मान्दस्य तु स्वकर्णवशात् ॥ ८६७ ॥

प्रायो भ्रमतां स्वे स्वे कक्ष्यावलये तु योजनैस्तुल्या ।
लिप्ताभेदैर्भिन्ना गतिर्ग्रहाणां मिथो वापि ॥ ८६८ ॥
(गोलसारः, २. १०-१३)

[भगोले ग्रहभ्रमः]

गोलसारे स्फुटक्षेत्रसंस्थानमिति वर्णितम् ।
प्रतिमण्डलतो गच्छेत् स्वया गत्या ग्रहः सदा ॥ ८६९ ॥

तत्केन्द्रं मन्दनीचोच्चवृत्तनेम्यां भ्रमेत् पुनः ।
मन्दोच्चगत्या मन्दोच्चवृत्तनेम्युच्चगं ततः ॥ ८७० ॥

अर्केन्द्वोर्मन्दनीचोच्चवृत्तकेन्द्रं प्रतिष्ठितम् ।
भगोलमध्येऽन्येषां तु शीघ्रवृत्तस्य नेमिगम् ॥ ८७१ ॥

प्रतिवृत्तसमं वृत्तं कक्ष्याख्यं वा प्रकल्प्यताम् ।
तदास्य केन्द्रमीचोच्चवृत्तकेन्द्राश्रितं भवेत् ॥ ८७२ ॥

कक्ष्यावृत्तस्य नेम्यां च कल्प्यं नीचोच्चमण्डलम् ।
कक्ष्यानेमिस्थतत्केन्द्रं विदुस्तन्मध्यमग्रहम् ॥ ८७३ ॥

यतो मध्यमया गत्या कक्ष्यानेम्यां भ्रमेद् दिनम् ।
उच्चगत्या तु तन्नेम्या ग्रहो गच्छन् प्रकल्प्यते ॥ ८७४ ॥

मूलम्—1. A. मल्पं

स्ववृत्ते तद्गतः खेटो यावद् राश्यंशलिप्तकः ।
नीचोच्चकेन्द्रं कक्ष्यायां तावद् राश्यादिकं भवेत् ॥ ८७५ ॥

कक्ष्याकेन्द्रस्थनीचोच्चवृत्तनेम्यां भ्रमत् पुनः ।
प्रतिवृत्तस्य केन्द्रं तद् यावद् राश्यंशलिप्तिकम् ॥ ८७६ ॥

कक्ष्यानेमिस्थनीचोच्चनेम्यां तावति स ग्रहः ।
स्ववृत्तस्योच्चवृत्तेन स्वोच्चासन्नयुतौ स च ॥ ८७७ ॥

प्रतिमण्डलकेन्द्रस्य स्वोच्चभुक्त्या प्रतिक्षणम् ।
नीचोच्चवृत्तपरिधौ कल्प्येत यदि तु भ्रमः ॥ ८७८ ॥

यथा पूर्वापरैकैव रेखा याम्योत्तरापि च ।
तथा च तत्तत्परिधौ तद्भ्रमः परिकल्प्यताम् ॥ ८७९ ॥

कक्ष्यानेमिस्थनीचोच्चवृत्तस्यापि तथा भ्रमः ।
प्रतिमण्डलकेन्द्रं तद्वृत्ते भ्राम्यति यादृशि ॥ ८८० ॥

कृत्स्नं तत्परिधिः भ्राम्येत् प्रदेशेऽन्यत्र तादृशि ।
ग्रहवृत्तस्य नेमिस्थो ग्रहो भ्राम्यति तद्वशात् ॥ ८८१ ॥

स्वाश्रयभ्रमणाधीनभ्रमोऽसौ स्वभ्रमं विना ।
कक्ष्याकेन्द्रस्थनीचोच्चवृत्तनेमिस्थितस्य यः ॥ ८८२ ॥

भ्रमः स कक्ष्यानेमिस्थे नीचोच्चे वा प्रकल्प्यताम् ।
सा त्विहोच्चवशाद् भुक्तिः स्वव्यापारेण कल्पिता ॥ ८८३ ॥

ग्रहे वृत्ते ग्रहस्यापि स्वव्यापारेण या गतिः ।
नीचोच्चवृत्तकेन्द्रस्य कक्ष्यानेम्यां गतिश्च सा ॥ ८८४ ॥

कक्ष्यानेम्यां हि नीचोच्चकेन्द्रभुक्तिस्तु मध्यमा ।
केन्द्रनेम्योर्द्वयोस्तुल्यं वृत्तमार्गेण गच्छतोः ॥ ८८५ ॥

सिध्येत् केन्द्रभ्रमादेव तन्नेमिस्थग्रहभ्रमः ।
नीचोच्चवृत्तनेमिस्थं प्रतिमण्डलमेव वा ॥ ८८६ ॥

कक्ष्यानेमिस्थनीचोच्चवृत्तकेन्द्रमथापि वा ।
ग्रहगत्याश्रयत्वेन कल्प्यते गोलवित्तमैः ॥ ८८७ ॥

[मन्दशीघ्रकर्णौ]

आद्ये पदे चतुर्थे च व्यासार्धे कोटिजं फलम् ।
युक्त्वा त्यक्त्वान्ययोस्तद्दोःफलवर्गैक्यजं पदम् ॥ ४० ॥

तत्कक्ष्यावृत्तनेमिस्थनीचोच्चग्रहवृत्तयोः ।
उच्चासन्ने तु सम्पाते नेम्योस्तिष्ठेत् स्फुटग्रहः ॥ ८८८ ॥

कक्ष्यानीचोच्चयोर्वापि स्वान्यवृत्तद्वयं विना ।
कक्ष्यावृत्तं च तन्नेमिस्थोच्चनीचं च यद् द्वयम् ॥ ८८९ ॥

नीचोच्चं निजनेमिस्थग्रहवृत्तं च यद्द्वयम् ।
ताभ्यां द्वयाभ्यां साध्या स्यात् स्फुटभुक्तिर्द्युचारिणाम् ॥ ८९० ॥

चतुर्भिरथवा वृत्तैर्युगपत्परिकल्पितैः ।
कक्ष्यामण्डलनेमिस्थनीचोच्चग्रहवृत्तयोः ॥ ८९१ ॥

उच्चासन्ने तु सम्पाते दृश्यते द्युचरस्ततः ।
यत्कक्ष्याग्रहनीचोच्चवृत्तकेन्द्रसमुद्गतम् ॥ ८९२ ॥

सूत्रं तदग्रे द्युचरो भवेत् स्वोच्चयुतस्ततः ।
नीचोच्चवृत्ते कक्ष्यायां वृत्तपादान्तरस्थिते ॥ ८९३ ॥

तन्नेमिस्थाद् ग्रहादुच्चभागः पादान्तरस्थितः ।
ततोऽपि पादान्तरितो ग्रहो नीचांशसंश्रितः ॥ ८९४ ॥

एवमेवेतरार्धेऽपि तयोरन्तरयोस्ततः ।
एकेनैवान्तरालेन तदन्यदनुपाततः ॥ ८९५ ॥

इति ।

[आद्ये पदे चतुर्थे चेति][1] (40-42)—

[मन्द-शीघ्रकर्णौ]

ग्रहोच्चसूत्रान्तरालं ग्रहवृत्तगतं[2] भुजा ।
कोटिस्तत्केन्द्रतो दोर्ज्यामूलान्ता परिकल्प्यते ॥ ८९६ ॥

व्याख्या—1. A. B. C. give the *pratika* as आद्यन्तपदग इति । C. adds मूलश्लो०

2. B. गता

कर्णः स्यादविशेषोऽस्य कार्यो मन्दे[1], चले न तु ।

[मन्दकर्णः]

दोःकोटिफलनिघ्नाद्यत्[2] कर्णात् त्रिज्याहृते फले ॥ ४१ ॥

ताभ्यां कर्णः पुनः साध्यो भूयः पूर्वफलाहतात् ।
तत्तत्कर्णात् त्रिभज्याप्तफलाभ्यामविशेषयेत् ॥ ४२ ॥

केन्द्रान्तरं चान्त्यफलं स्यात् कक्ष्याग्रहवृत्तयोः ।
दोर्ज्यामूले तु कक्ष्यातो बहिरन्तर्गते क्रमात् ॥ ८९७ ॥

कोटयन्त्यफलयोर्योगभेदाभ्यां स्फुटकोटिका ।
तयोर्वर्गयुतेर्मूलं कक्ष्याकेन्द्रग्रहान्तरम् ॥ ८९८ ॥

कर्णः स एव विज्ञेयः प्रतिवृत्तकलामितः ।
तज् ज्ञेयवृत्तव्यासार्धज्ञातवृत्तकलामितम् ॥ ८९९ ॥

कक्ष्यावृत्तस्य तन्नेमिस्थोच्चनीचस्य च द्वयोः ।
केन्द्रद्वयावभेदी यो मार्गस्तस्माद् ग्रहान्तरम् ॥ ९०० ॥

दोःफलं यत्तु तन्मूलान्तरं नीचोच्चकेन्द्रतः ।
कोटीफलं तद्युतोना त्रिज्या कक्ष्याख्यवृत्ततः ॥ ९०१ ॥

क्रमाद् दोःफलमूले तु बहिरन्तर्गते सति ।
सा तु दोःफलमूलस्य कक्ष्याकेन्द्रस्य चान्तरम् ॥ ९०२ ॥

तत्कृतौ दोःफलकृतिं युक्त्वा[1] कर्णः पदीकृतः ।
एवं कर्णो द्विधा साध्यः स तु मान्दो विशिष्यते ॥ ९०३ ॥

मान्दं नीचोच्चवृत्तं तत्कर्णवृत्तकलामितम् ।
यतस्तत्कर्णवृद्धिक्षयानुसारीदमुच्यते ॥ ९०४ ॥

मन्दकर्णे स्वलिप्ताभिः प्रमिते त्रिज्यया समे ।
पठितः परिधिर्मान्दः कर्णवृत्तकलामितः ॥ ९०५ ॥

मूलम्—1. B. मान्दे 2. A. B. निघ्नाद् यत्

व्याख्या—1. B. त्यक्त्वा for युक्त्वा

[मन्दकर्णे प्रकारान्तरम्]

विस्तृतिदलदोःफलकृति-
वियुतिपदं कोटिफलविहीनयुतम् ।
केन्द्रे मृगकर्किंगते
स खलु विपर्ययकृतो भवेत् कर्णः ॥ ४३ ॥

ऊनाधिके ततः कर्णे प्रतिवृत्तकलामिते ।
तेन कर्णेन दोःकोटिफले ताभ्यां च तन्नयेत् ॥ १०६ ॥

अन्योन्याश्रयता चैवामविशेषान्निरस्यते ।
तत्तत्कर्णाद्दोःकोटिघाताभ्यां त्रिज्यया हृते ॥ १०७ ॥

ताभ्यां त्रिभज्यया चापि प्राग्वत् कर्णं मुहुर्नयेत् ।
अथवा कोटिदोर्ज्यावाविशिष्टान्त्यफलैर्नयेत् ॥
अविशेषं विना यद्वा मन्दकर्णं नयेत् तथा ॥ १०८ ॥

विस्तृतीति (43-45)—

[अविशेषं विना मन्दकर्णः]

मध्यस्फुटान्तरं मन्दे कर्णवृत्तकलामितम् ।
मध्यस्फुटान्तरकृतिं त्यजेत् त्रिज्याकृतेस्तवा[1] ॥ १०९ ॥

तन्मूलं विवरं कक्ष्याकेन्द्रदोःफलमूलयोः ।
भेदो दोःफलमूलस्य यस्तु नीचोच्चकेन्द्रतः ॥ ११० ॥

कोटिजं तत् त्यजेत् कक्ष्याकेन्द्रदोःफलमूलयोः ।
भेदाद् दोःफलमूलेऽस्मिन् कक्ष्यावृत्ताद् बहिर्गते ॥ १११ ॥

अन्तर्गते तत् प्रक्षेप्यं कक्ष्याव्यासदलं यतः ।
कक्ष्याव्यासदलं तत् कर्णवृत्तकलामितम् ॥ ११२ ॥

व्याख्या—1. B. कृतेः सदा 2. A. om. यतः

3. C. om. स्वकलामिता

तेन हृता त्रिज्याकृति-
रयत्नविहितोऽविशेषकर्णः स्यात् ।
इति वा कर्णः साध्यो
मान्दे सकृदेव माधवप्रोक्तः ॥ ४४ ॥

[मन्दकर्णेन रविस्फुटः]

त्रिज्याघ्नो दोर्गुणः कर्णभक्तः[1] स्फुटभुजागुणः ।
तद्धनुः संस्कृतं स्वोच्चं नीच्चं वा युक्तितः स्फुटम् ॥ ४५ ॥

[मन्दस्फुटः]

कोटीफलयुतोनायास्त्रिज्याया दोःफलस्य च ।
वर्गयोगपदं कर्ण इति पूर्वं प्रदर्शितम् ॥ ९१३ ॥
कक्ष्यावृत्तव्यासदलेनेत्थं कर्णमितेन च ।
प्रतिवृत्तमिदं कर्णवृत्तव्यासार्धमानयेत् ॥ ९१४ ॥
तत्पुनर्व्यस्तकर्णेन त्रिज्यावर्गात्तु लभ्यते ।
ग्रहोच्चसूत्रविवरं ग्रहवृत्तकलामितम् ॥ ९१५ ॥
कर्णवृत्तमितं कृत्वा चापितं तत्कलामितम् ।
सम्पातात् कर्णवृत्तोच्चसूत्रयोः स्याद् ग्रहावधि ॥ ९१६ ॥
कर्णवृत्तोच्चसम्पाते धनर्णं तद् यथाविधि ।
एवं कृत्वा कर्णवृत्ते ग्रहस्य गतिरिष्यते ॥ ९१७ ॥
सम्पाते ग्रहवृत्तोच्चसूत्रयोर्यावती कला ।
तावती कर्णवृत्तेऽपि सूत्रे केन्द्रद्वयस्थितेः ॥ ९१८ ॥

यतः[1]—

ततो ग्रहोच्चसूत्रान्तरालं कर्णकलामितम् ।
तद्धनुर्योगभेदाभ्यां स्वोच्चे सिद्ध्येत् स्फुटग्रहः ।
व्यस्तकर्णस्फुटोच्चान्तरालदोर्गुणतोऽथवा ॥ ९१९ ॥

मूलम्—1. C. कर्ण; भक्तः
व्याख्या—1. A. om. यतः

[रविस्फुटाद् ग्रहमध्यमः]

अर्कस्फुटेनानयनं प्रकुर्यात्
स्वमध्यमस्यात्र वितुङ्गभानोः ।
भुजागुणं कोटिगुणं च कृत्वा
मृगादिकेन्द्रेऽन्त्यफलाख्यकोट्योः[1] ॥ ४६ ॥

भेदः, कुलीरादिगते तु योग-
स्तद्वर्गयुक्ताद् भुजवर्गतो यत् ।
पदं विपर्यासकृतः स कर्णः,
त्रिज्याकृतेस्तद्विहृतस्तु[2] कर्णः ॥ ४७ ॥

अर्कस्फुटेनेति (46-50)—

[रविस्फुटाद् ग्रहमध्यमः]

कर्णवृत्ते स्फुटोच्चान्तरालज्या स्वकलामिता[1] ।
तदुच्चसूत्रसम्पातात् कोटिस्तत्केन्द्रगामिनी ॥ ९२० ॥

तदन्त्यफलयोर्योगो विश्लेषो वा यथोचितम् ।
प्रतिमण्डलकेन्द्रस्य दोर्ज्यामूलस्य चान्तरम् ॥ ९२१ ॥

तद्दोर्वर्गयुतेर्मूलं प्रतिमण्डलकेन्द्रतः ।
ग्रहावधि व्यासदलं कर्णवृत्तकलामितम् ॥ ९२२ ॥

व्यासार्धं प्रतिवृत्तस्य त्रिज्यैव स्वकलामिता ।
तदेव व्यस्तकर्णः स्यात् कर्णवृत्तकलामितम् ॥ ९२३ ॥

त्रिज्यातुल्ये व्यस्तकर्णे कर्णो न्यूनाधिकस्ततः ।
ततस्त्रैराशिकेनात्र मन्दकर्णस्फुटो भवेत् ॥ ९२४ ॥

उच्चोनस्फुटतो दोर्ज्यां मन्दकर्णहतां हरेत् ।
त्रिज्यया तद्गुणां दोर्ज्यां व्यस्तकर्णेन वा हरेत् ॥ ९२५ ॥

मूलम्—1. A. B. $C_{3\cdot 9}$ कोटघा   2. C_6. विहृतः स कर्णः
व्याख्या—1. C. om. स्वकलामिता

तेनाहतामुच्चविहीनभानो-
जींवां भजेत् व्यासदलेन, लब्धम् ।
स्वोच्चे क्षिपेच्चापितमाद्यपादे,
चक्रार्धतः शुद्धमपि द्वितीये ॥ ४८ ॥

चक्रार्धयुक्तं तु तृतीयपादे,
संशोधितं मण्डलतश्चतुर्थे ।
एवंकृतं सूक्ष्मतरं हि मध्यं
पूर्वं पदं यावदिहाधिकं स्यात् ॥ ४९ ॥

अन्त्यात् फलात्[1] कोटिगुणं[2] चतुर्थं
त्वारभ्यते[3] यद्यधिकात्र कोटिः ।
सर्वत्र विष्कम्भदलं श्रुतौ वा
व्यासार्धके स्याद् विपरीतकर्णः ॥ ५० ॥

लब्धचापं धनर्णं स्यात् स्वोच्चे मध्यमसिद्धये ।
यादृशो नियमस्तत्र[1] व्यस्तकर्णत्रिजीवयोः ॥ ९२६ ॥

तादृशो नियमो वेद्यस्त्रिजीवामन्दकर्णयोः ।
कर्णस्त्रैराशिकेनातो व्यस्तकर्णाद् विधीयते ॥ ९२७ ॥

मध्यमात् स्फुटसंसिद्धिर्दोःफलाद् यदि केवलात् ।
मध्यसिद्धिस्फुटात् तस्मात् कर्णघ्नात् त्रिज्यया हृतात् ॥ ९२८ ॥

अथ स्फुटोच्चान्तरदोर्गुणं श्रुतिहतं हरेत् ।
त्रिज्यया लब्धचापेन कृते स्वोच्चे स्वमध्यमः ॥ ९२९ ॥

तदेव चापितं स्वोच्चे चक्रार्धं तेन वर्जितम् ।
चक्रार्धयुक्तं चक्राच्च त्यक्तं पदवशात् क्षिपेत् ॥ ९३० ॥

मूलम्—1. $C_{1\cdot2\cdot6\cdot8}$ पदात् 2. $B.C._{3\cdot4\cdot8}$ गुणः
3. $C_{3\cdot8}$ चारभ्यते

व्याख्या—1. A. यदृशा नियमास्तत्र

[स्फुटान्मध्यमे प्रकारान्तरम्]

अर्केन्द्वोः[1] स्फुटतो मृदूच्चरहिताद् दोःकोटिजाते फले
नीत्वा, कर्किमृगादितो विनिमयेनानीय कर्णं सकृत् ।
त्रिज्यादोःफलघाततः श्रुतिहृतं चापीकृतं, तत् स्फुटे
केन्द्रे मेषतुलादिगे धनमृणं तन्मध्यसंसिद्धये ॥ ५१ ॥

आद्ये पदे कोटिजीवा यदान्त्यफलसम्मिता ।
तावदाद्यं पदं कल्प्यं ततः पश्चाद् द्वितीयकम् ॥ ९३१ ॥

चतुर्थेऽपि पदे यावत् कोट्यन्त्यफलतुल्यता ।
तावत् कल्प्यं तृतीयं तु पदं पश्चाच्चतुर्थकम् ॥ ९३२ ॥

इति ।

अर्केन्द्वोः स्फुटत इति (51)—

[प्रकारान्तरेण मध्यमः]

तत्रोच्चरेखाग्रहयोर्भेदः कर्णकलामितः ।
तं कर्णवृत्तकेन्द्रस्थे नीचोच्चे परिकल्पयेत् ॥ ९३३ ॥

परान्तरालमाद्यं तत्रान्यविष्टान्तरं भवेत् ।
ग्रहोच्चसूत्रविवरं दोःफलं तद् भवेदिह ॥ ९३४ ॥

प्रतिमण्डलकेन्द्राग्रं नीचोच्चे तं प्रकल्पयेत् ।
तस्य दोःफलमूलस्य[1] ग्रहसूत्रेण संयुतेः[2] ॥ ९३५ ॥

कर्णमण्डलकेन्द्रान्तं तस्य कोटिफलं भवेत् ।
कोटीफलोनं व्यासार्धं तत्र दोःफलमूलतः ॥ ९३६ ॥

ग्रहान्तरालं तद्बाहुफलवर्गैक्यमूलतः ।
ग्रहान्तरालं तद्वृत्तकेन्द्रात् कर्णकलामितम् ॥ ९३७ ॥

उच्चासन्ने ग्रहे चैवं नीचासन्ने विधिः पुनः ।
कृत्स्नव्यासो ग्रहस्पृष्टः कर्णवृत्तकलामितः ॥ ९३८ ॥

मूलम्—1. B. अर्केन्दोः; C. अर्केन्दु

व्याख्या—1. A. फलसूत्रस्य　　2. A. संयुते

[मन्दकर्णे प्रकारान्तरम्]

मध्यतः स्फुटतश्चोच्चमुज्झित्वा तद्भुजे उभे ।
गृहीत्वाद्यां तयोस्त्रिज्याहताऽन्याप्ता, श्रुतिः स्फुटा[1] ॥ ५२ ॥

तद्व्यासार्धं कोटिफलयुक्तं कोटिरिहेष्यते ।
प्रतिमण्डलकेन्द्रान्तं कोटिमूलात्तु दोःफलम् ॥ ९३९ ॥
सा भुजाथ तयोर्वर्गयोगमूलं तु तच्छ्रुतिः ।
तदेव ग्रहवृत्तस्य व्यासार्धमिति कथ्यते ॥ ९४० ॥
यत्कक्ष्यावृत्तनेमिस्थितनीचोच्चवृत्तयोः ।
सूत्रं केन्द्रद्वयोद्भेदि कर्णवृत्तस्य नेमिगम् ॥ ९४१ ॥
ततो ग्रहान्तरं यत्तद्दोःफलं तत्कलामितम् ।
सूत्रं केन्द्रद्वयं स्पृष्टं तद्युक्तोनं स्फुटग्रहः ॥ ९४२ ॥
तस्य सूत्रस्य सम्पाते कक्ष्यायां यावती कला ।
तत्कर्णवृत्तनेम्योश्च सम्पाते तावती कला ॥ ९४३ ॥
केन्द्रैक्यात् कर्णकक्ष्यामण्डलयोरुभयोरपि ।
तस्य मध्यमतुल्यत्वान्मध्ये दोःफलसंस्कृतेः ॥ ९४४ ॥
ज्ञेयभोगग्रहे कर्णवृत्ते सिध्येत् स्फुटग्रहः ।
व्यत्ययेनास्य संस्कारात्[2] स्फुटे स्यान्मध्यमः स तु ॥ ९४५ ॥
मध्यमात् स्फुटसंसिद्धिर्दोःफलाद् यदि केवलात् ।
मध्यसिद्धिः स्फुटात्तस्मात् कर्णघ्नात् त्रिज्यया हृतात् ॥
त्रिज्याघ्नाद् व्यस्तकर्णाप्तादथवा फलसाम्यतः ॥ ९४६ ॥

इति ॥

मध्यत इति (52)—

[प्रकारान्तरेण मन्दकर्णः]

यादृशो नियमस्तत्र मन्दकर्णत्रिजीवयोः ।
स्वोच्चोनमध्यस्फुटयोर्दोर्ज्ययोरपि तादृशः ॥ ९४७ ॥

मूलम्—1. A. स्फुटः
व्याख्या—1. A. व्यत्ययेनान्यसंस्कारात्

[रविचन्द्रयोः तत्कालस्फुटः]

चन्द्रबाहुफलवर्गशोधितत्रिज्यकाकृतिपदेन संहरेत् ।
तस्य कोटिफललिप्तिकाहतां केन्द्रभुक्तिमिह, यच्च लभ्यते ॥ ५३ ॥

स्वोच्चोनमध्यदोर्ज्यायास्त्रिज्याघ्नायास्ततो हृतः ।
मन्दकर्णो भवेत् सूक्ष्मः स्वोच्चोनस्फुटदोर्ज्यया ॥ ९४८ ॥

इति ।

चन्द्रबाहुफलेति (53-54)—

[रवीन्द्वोः स्फुटगतिवासना]

इष्टकाले ग्रहे स्वोच्चात् पदे यावति वर्तते ।
उच्चनीचावधिस्तत्र दोर्ज्यापदवशात् ग्रहात्[1] ॥ ९४९ ॥

ततोऽपरा च कोटिज्या दोर्ज्यातो व्यस्तविग्गता ।
यादृग् वेगोऽत्र दोर्ज्यायास्तादृक् तद्दोःफलस्य च ॥ ९५० ॥

तत्संस्कृते मध्यभोगे स्फुटभोग उदाहृतः ।
दोर्ज्यावृद्धिरिहाल्पा चेद् दोःफलस्यापि सा तथा ॥९५१॥

इतरेतरवृद्धिक्षयानुसारितया द्वयोः ।
सा च कोटिगुणे पूर्णे पूर्णा तत्राल्पकेऽल्पिका ॥९५२॥

ततः कोटिगुणेनैव तद्वृद्धिः परिकल्प्यते ।
ओजयुग्मपदाद्यन्त[2]दोर्ज्यावेगो धनुर्मितः ॥ ९५३ ॥

पूर्णत्वात् कोटिजीवाया दोर्ज्याह्रासप्रवृत्तितः ।
कोटिह्रासानुरूप्येण ततः सः क्षीयते क्रमात् ॥ ९५४ ॥

दोर्ज्यागतिश्चापगतेरल्पिका स्यात्ततः क्रमात् ।
दोर्ज्यावृद्धौ च सा कोट्यां क्षीणायां शून्यतामियात् ॥ ९५५ ॥

पदान्ते केन्द्रतः क्षीणा तद्वृद्धिर्वर्धते ततः ।
खण्डज्याक्रम्मिता दोर्ज्यागतिस्तत्र प्रकल्प्यते ॥ ९५६ ॥

व्याख्या—1. A. दोर्ज्याग्रहवशात् पदात् 2. B. पदान्यन्त

तद्विशोधय मृगादिके[1] गतेः,[2] क्षिप्यतामिह तु कर्कटादिके[3] ।
तद् भवेत् स्फुटतरा गतिर्विधोरस्य तत्समयजा, रवेरपि[4] ॥ ५४ ॥

खण्डानां च स्वकोटिज्यावृद्धिह्रासानुसारिता ।
कोटिज्यानिहतां तस्माद् दिनकेन्द्रगतिं हरेत् ॥ ९५७ ॥

80

त्रिज्यया स्फुटवृत्तघ्नामशीत्या च विभाजिताम् ।
भूयस्त्रिज्याहृतां बाहुफलकोट्या च संहरेत् ॥ ९५८ ॥

लब्धं मध्यगतौ स्वर्णं केन्द्रे कर्किमृगादिगे ।
क्षणकेन्द्रगतिस्तत्र दिनक्षणगुणा सती ॥ ९५९ ॥

दिनकेन्द्रगतेस्तुल्या तत्कृत्स्नज्यापि तत्समा ।
दिनकेन्द्रगतेः कृत्स्नज्या पुनः स्यात् ततोऽल्पिका ॥ ९६० ॥

इष्टक्षणगतेर्भिन्ना प्रायस्तत्पार्श्वयोर्गतिः ।
दिनभुक्तेर्न षष्ट्यंशः स्वेष्टनाडीगतिस्ततः ॥ ९६१ ॥

तद्दिनार्धगतिः स्वोच्चाद् दिनगत्यर्धतोऽधिका ।
क्रमेण वर्धमानत्वात् गतेस्तत्पार्श्वयोर्द्वयोः ॥ ९६२ ॥

नीचस्थे तु ततोऽल्पैव क्षीणत्वात् पार्श्वयोर्द्वयोः ।
क्षीणत्वं तु यदा कोट्यास्तदा तुल्यं गतिद्वयम् ॥ ९६३ ॥

दिनमध्यगतिः कल्प्या दिनभुक्तिनया सदा ।
द्रष्टव्यं तदिदं चन्द्रस्फुटवाक्येषु सर्वदा ॥ ९६४ ॥

यत्र चन्द्रोच्चयोर्योगो दिनान्तान्नातिदूरगः ।
तद्दिने स्फुटभुक्तिर्या सैवास्तमयिकी गतिः ।
अस्तवाक्यान्तरं चेन्दोः स्फुटा ह्यौदयिकी गतिः ॥ ९६५ ॥

इति ।

मूलम्—1. C_6 मृगादिगे 2. C_6 गतौ
3. A. C_{6-9} कर्कटादिगे 4. C_{10} विधोरपि

[तत्कालनक्षत्रम्]

लिप्तीकृतो निशानाथः शतैर्भाज्योऽष्टभिः, फलम् ।
अश्विन्यादीनि भानि स्युः, षष्ट्या हत्वा गतागते ॥ ५५ ॥

गतगन्तव्यनाड्यः स्युः स्फुटभुक्त्योदयावधेः ।

] तत्कालतिथिः]

अर्कहीनो निशानाथो लिप्तीकृत्य विभज्यते ॥ ५६ ॥

820
शून्याश्विपर्वतैर्लब्धास्तिथयो या गताः क्रमात् ।

[तत्कालकरणम्]

भुक्त्यन्तरेण नाड्यः स्युः षष्ट्या हत्वा गतागते ॥ ५७ ॥

तिथ्यर्धहारलब्धानि करणानि बवादितः ।
विरूपाणि सिते पक्षे सरूपाण्यसिते विदुः ॥ ५८ ॥

[तत्कालविष्कम्भः]

विष्कम्भाद्या रवीन्द्वैक्याद्योगाश्चाष्टशतीहृताः ।
भुक्तियुक्त्या गतैष्याभ्यां षष्टिघ्नाभ्यां च नाडिकाः ॥ ५९ ॥

[नक्षत्र-तिथि-योग-करणवासना]

लिप्तीकृत इत्यादि (55-59)—

नक्षत्रतिथियोगानां संवित्तिः करणस्य च ।
स्फुटग्रहाद् रवीन्द्वैक्यात् तद्भेदाच्च तदर्धतः ॥ ९६६ ॥

भचक्रस्वविभागांशैर्लभ्यन्ते हरणात् क्रमात् ।
अश्विन्यादीनि भानि स्युस्तिथयः प्रतिपन्मुखाः ।
विष्कम्भाद्यं च योगर्क्षं करणानि बवादितः ॥ ९६७ ॥

इति ।

[कुजादिस्फुटः]

मान्दं शैघ्रं पुनर्मान्दं शैघ्रं चत्वार्यनुक्रमात् ।
कुजगुर्वर्कजानां हि कर्माण्युक्तानि सूरिभिः ॥ ६० ॥

[स्फुटकर्म]

40
दोःकोटिज्याष्टमांशौ स्वखाब्ध्यंशोनौ शनेः फले ।
दोर्ज्या त्रिज्याप्तसप्तैक्यं गुणो मान्दे कुजेड्ययोः ॥ ६१ ॥

39 82
नवाग्नयो द्व्यशीतिश्च हारौ दोःकोटिजीवयोः ।
पृथक्स्थे मध्यमे कार्यं दोःफलस्य धनुर्दलम् ॥ ६२ ॥
रविमध्यं विशोध्यास्मात् पृथक्स्थाद् बाहुकोटिके ।
आनीय बाहुजीवायास्त्रिज्याप्तं गुरुमन्दयोः ॥ ६३ ॥
षोडशभ्यो नवभ्यश्च, कुजस्यापि स्वदोर्गुणात् ।
53
त्रिज्याप्तं द्विगुणं शोध्यं त्रीषुभ्यः शिष्यते गुणः ॥ ६४ ॥

[ग्रहस्फुटवासना]

मान्दमित्यादि (60-68b)—

कर्णवृत्तं तदर्केन्द्वोर्भगोलाभिन्नकेन्द्रकम् ।
अतः सैव तयोर्भुक्तिः स्याद् भगोलकलामिता ॥ ९६८ ॥

भगोलमध्ये चान्येषां[1] शीघ्रनीचोच्चकेन्द्रकम् ।
तन्नेम्या मन्दनीचोच्चकेन्द्रं भ्राम्यत्यनुक्षणम्[2] ॥ ९६९ ॥

मन्दनीचोच्चनेम्यां च सर्वेषां प्रतिमण्डलम् ।
मन्दनीचोच्चकेन्द्रं स्वकर्णवृत्तस्य केन्द्रगम् ॥ ९७० ॥

शीघ्रनीचोच्चनेमिस्थकेन्द्रत्वादुभयोस्तयोः ।
प्रतिवृत्ततया कल्प्यं शैघ्रे तत्कर्णमण्डलम् ॥ ९७१ ॥

तत्रत्यग्रहभोगस्य ज्ञातत्वान्मन्दकर्मणा ।
यः शीघ्रकर्णः शीघ्रोच्चनीचकेन्द्राद् ग्रहावधिः ॥ ९७२ ॥

व्याख्या—1. A. वान्येषां 2. B. Gap for क्षणम्

अशीतिरेव तेषां हि हारस्ताभ्यां फले उभे ।
आनीय, पूर्ववत् कर्णं सकृत् कृत्वा,थ[1] दोःफलम् ॥ ६५ ॥

त्रिज्याघ्नं कर्णभक्तं यत् तद् धनुर्दलमेव च ।
मध्यमे कृतामान्दे तु संस्कृत्यातो विशोधयेत् ॥ ६६ ॥

मन्दोच्चं तत्फलं कृत्स्नं कुर्यात् केवलमध्यमे ।
तस्मात् पृथक्कृता[2]च्छैघ्रं प्राग्वदानीय चापितम् ॥ ६७ ॥

कृतमान्दे तु कर्तव्यं[3] सकलं, स्यात् स्फुटः स च ॥ ६८a ॥

[बुधशुक्रयोः स्फुटः]

बुधमध्यात् स्वमन्दोच्चं त्यक्त्वा दोःकोटिजीवयोः ॥ ६८b ॥

तद्व्यासार्धकृतं वृत्तं ज्ञेयभोगं तु मण्डलम् ।
दोःकोटिफलकर्णाद्यैर्गतिस्तत्रापि पूर्ववत् ॥ १७३ ॥

"ज्ञातभोगग्रहं वृत्तं सर्वत्र प्रतिमण्डलम् ।
कक्ष्यावृत्तं च तत्तुल्यं ज्ञेयभोगप्रवेशगम्" ॥ १७४ ॥
(सिद्धान्तदर्पणम् , 22)

ज्ञातज्ञेयग्रहगतिवृत्तकेन्द्रान्तरं तु यत् ।
तद्व्यासार्धकृतं वृत्तं कक्ष्याकेन्द्रे प्रकल्पयेत् ॥ १७५ ॥

नेम्यां चास्यां मन्दफलसंस्कृतग्रहकेन्द्रकम् ।
तेषु त्रिभिर्ज्ञेयभोगः पञ्चभिर्वा प्रकल्प्यताम् ॥ १७६ ॥

इति ।

[बुधशुक्रयोः स्फुटकर्मणि वैशिष्टयम्]

बुधमध्यादिति (68b-80)—

ज्ञातभोगग्रहं वृत्तं स्वल्पमन्यं महद् यदा ।
वृत्तस्य महतः केन्द्रं कबलीकुरुते न तु ॥ १७७ ॥

मूलम्— 1. C_1 कृत्वा तु   2. C_{10} पृथक्स्थितात्
3. C_1 संस्कार्यं for कर्तव्यं

षडंशाभ्यां फलाभ्यां तु कर्णः कार्योऽविशेषितः[1] ।
दोःफलं केवलं स्वर्णं केन्द्रे जूकक्रियादिगे ॥ ६९ ॥

एवंकृतं हि[2] यन्मध्यं स्फुटमध्यं बुधस्य तु ।
रविमध्यं ततः शोध्यं, दोःकोटिज्ये ततो नयेत् ॥ ७० ॥

दोर्ज्या द्विघ्ना त्रिभज्याप्ता शोध्यैकत्रिंशतो[3] गुणः ।
मन्दकर्णहतः सोऽपि त्रिज्याप्तः स्यात् स्फुटो गुणः ॥ ७१ ॥

वृत्तमल्पं तदा केन्द्रान्तरव्यासदलं तयोः ।
कक्ष्यावृत्तं प्रकल्प्यं स्यात् तन्नेमिस्थं तथापरम् ॥ ९७८ ॥

व्यासार्धं ज्ञेयवृत्तस्य कक्ष्याकेन्द्राद् ग्रहावधि ।
कक्ष्यानेमिस्थनीचोच्चवृत्ते तत्र ग्रहाश्रये ॥ ९७९ ॥

तत्केन्द्रस्य गतिः कल्प्या ग्रहसम्बन्धिनी गतिः ।
तन्नेमिस्थग्रहगतिरुच्चस्यापि प्रकल्प्यते ॥ ९८० ॥

यन्मन्दकर्णव्यासार्धं मण्डलं बुधशुक्रयोः ।
भगोलकेन्द्रं तन्नैव कबलीकुरुते ततः ॥ ९८१ ॥

शैघ्रं नीचोच्चवृत्तं स्वं[1] कक्ष्यावत् परिकल्प्यते ।
मन्दकर्णकृतं वृत्तं तन्नेम्यामुच्चनीचवत् ॥ ९८२ ॥

अत एव हि शीघ्रोच्चनीचवृत्तकलामितम् ।
उच्चनीचतया प्रोक्तं ग्रहवृत्तं बुधाच्छयोः ॥ ९८३ ॥

कुजादेः शीघ्रवृत्तं तु ग्रहवृत्तकलामितम् ।
अतो ग्रहगतिर्ज्ञेयभोगवृत्ते तु पूर्ववत् ॥ ९८४ ॥

कक्ष्यावृत्तस्य परिधौ रविभुक्तकलामिते ।
मृदुकर्णवृत्तकेन्द्राक्रान्ते शैघ्रं तु दोःफलम् ॥ ९८५ ॥

मूलम्— 1. $C_{1-5\cdot10}$ कार्योऽविशेषतः 2. A. $C_{6\cdot7}$ तु for हि
3. C_1 त्रिंशको

व्याख्या—1. A. वृत्तस्य

तद्धते बाहुकोटिज्ये खाहिभक्ते फले उभे ।
ताभ्यां कर्णं सकृन्नीत्वा त्रिज्याघ्नं दोःफलं हरेत् ॥ ७२ ॥
कर्णेनाप्तस्य यच्चापं कृत्स्नं तद् भानुमध्यमे ।
क्रमेण प्रक्षिपेज्जह्यात् केन्द्रे मेषतुलादिगे ॥ ७३ ॥
एवं शीघ्रफलेनैव संस्कृतं रविमध्यमम् ।
बुधः स्यात् स स्फुटः, शुक्रोऽप्येवमेव स्फुटो भवेत् ॥ ७४ ॥

शीघ्रकर्णवृतेर्नेम्यां रविभुक्तकलामिते ।
धनर्णं क्रियते तत्र सर्वदा बुधशुक्रयोः ॥ ९८६ ॥
क्रान्तिमण्डलमार्गस्थं शीघ्रं नीचोच्चमण्डलम् ।
तन्नेमिस्थितनीचोच्चवृत्तं वलितमर्धशः ॥ ९८७ ॥
तन्मन्दकर्णवृत्तं च ग्रहवृत्तं च तद्वशात् ।
तन्मन्दकर्णवृत्तस्य क्रान्तिमण्डलमार्गतः ॥ ९८८ ॥
विक्षेपाद्वर्धशो मन्दस्फुटाद् विक्षेपसम्भवः ।
क्षेपकोटिश्च तत्त्रिज्यावर्गभेदात् पदं भवेत् ॥ ९८९ ॥
विक्षेपकोटिवृत्तं च क्रान्तिमण्डलपार्श्वतः ।
घटिकामण्डलस्येव द्युवृत्तं परिकल्प्यते ॥ ९९० ॥
भगोलमध्याद् विक्षेपकोटिमण्डलकेन्द्रकम् ।
शीघ्रोच्चनीचव्यासार्धेनोन्नतं क्रान्तिमार्गतः ॥ ९९१ ॥
समन्ताविष्टविक्षेपान्तरितं च प्रकल्प्यते ।
शीघ्रोच्चवृत्तं चेष्टक्षेपान्तरं तद्वदेव हि ॥ ९९२ ॥
तथा सति तु शीघ्रोच्चनीचवृत्तस्य नेमिगम् ।
विक्षेपकोटिवृत्तस्य केन्द्रमप्यवतिष्ठते ॥ ९९३ ॥
तत्राद्यं शीघ्रनीचोच्चमन्यत्तु प्रतिमण्डलम् ।
विक्षिप्ताविक्षिप्तनीचोच्चकेन्द्रान्तरजां कृतिम् ॥ ९९४ ॥
शीघ्रनीचोच्चकेन्द्रग्रहान्तरालकृतौ क्षिपेत् ।
मूलं भगोलमध्यात्तवन्तरालं ग्रहस्य तु ॥
भगोलमध्यतस्तेन विक्षेपो नीयतां बुधैः ॥ ९९५ ॥

[शुक्रे विशेषः]

240

मन्दकेन्द्रभुजाजीवा खजिनांशेन संयुता ।

14

मनवस्तस्य हारः स्यात्, तद्भक्ते बाहुकोटिके ॥ ७५ ॥

अविक्षिप्ते मन्दकर्णवृत्ते तत्प्रतिमण्डलम् ।
शीघ्रकर्मण्यथ क्षिप्ते ज्ञेयं तत्कोटिमण्डलम् ॥ ९९६ ॥

तन्मन्दकर्णविक्षेपवर्गयोरन्तरं पदम्[1] ।
क्षेपोऽन्त्यः कर्णवृत्तेन प्रमाय पठितस्त्विह ॥ ९९७ ॥

इष्टक्षेपोऽप्यतः कर्णस्त्रिज्यैव स्वकलामितः ।
प्रतिवृत्तमिते कर्णे तत ऊनाधिके सति ॥ ९९८ ॥

मन्दकर्णहतक्षेपस्त्रिज्याभक्तो भवेत् स्फुटः ।
विक्षेपकोटिस्तन्मन्दकर्णवर्गान्तरात् पदम् ॥ ९९९ ॥

शीघ्रोच्चनीचवृत्तं च प्रतिवृत्तकलामितम् ।
तत्कोटिफलयुक्तोनक्षेपकोट्याश्च वर्गतः ॥ १००० ॥

तद्दोःफलकृतिं युक्त्वा शीघ्रकर्णः पदं भवेत् ।
त्रिज्याघ्नं दोःफलं येन भक्तं शीघ्रविधौ स्फुटम् ॥ १००१ ॥

शीघ्रकर्णस्फुटक्षेपवर्गयोगपदं तु यत् ।
भूताराग्रहयोस्तत्तु विवरं सुस्फुटं भवेत् ॥ १००२ ॥

त्रिज्याघ्नस्फुटविक्षेपस्तेन भक्तो ह्यतिस्फुटः ।
मन्दस्फुटात् स्वपातोनाद् दोर्ज्याऽन्त्यक्षेपताडिता ॥ १००३ ॥

त्रिज्यया विहृता भूयो मन्दकर्णेन ताडिता ।
भूताराग्रहयोरन्तराप्तः क्षेपस्ततो भवेत् ॥ १००४ ॥

मन्दस्फुटाद्यो विक्षेपो यद् भूताराग्रहान्तरम् ।
तयोरानयनोपायोऽप्येवमेव ज्ञशुक्रयोः ॥ १००५ ॥

किन्तु क्षेपोऽन्तिमः शीघ्रवृत्तेन पठितस्तयोः ।
अल्पत्वान्निजवृत्तस्य शीघ्रान्त्यफलवत् सदा ॥ १००६ ॥

व्याख्या—1. A. adds here भवेत्

स्याताां, मन्दफले तस्य दोःफलं च स्वमध्यमे ।
[1]कृत्वाऽविशेषकर्णं च,[2] क्रियतां शीघ्रकर्म च ॥ ७६ ॥

ततस्त्रिज्याहतः क्षेपः[1] शीघ्रोऽन्त्यफलभाजितः ।
स भूयो मन्दकर्णघ्नस्त्रिज्ययैव समुद्धृतः ॥ १००७ ॥

तन्मन्दकर्णयोः क्षेपकोटिवर्गान्तरात् पदम् ।
तच्छीघ्रकर्णयोर्वर्गैक्यपदं भूग्रहान्तरम् ॥ १००८ ॥

क्षेपकोटीहतं शीघ्रवृत्तत्रिज्याहृतं तयोः ।
शीघ्रकर्णोऽपि तद्दोःकोटिफलक्षेपकोटिभिः ॥ १००९ ॥

[गोलसारगतं स्फुटकर्म]

गुरुभिः स्फुटकर्मेत्थं गोलसारे प्रदर्शितम् ॥ १०१० ॥

"विदितद्विहृद्भ्रमवृत्तप्रमिता ग्रहतत्तुङ्गविवरभुजा ।
वेद्यग्रहचलयोर्भूवलिप्ताभिर्मीयते, भिदा च[2] तयोः ॥ १०११ ॥

कक्ष्यामण्डलमध्यस्थमन्दवृत्तस्थबाहुकोटिभ्याम् ।
श्रुतिवृत्तप्रमिताभ्यां तन्मानेनात्र मीयते कक्ष्या ॥ १०१२ ॥

स्फुटभुजकोटिभ्यां वा परिधिव्यासार्धतोऽपि तन्मानम् ।
श्रुतिवृत्तमिदं क्षिप्तं ह्यत्रस्य[3]ग्रहवशाद् यतः क्षेपः ॥ १०१३ ॥

तत्रापि स्वप्रमितः क्षेपो, न तु योजनैः समानतया ।
तेन न[4] कर्णेनाप्यः, प्रमितः[5] स हि कक्ष्यया सदा समयः[6] ॥ १०१४ ॥

एवं कक्ष्याशीघ्रे क्षिप्तेऽस्मिन् कोटिमण्डलं च ततः ।
कर्णघ्नत्रिज्याप्तक्षेपभुजामान्दकर्णकोटिकया ॥ १०१५ ॥

मूलम्— 1. C_1 कृता for कृत्वा 2. A. C_{1-6} कर्णश्च

व्याख्या—1. A. हृतक्षेपः 2. A. भिदापि तयोः
3. A. om. स्य 4. A. B. Hapl. om. of न
5. A. कर्णेनाप्रमितः 6. A. समा समया

द्विघ्ना दोर्ज्या त्रिभज्याप्ता त्याज्या[1]ऽस्यैकोनषष्टितः ।
गुणः, सोऽपि स्फुटीकार्यो मन्दकर्णेन पूर्ववत् ।। ७७ ।।

विहगभ्रमवलयांशैरुदितात् परिधेः फलाभ्यां च ।
साध्यः कर्णस्, तेन त्रिज्याघ्ना बोःफलात्तु विवरभुजा ।। १०१६ ।।

एवमिह स्फुटसिद्धिर्द्वाभ्यामेवारजीवमन्दानाम् ।
भूग्रहविवरश्रवणे कोटिः कर्णो भुजोक्तविक्षेपः ।। १०१७ ।।

सैव भुजा त्रिज्याघ्ना भूग्रहविवरोद्धृता स्फुटः क्षेपः ।
मन्दश्रुतिनिघ्नोऽसौ मान्दः क्षेपो विभज्यतेऽनेन ।। १०१८ ।।

विदितग्रहवलयमितात् परिधेर्व्यासार्धतोऽथवा कर्णः ।
तस्य च कोटित्वेऽत्र क्षेपो मान्दो भुजा ततः स्पष्टः ।। १०१९ ।।

प्राग्वन्मन्दफलेन स्वमध्यमं स्पष्टमत्र बुधसितयोः[1] ।
तत एव च विक्षेपः पुनः स्वशीघ्रोच्चयोर्विपर्यासः ।। १०२० ।।

अल्पतया कक्ष्यायाः शीघ्राद् वृत्तात् तदाऽऽहृत्य ।
मन्दश्रुतिविक्षिप्त्योः कोट्या त्रिज्याहृतं स्फुटं तदिह ।। १०२१ ।।

क्षेपो विबुधैः पठित[2]स्त्रिज्यानिघ्नोऽन्त्यफलभाज्यः ।
भूग्रहविवरार्धमिहाप्यन्यो ग्राह्यः[3] स्फुटश्च ततः ।। १०२२ ।।

शीघ्रफलेनैव रवेः संस्कृतमिह मध्यमं स्फुटं तु तयोः ।
स्वक्षितिविवरघ्नं तद् योजनमपि केवलान्त्यफलभाज्यम् ।। १०२३ ।।

बहुकारणगतिकत्वादेवं नियता ग्रहा भगोलगताः ।
कालमेन चिदेवैषां[4] ज्ञेयः कालस्तु तद्गतिः कालात् ।। १०२४ ।।

इत्यन्योन्याश्रयताऽप्यसकृत्क्रियया निराक्रियते ।
समसमयत्वात् प्रवहभ्रमणस्यानेन ते परिच्छेद्याः ।। १०२५ ।।

मूलम्— 1. $C_{1-5\cdot10}$ शोध्या for त्याज्या

व्याख्या—1. A. सितबुधयोः 2. C. भूग्रज for पठित

3. C. ग्रह्या for ग्राह्यः 4. A. चिदेतेषां

गुणः स मन्दकर्णघ्नस्त्रिज्याप्तस्तस्य च स्फुटः ।
अशीत्याप्ते भुजाकोटी, तद्घ्ने शीघ्रफले भृगोः ॥ ७८ ॥
दोःफलं त्रिज्यया हत्वा शीघ्रकर्णहृतं भृगोः ।
चापितं भास्वतो मध्ये संस्कुर्यात् सः स्फुटः सितः ॥ ७९ ॥

घटिकापक्रम[1]मण्डलयोगश्चलतीह पूर्वपश्चिमयोः ।
रवितमसोः सूत्रेणोद्गच्छति चन्द्रोच्चतो भगोलोऽपि" ॥ १०२६ ॥
(गोलसारः, ३.१५-३०)[2]

इति ।

[ग्रहाणां स्फुटीकरणवासना]

इह विप्रतिपन्नेषु ग्रहाणां स्फुटकर्मणि ।
स्फुटद्वयेन वृत्ततुल्यास्ते यथा स्युस्तथोच्यते ॥ १०२७ ॥
स्फुटकर्म द्विधा प्रोक्तं मन्दशीघ्रविभेदतः[3] ।
मन्दान्त्यफलनीचोच्चवृत्ते भुक्तिश्च मध्यमा ॥ १०२८ ॥
प्रतिमण्डलकर्णश्च प्रतिवृत्तकलामितः ।
प्रतिमण्डलकर्णः स भिन्नरूपः प्रतिक्षणम् ॥ १०२९ ॥
त्रिज्यातुल्यस्तथाप्येषः स्ववृत्तप्रमितः सदा ।
प्रतिमण्डलकर्णान्त्यफलयोर्न्यायसाम्यतः ॥ १०३० ॥
भेदः परस्परायत्तः कृतो यत्राविशेषणात् ।
अन्त्यं फलं त्रिजीवाघ्नं तेन कर्णेन संहृतम् ॥ १०३१ ॥
प्रतिवृत्तमितं तस्मात् कर्णवृत्तमितं भवेत् ।
स्ववृत्तप्रमितः कर्णः प्रतिवृत्तकलामितात् ॥ १०३२ ॥
यावृगंशाधिकोनः स्यात् तावृगन्त्यफलं ततः ।
कर्णान्त्यफलयोर्वृद्धिक्षययोर्न्यायसाम्यतः[4] ॥ १०३३ ॥

व्याख्या—1. A. B. C. om. पक्रम, but restored from *Golasāra*.

2. The references are to the *Golasāra* of Nilakaṇṭha Somayāji, ed. by K.V. Sarma, (Hoshiarpur, 1972).

3. A. प्रभेदतः		4. C. साम्यता

येनान्योन्याश्रयत्वेन मन्दकर्णोऽविशेष्यते ।
मन्दकर्णान्त्यफलयोस्तत्र तुल्यस्वभावयोः ॥ १०३४ ॥
आद्यतो मध्यपर्वान्तात् त्यजेदेव मुहुर्मुहुः ।
अविशिष्टे पुनस्तस्मात् स्पर्शकालं समाविशेत् ॥ ९१ ॥

प्रक्षिपेन्मध्यपर्वान्ते स्थित्यर्धं प्राक्तनं क्षिपेत् ।
नीत्वार्केन्दू तथा पातं तत्र विक्षेपमानयेत् ॥ ९२ ॥

स्थित्यर्धं च ततः क्षेपात् बिम्बयोगार्धतो नयेत् ।
आद्ये तु मध्यपर्वान्ते स्थित्यर्धं प्रक्षिपेदपि ॥ ९३ ॥

मूलम्—1. A गतः ; C. (edn.) गती 2. A. स्थित्यर्धे

व्याख्या—1. A. B. पातं षष्ड्भमर्कं

[स्थित्यर्धाभ्यां स्पर्शमोक्षौ]

स्पर्शस्थितिदलं शोध्यं पर्वान्तादितरत् क्षिपेत् ।
स्पर्शमोक्षौ तु तौ स्यातां मध्ये स्यात् परमो ग्रहः[1] ॥ २७ ॥

अर्केन्दुपातांस्तत्रापि नीत्वा क्षेपं तथैव च ।
स्थित्यर्धं मध्यपर्वान्ते त्याद्य एव क्षिपेन्मुहुः ॥ ९४ ॥

तावत्कुर्यादिदं यावत् स्थित्यर्धस्याविशिष्टता ।
स्थित्यर्धेनाविशिष्टेन युक्तेऽस्मिन् मोक्षमादिशेत् ।. ९५ ॥

[स्थित्यर्धाभ्यां स्पर्शमोक्षानयनवासना]

[श्लोकः 27—]

मध्यग्रहश्चलेत् स्थित्यर्धेऽधिके स्पर्शमोक्षयोः ।
अन्त्यविक्षेपकोटिघ्नात् पातोनार्कस्य दोर्गुणात् ॥ ९६ ॥

इष्टविक्षेपकोट्याप्ता क्षेपकोटिगुणो भवेत् ।
अन्त्यद्युज्याहता दोर्ज्या यथेष्टद्युज्यया हृता ॥ ९७ ॥

इष्टविक्षेपकोट्याश्च तस्याः क्षेपस्य तस्य च ।
वर्गयोगपदं यत् स्याच्चापितं यच्च दोर्धनुः ॥ ९८ ॥

पातोनार्कस्य विश्लेषं तयोः षष्ठ्या निहत्य तु ।
गत्यन्तरेण विभजेदर्केन्द्वोर्नाडिकादिकम् ॥ ९९ ॥

प्रक्षिपेत् पूर्वपर्वान्ते विक्षेपे युक्पदस्थिते ।
त्यजेदोजपदस्थेऽस्मिन् पर्वान्तः सुस्फुटो यतः ॥ १०० ॥

क्षेप ओजपदस्थश्चेदुपर्युपरि वर्धते ।
क्षीयते युक्पदगते क्षेत्रं स्थित्यर्धसम्भवम् ॥ १०१ ॥

पर्वान्तः प्रचलेत् स्थित्यर्धेऽधिके पूर्वपर्वतः ।
एवंकृतो हि पर्वान्तः सूर्येन्द्वोर्ग्रहणे स्फुटः ॥ १०२ ॥

मूलम्—1. C. परमग्रहः

[रव्युदयास्तमये स्पर्शमोक्षयोः दृश्यादृश्यत्वम्]

उदयास्तमयासन्ने स्पर्शे मोक्षे च संशयः ।
स्पर्शो दृश्य उतादृश्यश्चन्द्रस्यास्तमये त्विति ॥ २८ ॥

प्राग्वा पश्चाच्च मोक्षः स्यात् तत्प्रदेशोदयादिति ॥ २९[a] ॥

[स्पर्शमोक्षयोः दृश्यादृश्यत्वनिर्णयवासना]

उदयास्तमयासन्ने इति (28-36) —

खमध्यतस्तमोबिम्बघनमध्यस्थनेमिकम् ।
वृत्तं यत्तत् तमोबिम्बदृङ्मण्डलमुदीरितम् ॥ १०३ ॥

ततो दृङ्मण्डलात् क्रान्तिवृत्तस्य विवरं हि यत् ।
अधोभागे तमोबिम्बनेम्यां तत् परिकल्पयेत् ॥ १०४ ॥

तमोबिम्बे परिणतः स दृक्क्षेपोऽभिधीयते ।
तद्विष्टक्षेपयोर्योगे विश्लेषो वा यथोचितम् ॥ १०५ ॥

तावदन्तरिते दृङ्मण्डलाद्विन्दुस्तमो व्रजेत् ।
तदन्तरं तमोबिम्बगतं दोर्ज्या प्रकल्प्यते ॥ १०६ ॥

तत् तमोव्यासदलयोः कोटिर्वर्गान्तरात् पदम् ।
दोर्ज्यामूलात् तमोबिम्बघममध्यान्तरं च सा ॥ १०७ ॥

तत्कोटिलम्बनयुतेस्तमश्शङ्कुर्यदा समः ।
तदेन्दोर्ग्रहणे स्पर्शमोक्षौ लक्ष्यौ न चान्यथा ॥ १०८ ॥

तमोबिम्बे चन्द्रबिम्बस्पर्शमोक्षौ तदैव हि ।
भूपृष्ठसमपार्श्वस्थौ नान्यथा व्यवधानतः ॥ १०९ ॥

वलनक्षेपसद्भावे त्वेवं दृश्यत्वकल्पना ।
विक्षेपवलनाभावे तौ दृङ्मण्डलमूलगौ ॥ ११० ॥

तदा लम्बनसंयुक्ततमोव्यासार्धसम्मिते ।
दृश्याविन्दौ स्पर्शमोक्षौ न तु न्यूने कथञ्चन ॥ १११ ॥

[स्पर्शमोक्षयोः दृश्यादृश्यत्वनिर्णयः]

स्पर्शे रव्युदये कार्यो दृक्क्षेपः क्षिप्तिरैन्दवी ॥ २९b ॥

व्यासार्धघ्नः स्फुटः क्षेपः[1] सम्पर्कार्धहृतस्तु यः ।
[2]तद्दृक्क्षेपधनुर्भेदो दिशोः साम्येऽन्यथा युतिः ॥ ३० ॥

तदूनभत्रयाज्जीवा तमोव्यासदलाहृता ।
त्रिज्याप्ता लम्बने योज्या भूच्छायाशङ्कुलब्धये ॥ ३१ ॥

द्वितीयस्फुटभागस्य[3] तिथ्यंशो लम्बनं त्विह ।
राशित्रयाधिके क्षेपदृक्क्षेपानीतकार्मुके ॥ ३२ ॥

वलनक्षेपबाहुल्याद् यदा तद्योगसम्भवः[1] ।
वलनं स्यात् तमोबिम्बपादतोऽभ्यधिकं भवेत् ॥ ११२ ॥

पार्श्वप्रवेशात् तमसः स्पर्शमोक्षौ तदोपरि ।
ततस्तत्कोटिरहिते शङ्कौ दृश्यौ तु तावुभौ ॥ ११३ ॥

भूपृष्ठसमपार्श्वस्थे तत्प्रवेशे तथाविधे ।
तदा तमोबिम्बघनमध्ये भूपृष्ठपार्श्वतः ।। ११४ ॥

तत्कोट्याधःस्थिते स्पर्शमोक्षौ दृश्यौ नभस्तले ।
तदप्रकोट्या रहितं लम्बनं शङ्कुरिष्यते ।
शङ्कुसिद्धैर्नतप्राणैस्तद्दृश्यादृश्यकल्पना ॥ ११५ ॥

इति ॥

[स्पर्शमोक्षयोर्दृश्यादृश्यत्वनिर्णयवासना]

[श्लोकाः २९-३६]—

ग्राह्यग्राहकयोश्चन्द्रतमसोरर्कचन्द्रयोः ।
बिम्बयोरन्तरं सम्पर्कार्धं स्यात् स्पर्शमोक्षयोः ॥ ११६ ॥

मूलम्—1. A. स्फुटं क्षेपः ; C. स्फुटक्षेपः
2. A. तं दृक्क्षेप ; C. तद्दृक्क्षेपाद्　　3. C. भागस्या (wr.)

व्याख्या—1. A. B. सम्भवात्

अधिकस्य गुणात् प्राग्वत् लब्धं शोध्यं तु लम्बनात् ।
शेषस्तस्य तमःशङ्कुस्त्रिज्याकृत्या [1]हतः स च ॥ ३३ ॥

हृतो[2] घातेन सूर्यस्य द्युज्याया लम्बकस्य च ।
लब्धाः प्राणाः क्षपाशेषे यदि रव्युदयात् ततः[3] ॥ ३४ ॥

बिम्बयोर्नेमिमात्रेण संस्पर्शः स्यात् तयोर्यतः ।
बिम्बयोर्घनमध्ये तद्व्यासार्धान्तरिते द्वयोः ॥ ११७ ॥

सम्पर्कार्धं ततो बिम्बान्तरं स्यात् स्पर्शमोक्षयोः ।
क्रान्तिवृत्तगतावर्कात् क्षिप्तः स्वक्षेपतो विधुः ॥ ११८ ॥

सम्पर्कार्धगते[1] वृत्ते क्षेपो तत्स्पर्शमोक्षयोः ।
कल्प्यते तद्वशाद् यत्र घनमध्यान्तरं द्वयोः ॥ ११९ ॥

सम्पर्कार्धकृते वृत्ते क्षेपो तत्स्पर्शमोक्षयोः ।
त्रिज्याहताच्च सम्पर्कार्धाप्तस्तद्वृत्तगः स च ॥ १२० ॥

दृक्क्षेपस्त्विष्टकालोत्थस्त्रिज्यावृत्तगतः स्वतः ।
तुल्यातुल्यदिशोर्योगा[2]न्तरोत्थं वलनं तयोः ॥ १२१ ॥

तदेव वलनं तत्र तमोबिम्बे प्रकल्पयेत् ।
तत्रैव चन्द्रबिम्बस्य सम्भवात् स्पर्शमोक्षयोः ॥ १२२ ॥

क्षेपदृक्क्षेपयोर्भिन्नतुल्ययोर्भेदयोगतः ।
तमोबिम्बे परिणतं वलनं स्पर्शमोक्षयोः ॥ १२३ ॥

तत्कोटिस्ततमोव्यासवलवर्गान्तरात् पदम् ।
त्रिज्या वा क्षेपदृक्क्षेपयोगभेदशरोनिता ॥ १२४ ॥

बिम्बव्यासार्धनिहता तमसस्त्रिज्यया हृता ।
क्षेपदृक्क्षेपचापैक्यस्यौजयुग्मपदक्रमात् ॥ १२५ ॥

मूलम्—1. A. B. हृतः (wr.) 2. A. हृतो (wr.)
3. B. Hapl. om. of ततः to ततः next line.

व्याख्या—1. A. सम्पकार्धकृते 2. C. दिशा योग

स्पर्शः प्रागेव, तत्रैव दृश्यः स्यान्न ततः परम्[1] ।
एवं रव्यस्तकालोत्थक्षेपाद्याप्तेन शङ्कुना ॥ ३५ ॥
सिद्धैः प्राणैर्यदा मोक्षो रव्यस्तमयतः परम् ।
तदैव दृश्यतामेति ततः प्राङ्मोक्षणेन च ॥ ३६ ॥

इन्द्वोर्लम्बनलिप्तासु क्षिपेदथ विशोधयेत् ।
द्वितीयस्फुटभोगस्य प्रायः पञ्चदशांशकः ॥ १२६ ॥

उदयास्तमयासन्ने चन्द्रलम्बनलिप्तिकाः ।
त्रिनपञ्चदशांशोऽपि यत्र लम्बननाडिकाः ॥ १२७ ॥

तदेतद् ग्रहणेऽर्कस्य पश्चात् स्पष्टीकरिष्यते[1] ।
तासां लम्बनलिप्तानां शङ्कुत्वे परिकल्पिते ॥ १२८ ॥

पूर्ववद् गतगन्तव्याः प्राणाः कार्याश्च तद्यथा ।
त्रिज्यावर्गहृताच्छङ्कोर्[2]द्युज्यालम्बवधोद्धृताः ॥ १२९ ॥

चापिता गतगम्यास्ते पूर्वापरकपालयोः ।
मोक्षे स्पर्शे च तत्तुल्यैः प्राणैर्यद्वा ततोऽधिकैः ॥ १३० ॥

गतगम्यैर्निशायां तद्दृश्यत्वं नान्यथा द्वयोः ।
भूपृष्ठपार्श्वादूर्ध्वस्थौ स्पर्शमोक्षौ यदा विधोः । १३१ ॥

तदैव दृश्यौ नान्यत्र भूपृष्ठव्यवधानतः ।
भूपृष्ठपार्श्वं भूमध्यपार्श्वादूर्ध्वगतं सदा ॥ १३२ ॥

निजलम्बनलिप्ताभिर्भिन्नाभिः स्वस्वकक्ष्यया[3] ।
तदन्तरस्थितं सर्वं दृश्यार्धेऽपि न दृश्यते ॥ १३३ ॥

यद्भूपृष्ठव्यवहितं यात्यदृश्यार्धशेषताम् ।
भगोलमध्यान्मन्दान्त्यफलान्ते कृतकेन्द्रकम् ॥ १३४ ॥

मूलम्—1. B. Hapl. om. after परं to परं, next line.

व्याख्या—1. The allusion is to ch. V. सूर्यग्रहणप्रकरणम् ।

2. A. त्रिज्यावर्गोद्धृतशङ्कोः   3. A. C. भिन्नाभिन्नस्वकक्ष्यया

भ्राम्यतः प्राङ्मुखं पुष्पवन्तौ वृत्ते निजेऽन्वहम् ।
भुक्तिः प्रतिदिनं तुल्या निजवृत्तगतानयोः ॥ १३५ ॥

भगोलप्रमिता भुक्तिर्भिन्ना प्रागेव दर्शिता ।
भगोलमध्यग्रहयोर्मन्दकर्णोऽन्तरं भवेत् ॥ १३६ ॥

स्ववृत्तप्रमितश्चासौ त्रिज्यातुल्या भवेदसौ ।
ग्रहवृत्तमितस्त्रिज्यातोऽधिकोनो भवेदपि ॥ १३७ ॥

बिम्बभुक्त्योः कर्णवृत्तकलाभिरनुमेयता ।
स्फुटयोजनकर्णाप्ते [1]यतस्त्रिज्याहते स्फुटे ॥ १३८ ॥

स्यादेतद् यदि कल्प्येते भगोले चेदुभे अपि ।
ततो न्यूनाधिके स्यातां भगोलविषये उभे ॥ १३९ ॥

भगोलमध्यं भूगोलाद् यातीन्दूच्चादुपर्यधः ।
मन्दकर्णस्य तेनापि स्यातां वृद्धिक्षयौ ततः ॥ १४० ॥

द्वितीयस्फुटकर्मापि ततो दृग्विषये भवेत् ।
उपर्यधश्च भूगोलाद् भगोलेऽस्मिश्चलत्यपि ॥ १४१ ॥

वायुगोलस्य भूगोलं परितः स्थितिरिष्यते ।
भूगोलस्यानुहरते वायुगोलः सदाप्यधः[2] ॥ १४२ ॥

अन्यथा वायुगोलोऽयं भूगोलं भ्रामयेदपि ।
यतो रथ्यादिवत् सोऽपि कुर्यादेवोदयादिकम् ॥ १४३ ॥

येनैकस्मिन् दिनेऽर्कस्य दृश्यादृश्यार्धयोः स्थितिः ।
भगोलेनोपपद्येत युगपत्परिकल्पनात् ॥ १४४ ॥

वायुगोलस्य मध्यस्थो भूगोलः कल्प्यते ततः ।
भगोलस्त्वर्कतमसोः सूत्रेणोपर्यधो व्रजेत् ॥ १४५ ॥

इन्दूच्चदिशि भूगोलाद् यत्र भ्राम्यन्त्यमी ग्रहाः ।
भूगोलमध्यकेन्द्रत्वे वायुगोलस्य निश्चिते ॥ १४६ ॥

व्याख्या—1. C. यत्र त्रिज्या 2. B. सदा-gap-धः

इन्दूच्चोनार्ककोटिज्याबलतुल्यैश्च योजनैः ।
भगोलमध्यं भूगोलमध्यात् गच्छत्युपर्यधः ॥ १४७ ॥

भ्राम्यते वायुगोलेन तदाक्रान्ततया मुहुः ।
ततस्तदाश्रितानां च द्युवृत्तानि द्युचारिणाम् ॥ १४८ ॥

वायुगोलानुसारेण कुर्वतामुदयादिकम् ।
विप्रकर्षवशाद् भूमेर्विविधानि स्युरन्वहम् ॥ १४९ ॥

द्वितीयस्फुटकर्णस्य यद् व्यासार्धत्वमिष्यते ।
व्यासार्धं सर्ववृत्तानां त्रिज्या स्यात्[1] स्वकलामिता ॥ १५० ॥

तयोः सम्बन्धनियमात् त्रिज्यायोजनकर्णयोः ।
लिप्तास्त्रैराशिकात् साध्या बिम्बादेर्योजनात्मता[2] ॥ १५१ ॥

तद्वद् दृग्विषये साध्या भुक्तिलिप्ताः स्वयोजनैः ।
भुक्तिरम्बरकक्ष्यातो भूदिनैर्योजनात्मिका ॥ १५२ ॥

भगोलस्यानुहरते विक्षेपः[3] पठितो बुधैः ।
कर्णवृत्तमितत्वेन तद्वद् वृद्धिक्षयान्वितः ॥ १५३ ॥

त्रिज्या भगोलव्यासार्धं सर्वदा स्वकलामितम् ।
क्षेपस्तत्प्रमित[4]स्तद्वत् सर्वदा स्वकलासमः ॥ १५४ ॥

अन्त्यक्षेपहृता दोर्ज्या त्रिज्ययैव विभज्यते ।
न पुनर्मन्दकर्णेन पातोनस्फुटचन्द्रतः ॥ १५५ ॥

प्रतिमण्डललिप्ताभिर्मन्दकर्णः प्रमीयते ।
क्षेपो भगोलप्रमितस्त्रिज्याव्यासदलो हि सः ॥ १५६ ॥

भगोलविषयस्त्वेवं विक्षेपः परिकल्प्यते ।
स्फुटयोजनकर्णघ्नात् क्षेपात् तस्मात् समुद्धृतः ॥ १५७ ॥

द्वितीयस्फुटकर्णेन क्षेपो ग्राह्यो विधोर्ग्रहे ।
भगोलविषयादेव चन्द्रात् पातो विशोध्यताम् ॥ १५८ ॥

व्याख्या—1. A. has an extra सा here. 2. A. B. C. योजनात्मना
3. A. B. विक्षेपैः 4. A. प्रमितं

क्षेपस्यैव विभिन्नत्वाद् भगोलेन[1] विधोरपि ।
भगोलस्थं हि सर्वत्र पातेन्द्वन्तरमिष्यते ।। १५९ ।।

स्फुटेन्दोः केवलादेव ततः पातविशोधनम् ।
अत एवोक्तममुना स्वयं प्रकरणान्तरे ।। १६० ।।

"द्वितीयस्फुटतः पूर्वं विक्षेपो नीयतां विधोः ।
अपक्रमं पुनः कुर्याद् द्वितीयस्फुटितेन्दुतः" ।। १६१ ।।

इति स्फुटेन्दुतस्तस्मात् केवलात् पातशोधनम् ।
न तु स्फुटीकृताविष्टं द्वितीयस्फुटकर्णता ।। १६२ ।।

स्फुटयोजनकर्णघ्ना भगोलविषया गतिः ।
द्वितीयस्फुटकर्णेन हृता दृग्विषये गतिः ।। १६३ ।।

मण्डलार्धान्तरितयोर्मिथोऽपक्रममण्डले ।
भ्राम्यतोरर्कतमसोः पार्श्वेनेन्दुः परिभ्रमन् ।। १६४ ।।

इष्टक्षेपान्तरे क्रान्तिवृत्तात् तत्कोटिमण्डले ।
पक्षमासान्तयोस्ताभ्यां युञ्जानोऽपि मुहुर्मुहुः ।। १६५ ।।

क्षेपाल्पत्वाद् यदा पातासत्त्या बिम्बं तयोर्विशेत् ।
रवेर्बिम्बप्रवेशेन ग्रहणं तस्य जायते ।। १६६ ।।

छन्नत्वाद् रविबिम्बस्य तत्रेन्दोस्तमसि स्थितेः ।
पश्चाद्गतं शीघ्रगतिः पुरोगं मन्दगामिनम् ।। १६७ ।।

आक्रामत्येकमार्गस्थः पृष्ठस्थं भिन्नमार्गगः ।
युगपत् प्राङ्मुखौ प्रत्यङ्मुखावप्येकदिङ्मुखौ ।। १६८ ।।

प्रत्यङ्मुखं च भ्रमणं ग्रहाणां वक्रगामिनाम् ।
भ्रमणं प्राङ्मुखं नित्यमुभयोरर्कचन्द्रयोः ।। १६९ ।।

ताराग्रहाणां चान्येषां सर्वदा क्रमचारिणाम् ।
द्वयोर्गत्यन्तराद् यत्र योगकालो निरूप्यते ।। १७० ।।

व्याख्या—1. C. भूगोलेन

गत्या शीघ्रगतस्तत्र मन्दं गच्छति रिक्तया[1] ।
आसत्त्या ग्रहयोर्भाव्यं भेदाभावस्ततोऽन्यथा ॥ १७१ ॥

आसत्तिर्गतियोगेन भिन्नदिङ्मुखयोर्द्वयोः ।
यत्रासन्नौ क्रमात् स्यातां गतियोगेन तावुभौ ॥ १७२ ॥

अतोऽत्र गत्योर्योगेन योगकालो निरूप्यते ।
एकदिङ्मुखता यस्मादुभयोरर्कचन्द्रयोः ॥ १७३ ॥

ततो गत्यन्तरेणैव पर्वान्तो नीयते तयोः ।
शीघ्रभुक्तिर्यदा मन्दभुक्तेर्याति पुरस्सरा[2] ॥ १७४ ॥

विप्रकर्षात् क्रमाद्योगस्तयोर्नोपरि विद्यते ।
अत एव तयोर्योगस्तत्रातीतः प्रकल्पितः ॥ १७५ ॥

मन्दभुक्तिर्यदा शीघ्रभुक्तेर्याति पुरस्सरा[3] ।
सन्निकर्षक्रमात् तत्र भावी योगस्तयोर्मतः ॥ १७६ ॥

योगे भाविनि पर्वान्तकालः प्रतिपदोऽन्यथा ।
तत्कालानीतभागेन स्यातां तौ समलिप्तकौ[4] ॥ १७७ ॥

एकमार्गस्थयोस्तत्र तयोर्योगो भवेद् ध्रुवम् ।
क्षेपे सति तु तत्कोटिमार्गेणेन्दुः परिभ्रमन् ॥ १७८ ॥

ग्राह्यग्राहकयोः क्षेपे बिम्बयोगार्धतोऽल्पके ।
ग्राह्यग्राहकयोरर्कतमसोर्बिम्बमाविशन् ॥ १७९ ॥

विक्षेपकोटिवृत्तस्थग्भागान्मुक्तस्ततोऽपि सन् ।
सम्पर्कार्धेऽपि विक्षेपकोटया कुर्यात् स्थितेर्दलम् ॥ १८० ॥

अतोऽत्र क्षेपवर्गोनसम्पर्कार्धकृतेः पदात् ।
षष्टिघ्नादर्कशीतांशोर्गत्यन्तरकलोद्धृतम् ॥ १८१ ॥

स्थित्यर्धं नाडिकाद्यं तदुभयोः स्पर्शमोक्षयोः ।
स्वेष्टविक्षेपजनितं भिन्नत्वं स्यात् तयोर्मिथः ॥ १८२ ॥

व्याख्या—1. C. गम्यनिरिक्तया 2. A. C. परस्परम् ; B. पुरस्सरः
3. B. C. पुरस्सरः 4. A. B. लिप्तिकौ

[स्पर्शमोक्षेष्टग्रासाः मध्यग्रहणं च]

यद्वा तत्कालसूर्येन्दुस्फुटपातादिकं नयेत् ।
तत्रेन्दुधरणिच्छायास्फुटान्तरकला हृताः ॥ ३७ ॥

स्थित्यर्धात् स्वात् भवेत् क्षेपः स्थित्यर्धं क्षेपतः स्वतः ।
अन्योन्यायत्तसिद्धित्वात् स्थित्यर्धक्षेपयोर्द्वयोः ॥ १८३ ॥

स्थित्यर्धयोर्विभिन्नत्वात् क्षेपात् स्यात् स्पर्शमोक्षयोः ।
स्थित्यर्धहीनसंयुक्तः पर्वान्तस्पर्शमोक्षयोः ॥ १८४ ॥

तत्कालेन्दुं च तत्क्षेपं तत्रत्यं किं न भेदयेत् ।
अत एवाविशेषोऽत्र कार्यः स्थित्यर्धयोर्द्वयोः ॥ १८५ ॥

स्थित्यर्धेनाविशिष्टेन पर्वान्तो हि न संयुतः ।
पृथगेको द्वयोः कालं विदध्यात् स्पर्शमोक्षयोः ॥ १८६ ॥

मध्यकालोऽपि तन्मध्याच्चलेत् स्थितिदलेऽधिके ।
तदीयं चलनं चात्र सम्यग् युक्त्या निदर्शितम् ॥ १८७ ॥

यद्वेति (37-43)—

[इष्टग्रासानयनवासना]

ग्राह्यग्राहकयोः क्षेपे बिम्बयोगार्धतोऽल्पके ।
उक्तो ग्रहणसद्भावस्तदभावस्ततोऽधिके । १८८ ॥

मध्यग्रहणतः स्पर्शमोक्षौ स्थित्यर्धतो निजात् ।
बिम्बान्तरेण सूक्ष्मेण तत्परिच्छिद्यतेऽखिलम् ॥ १८९ ॥

ततो बिम्बान्तरं नेयमिष्टकालोद्भवं स्फुटम् ।
सम्पर्कार्धाद् विशुद्धेऽस्मिन्निष्टग्रासो भवेद् यतः ॥ १९० ॥

ग्राह्यो क्रमोत्क्रमज्ये द्वे ग्राह्यग्राहकभेदतः ।
क्रमज्यावर्गतः क्षेपवर्गयुक्तात् तयोरथ ॥ १९१ ॥

उत्क्रमज्यान्तरकृतिं युक्त्वा मूलीकृतं तु यत् ।
बिम्बान्तरं सुसूक्ष्मं स्याद् ग्राह्यग्राहकयोर्द्वयोः ॥ १९२ ॥

द्वितीयगतिभेदेन पूर्वमुक्त्यन्तरोद्धृता ।
स्फुटान्तरमिह ग्राह्यं तस्य विप्तेश्च वर्गयोः ॥ ३८ ॥

योगे तच्छरभेदस्य वर्गं युक्त्वा पदीकृते ।
बिम्बान्तरं सुसूक्ष्मं स्यादिष्टग्रासे तथैव च ॥ ३९ ॥

स्फुटान्तरस्य वर्गात् तु कृत्स्नव्यासहृतः[1] शरः ।
क्षेपस्याप्येवमेव स्यात् स्वेषुवर्गयुतान्मुहुः ॥ ४० ॥

---

[1]सूक्ष्मं बिम्बान्तरं कर्तुं गृह्येते ज्याशरौ यतः ।
द्वितीयगतिभेदघ्नं पूर्वगत्यन्तरोद्धृतम् ॥ १९३ ॥

तत्र स्फुटान्तरं ग्राह्यं चन्द्रभूच्छाययोर्द्वयोः ।
सूक्ष्मं बिम्बान्तरं कर्तुं गृह्येते ज्याशरौ यतः ॥ १९४ ॥

नन्वत्रानीयते बाणः कथङ्कारं स्फुटान्तरात् ।
समस्तज्याकृतेर्बाणः कृत्स्नव्यासोद्धृतो यतः ॥ १९५ ॥

सत्यं किन्त्विह कृत्स्नज्या प्रायः स्वधनुषा समा ।
ग्राह्यग्राहकयोर्भेदलिप्तानां स्वल्पतावशात् ॥ १९६ ॥

पातोनेन्दोर्भवेत् क्षेपस्तदर्धज्यात्मको मतः ।
ततस्तद्वर्गतः कृत्स्नव्यासाप्तो दुष्करः शरः ॥ १९७ ॥

कृत्स्नज्यावर्गतस्तु स्यादर्धज्यावर्गतस्तु चेत् ।
कृत्स्नज्यातो भवेद् बाणः कृत्स्नज्या सा च बाणतः ॥ १९८ ॥

इत्यन्योन्याश्रयत्वेन स्फुटो बाणोऽविशेषतः ।
अर्धज्यावर्गतो लब्धबाणवर्गयुतान्मुहुः ॥ १९९ ॥

समस्तज्यात्वमानीतात् कृत्स्नव्यासोद्धृतः शरः ।
त्र्यंशो बाणकृतेर्यद्वा कृत्स्नज्याचापवर्गयोः ॥ २०० ॥

मूलम्— 1. A. व्यासोद्धृतः

व्याख्या—1. C. om. this line.

इष्टवर्गत्रिभागोनचापवर्गात् तथापि वा ।
सम्पर्कार्धाद् विशुद्धेऽस्मिन् ग्रासो बिम्बान्तरे सदा ॥ ४१ ॥

[ग्रहणस्य अदृश्यत्वावस्थितिः]

स्वच्छत्वात् षोडशांशोऽपि ग्रस्तश्चन्द्रो न दृश्यते ।
लिप्तात्रयमपि ग्रस्तं तीक्ष्णत्वान्न विवस्वतः ॥ ४२ ॥

अन्तरं स्यात् ततो [1]बाणवर्गत्र्यंशविवर्जितात् ।
चापवर्गात् स्वकृत्स्नज्यावर्गतुल्यात् तदुत्क्रमः ॥ २०१ ॥

कृत्स्नज्यासोद्धृतो बाणः समस्तज्याकृतेर्युतः[2] ।
किन्तु बाणः स कृत्स्नज्यायत्तः सापि स्वबाणतः ॥ २०२ ॥

इत्यन्योन्याश्रयत्वं तद् अविशेषान्निरस्यते ।
तदर्थं प्रथमं चापवर्गाद् बाणं समानयेत् ॥ २०३ ॥

तत्कृतेस्त्र्यंशहीनाच्च कृत्स्नज्यां चापवर्गतः ।
अर्धज्यावर्गतः कर्णकोटीयोगहृतः शरः ॥ २०४ ॥

इत्यर्धज्याकृतेर्बाणं कृत्स्नज्यां वा ततो नयेत् ।
स्फुटान्तरक्रमज्या वा विक्षेपस्य च वर्गयोः ॥ २०५ ॥

योगे तच्छरयोर्भेदवर्गं युक्त्वा पदीकृतम्[3] ।
बिम्बान्तरं सुसूक्ष्मं स्याद् इष्टग्रासेऽर्कचन्द्रयोः॥ २०६ ॥

तदूनाद् बिम्बयोगार्धादिष्टग्रासोऽवशिष्यते ।
तादृग्बिम्बान्तरे बिम्बयोगार्धेन समे सति ॥ २०७ ॥

स्पर्शमोक्षौ स्फुटौ बिम्बनेम्योः संस्पर्शमात्रतः ।
बिम्बान्तरे स्वल्पतमे परमग्राससम्भवः ॥ २०८ ॥

[परमग्रासस्य स्फुटपर्वान्ताच्चलनं ग्रहणादेश्यानादेश्यता च]

[श्लोकौ 42-43]—

स्थित्यर्धयोर्द्वयोः सोऽयमधिको दृश्यते क्वचित् ।
प्रसिद्धात् स्फुटपर्वान्ताच्चलनं सम्भवेद् यतः ॥ २०९ ॥

व्याख्या—1. C. Hapl. om. after बाण to बाण, two lines below.

2. A.B. कृते युतः ; C. कृते सति 3. C. पदीकृते

[परमग्रासस्य स्फुटपर्वान्ततश्चलनम्]

अल्पश्चेत् परमग्रासश्चलेत् स्थितिदलेऽधिके ।
तस्माद् बिम्बान्तरेणैव ग्रासोऽन्वेष्यो महानिह ॥ ४३ ॥

[अक्षवलनं अयनवलनं च]

नतज्याक्षज्ययोर्घातस्त्रिज्याप्तस्तस्य[1] कार्मुकम् ।
तदंशाः सौम्ययाम्यास्ते पूर्वापरकपालयोः ॥ ४४ ॥

ग्रहणं वाच्यमादेश्यानादेश्याविविभागतः ।
अन्यथा निर्विशन् लोके हास्य एव भवेद् ध्रुवम् ॥ २१० ॥

[वलनस्वरूपम्]

नतज्याक्षज्ययोरिति (44-46a)—

भ्राम्यन्ति क्रान्तिवृत्तेन स्वगत्या प्राङ्मुखं ग्रहाः ।
प्रत्यङ्मुखं च प्रवहाक्षिप्ता यान्ति ध्रुवृत्ततः ॥ २११ ॥

निरक्षसमपूर्वापराधऊर्ध्वदिगाश्रितम् ।
घटिकामण्डलं तत्तु ध्रुवृत्तं विषुवद्द्वये ॥ २१२ ॥

विषुवद्द्वितयस्पृष्टं तन्मध्ये तस्य पार्श्वयोः ।
अन्त्यक्रान्त्यन्तरे चान्यत् तत्तुल्यं क्रान्तिमण्डलम् । २१३ ॥

घटिकामण्डलः स्पष्टस्तत्र स्याद् विषुवद्द्वयम् ।
विप्रकृष्टं परक्रान्त्या द्वयोरप्ययनान्तयोः ॥ २१४ ॥

पार्श्वद्वयावगाहित्वात् तत्स्फुटत्वाच्च तत्समम् ।
क्रान्तिवृत्तं तु तद्यत्र भ्राम्यन्ति प्राङ्मुखं ग्रहाः ॥ २१५ ॥

यद्यपि क्रान्तिवृत्तेन भ्राम्यन्ति प्राङ्मुखंगताः ।
तथापि प्रवहाक्षिप्ता यान्ति प्रत्यङ्मुखाः सदा ॥ २१६ ॥

मूलम्—1. C. घातत्रिज्याप्तं तस्य

राशित्रययुताद् ग्राह्यात् क्रान्त्यंशैर्दिक्समैर्युतात् ।
भेदेऽन्तराद् गुणस्तेन हृत्वा बिम्बान्तरं हरेत् ॥ ४५ ॥

त्रिज्यया वलनं स्पष्टं वृत्ते बिम्बान्तरोद्भवे ॥ ४६[a] ॥

प्रत्यग्भ्रमानुसारेण भवेत् तेषां द्युमण्डलम् ।
प्रत्यहं भिन्नरूपं तद् घटिकावृत्तपार्श्वगम् ॥ २१७ ॥

समपूर्वापरविशोर्मिरक्षे क्षितिजाश्रितम् ।
घटिकामण्डलं याम्ये खमध्याद् वलतेऽक्षतः ॥ २१८ ॥

तत्पार्श्वस्थद्युवृत्तानि तद्वत् साक्षे बहून्यपि ।
तद्गतानां ग्रहर्क्षाणां प्रतीचां प्रवहभ्रमात् ॥ २१९ ॥

बिम्बपूर्वापरार्धे द्वे वलिते सौम्ययाम्ययोः ।
प्राक्कपाले, ततः प्रत्यक्कपाले तु विपर्ययात् ॥ २२० ॥

[अक्षवलनम्]

तथात्वाद् वृत्तपादस्य पूर्वापरकपालयोः ।
तदक्षायत्तसिद्धित्वादाक्षं वलनमुच्यते ॥ २२१ ॥

खमध्यतो नतांशज्या त्रिज्यातुल्या यदा भवेत् ।
तदा स्वाक्षज्यया तुल्यमाक्षं वलनमिष्यते ॥ २२२ ॥

नतज्यया ग्राह्यबिम्बघनमध्यावधेस्ततः ।
आक्षं वलनमुद्दिष्टं सम्बन्धनियमात् ततः ॥ २२३ ॥

[अयनवलनम्]

अयनान्तोत्थिता दोर्ज्या त्रिज्यातुल्या यदा भवेत् ।
तदान्त्यक्रान्तितुल्यं तदायनं वलनं भवेत् ॥ २२४ ॥

गच्छतां क्रान्तिवृत्तेन तद्वद् वलनसम्भवात् ।
अयनान्ताद् ग्राह्यबिम्बघनमध्यावधेस्ततः ॥ २२५ ॥

दोर्ज्यायाः परमक्रान्तिहतायास्त्रिज्ययोद्धृतम् ।
आयनं वलनं ज्ञेयमयनाद् वलितत्वतः ॥ २२६ ॥

[ग्रहणपरिलेखनम्]

बिम्बान्तरसमेनादौ लिखेत् सूत्रेण मण्डलम् ॥ ४६^{b} ॥

बिम्बान्तरं तु सम्पर्कदलं स्यात् स्पर्शमोक्षयोः ।
शलाकाङ्कितमध्या या[1] वलनद्विगुणायता ॥ ४७ ॥

[स्फुटवलनानयनवासना]

वलनद्वितयं चैतत् भिन्नतुल्यविशोः क्रमात् ।
विश्लिष्टमथ युक्तं च स्फुटं वलनमिष्यते ॥ २२७ ॥

बिम्बान्तरव्यासदले वृत्ते तत् कल्पयेत् ततः ।
बिम्बान्तरेण गुणनात् त्रिज्यया हरणादपि ॥ २२८ ॥

भाबाह्वन्तरितं वृत्तं समन्ताद् सममण्डलात् ।
द्युवृत्तवद् ग्राह्यबिम्बघनमध्यस्थनेमिकम् ॥ २२९ ॥

क्रान्तिद्युवृत्ते तद्बिम्बघनमध्यस्थनेमिके ।
भाबाह्वन्तरितं यत्तु तत्राद्यं सममण्डलात् ॥ २३० ॥

तद् द्युवृत्तान्तरं बिम्बनेम्यां वलनमक्षजम् ।
क्रान्तिद्युवृत्तयोर्बिम्बनेम्यां विवरमायनम् ॥ २३१ ॥

तद्विष्टक्षेपयोर्योगभेदतोऽन्तरिते ततः ।
ग्राह्यग्रहस्य परिधौ ग्राहकेण तु गृह्यते ।
वलनं ग्राह्यबिम्बोक्तं वृत्तेऽन्यत्रापि कल्प्यताम् ॥ २३२ ॥

[चन्द्रग्रहणपरिलेखनवासना]

बिम्बान्तरसमेनेति (46b-53)—

ग्राह्यग्राहकयोर्बिम्बान्तरव्यासार्धमण्डले ।
वलनद्वितयं[1] कल्प्यं स्पर्शमोक्षेष्टकालजम् ॥ २३३ ॥

मूलम्—1. C. मध्याया

व्याख्या—1. Mss. read वलनं द्वितीयं

प्राग्रेखागतमध्याङ्कनेमिस्पृष्टोभयाग्रया ।
वलनं नीयतां स्पष्टं यथादिशमथानया ॥ ४८ ॥

प्रत्यग्रेखास्थ[1]मध्याङ्कन्यस्तया व्यस्तमेव च ।
रेखां पूर्वापरां कुर्यात् तद्वशादपि चेतराम् ॥ ४९ ॥

छायामार्गोऽनयोः पूर्वो विक्षेपान्तरिता[2] विधोः ।
रेखाविक्षेपदिक्स्थातो मार्गौ तत्कालजौ तु तौ ॥ ५० ॥

बिम्बान्तरं बिम्बयोगदलं स्यात् स्पर्शमोक्षयोः ।
संस्पर्शे नेमिमात्रेण घनमध्यान्तरं द्वयोः ॥ २३४ ॥

ग्राह्यग्राहकयोर्बिम्बसम्पर्कार्धसमं भवेत् ।
व्यासार्धान्तरिता नेमिः स्वबिम्बघनमध्यतः ॥ २३५ ॥

उभयोरन्तरं तेन सम्पर्कार्धसमं कृतम् ।
निजान्यबिम्बव्यासार्धं स्वव्यासार्धाद् बहिर्यतः ॥ २३६ ॥

अतो बिम्बान्तरं बिम्बयोगार्धं स्पर्शमोक्षयोः ।
बिम्बान्तरव्यासदलमण्डलं प्रथमं लिखेत् ॥ २३७ ॥

तत्र पूर्वापरां रेखां कुर्याद् याम्योत्तरां तथा ।
ततश्चिह्नितमध्यं यद् वलनद्विगुणायतम् ॥ २३८ ॥

तत्पूर्वापररेखास्थमध्यं सूत्रं प्रसारयेत् ।
यथा तन्नेमिसंस्पृष्टं तदग्रद्वितयं भवेत् ॥ २३९ ॥

पौर्णमास्यां प्रतीच्यां तु प्रागेव प्रतिपद्यपि ।
सम्पर्कार्धकृते वृत्ते वलनं स्पर्शमोक्षयोः ॥ २४० ॥

नीत्वा यथादिशं तस्माद् रेखां पूर्वापरां लिखेत् ।
व्यस्तदिक्स्थान्यवलनस्पृष्टाग्रां मध्यभेदिनीम् ॥ २४१ ॥

मूलम्—1. C. प्रत्यग्रेखास्त 2. A. विक्षेपान्तरितं

लिप्ताव्यासदलेनेन्दोः स्वमार्गे परिधौ लिखेत् ।
पौर्णमास्यां प्रतीच्यां तु प्रागेव प्रतिपद्यपि ॥ ५१ ॥

वृत्तमध्ये तमोबिम्बं स्वमार्गे सर्वदा लिखेत् ।
तमोबिम्बाद् बहिर्भूतं दृश्यमिन्दौ न तद्गतम् ।
हनुपार्श्वादिभेदादि दृश्यतामत्र सुस्फुटम् ॥ ५२ ॥

[॥ इति तन्त्रसंग्रहे चन्द्रग्रहणप्रकरणं नाम
चतुर्थोऽध्यायः ॥]

ततः समतिरश्चीनां रेखां याम्योत्तरां लिखेत् ।
छायामार्गोऽनयोः पूर्वा विक्षेपान्तरिता विधोः ॥ २४२ ॥

रेखाविक्षेपविक्स्थातो मार्गौ तत्कालजौ तु तौ ।
लिप्ताव्यासदलेनेन्दोः स्वमार्गे परिधौ लिखेत् ॥ २४३ ॥

पौर्णमास्यां प्रतीच्यां तु प्रागेव प्रतिपद्यपि ।
वृत्तमध्ये तमोबिम्बं स्वमार्गे सर्वदा लिखेत् ॥ २४४ ॥

स्पर्शमध्येष्टमोक्षादि दर्शयेत् तत्र सुस्फुटम् ।
तमोबिम्बाद्बहिर्भूतं दृश्यमिन्दौ न तद्गतम् ॥ २४५ ॥

हनुभेदः[1] पार्श्वभेदस्तत्र भेदान्तराण्यपि ।
करामलकवत् सर्वं दर्शयेत विचक्षणः ॥ २४६ ॥

व्याख्या—1. A. हनुभेदाः

इत्येष परक्रोडावासद्विजवरसमीरितो योऽर्थः ।
स तु तन्त्रसंग्रहस्य प्रोक्तोऽध्याये चतुर्थेऽभूत्[1] ॥ २४७ ॥

[इति तन्त्रसंग्रहस्य पद्यव्याख्यायां युक्तिदीपिकायां
चन्द्रग्रहणप्रकरणं नाम
चतुर्थोऽध्यायः[2] ॥]

व्याख्या—1. C. चतुर्थोऽभूत् । Mss. A. B. C. end with ch. IV.

2. A. तन्त्रसंग्रहः समाप्तः । शुभमस्तु । B. C. इति तन्त्रसंग्रहव्याख्याने चतुर्थोऽध्यायः ।

अथ पञ्चमोऽध्यायः*

रविग्रहणप्रकरणम्

[ग्रहणसम्भवः]

ग्रहे दृश्यार्धमध्यस्थे न किञ्चदपि लम्बनम् ।
तस्माद् दृक्क्षेपलग्नात्[1] स्यात् प्राक् पश्चाद्वा स्थिते ग्रहे ॥१॥

समोर्ध्वगापवृत्तस्थे नतेरपि न सम्भवः ।
तत्क्षेपकोटिवृत्ते क्वाप्यूर्ध्वसूत्रस्पृशि स्थिते ॥ २ ॥

सममण्डलमध्यात्तद्विप्रकर्षे नतिर्भवेत् ॥ ३a ॥

तन्त्रसंग्रहव्याख्या लघुविवृतिः*

[ग्रहणसम्भवः]

अथ सूर्यग्रहणे लम्बनावनतिभ्यां विशेषं प्रदर्शयिष्यन् प्रथमं तावत् तयोः सम्भवभूमिं दर्शयति— [ग्रहे दृश्यार्ध इति ।]

इह खलु सर्वदा प्रवहेण प्रत्यङ्मुखं भ्राम्यमाणस्यापक्रमवृत्तस्य क्षितिजादूर्ध्वगतः खण्डो दृश्यार्धं, [1]अन्यददृश्यार्धम् । तत्र[2] दृश्यार्धस्य स्वसमतिरश्चीनेन खमध्यस्पृष्टेन दृक्क्षेपवृत्तेन सह यत्र सम्पातः तत्र स्थितं तदानीं दृक्क्षेपलग्नम् । तत् पुनः तद्दृश्यार्धमध्यगतमेव । तस्मिन्[3] यदा ग्रहो वर्तते

---

* Text-cum-Com. Mss. used : **A.** Ms. with K. V. Sarma. **B.** V. V. R. I. Ms. No. 3810. **C**$_{1-10}$ Mss used in *TSS*, No. 188.

मूलम्— 1. C. लग्नं

व्याख्या—1. C. ततोन्यत् 2. C. तदा

3. C. ततस्तस्मिन्

[दृग्गतिः दृक्क्षेपज्या च]

राश्यष्टमांशलङ्कोत्थप्राणैश्चापि नतासुभिः ॥ ३b ॥

तदा तस्य **न किञ्चिदपि लम्बनं** भवति । ततो **दृक्क्षेपलग्नात् प्राग्**[1] **पश्चाद् वा स्थिते ग्रहे** सम्भवत्येव । अत एव भानुदृक्क्षेपलग्नयोरन्तरालतो लम्बनानयनमुपरिष्टाद् वक्ष्यते ।

तत्र[2] द्रष्टुः **समोपरिवर्तिनि अपक्रममण्डलप्रदेशे** यदा ग्रहो वर्तते[3] तदा **नतेरप्यसम्भवो** बोद्धव्यः । [4]तदिदं खमध्यावसिते विषुवद्वितये भवति । तत्रैव च तदानीं क्रान्तिवृत्तोदयास्तप्रदेशस्पृष्टस्य लग्नसममण्डलस्य मध्यमवतिष्ठते । यदुक्तम्—

> **क्रान्तिवृत्तोदयास्तस्पृक् खमध्यस्पृष्टनेमिकम् ।**
> **अधऊर्ध्वस्थितं वृत्तं स्याल्लग्नसममण्डलम् ॥**

इति ।

ततः क्रान्तिमण्डलात् समन्ततो दृक्क्षेपज्यान्तरितं यत् तत् **कोटिमण्डलम्** । तत् कुत्रचिदधऊर्ध्वं वा खमध्यं स्पृशत्येव । ततस्तस्य **सममण्डलतो** यो **विप्रकर्षः** [5]दृक्क्षेपज्यारूपः तस्मिन् सति तदधीनसिद्धिका **नति**र्भवतीति ॥ १-३a ॥

व्याख्या— 1. C. प्राग्वा 2. C. तदा

3. C. adds here : यथा घटिकामण्डलात् स्वदेशाक्षज्यान्तरितस्य अपक्रमवृत्तभागस्य दक्षिणोत्तरमण्डलस्पृष्टत्वे

4. For तदिदं to विप्रकर्षः 9 lines below, C. reads : कदा पुनः सा नतिः सम्भवतीति चेत्, तस्यापक्रमवृत्तभागस्य खमध्यतो दक्षिणेनोत्तरेण वा यो क्षेपः, तस्य च यत् कोटिवृत्तं दक्षिणेन विक्षिप्तेऽपक्रमवृत्तभागे सति उत्तरं, अन्यथा दक्षिणं, तदवश्यं खमध्यस्पृष्टमेव परिकल्पितव्यम् । क्रान्तिवृत्तोदयास्तलग्नेश(लग्नप्रदेश ?)स्पृष्टं लग्नसममण्डलमपि खमध्यस्पृष्टमेव सर्वदा भवति । अतस्तस्य लग्नसममण्डलस्य खमध्यस्पृष्टभागतो वा क्षेपकोटिवृत्तलग्नसममण्डलयोरूर्ध्वसूत्रस्पृष्टप्रदेशाद्वा तस्यापक्रमवृत्तभागस्य यो विप्रकर्षो

5. C. adds : दृक्क्षेपमण्डलगतो

रवौ क्षयधने कृत्वा मध्यलग्नं स्फुटं नयेत् ।
तस्माद्विषुवदादेः स्वक्रान्तिकार्मुकमानयेत् ॥ ४ ॥

[दृग्गतिः दृक्क्षेपज्या च]

अथ तयोः[1] लम्बनावनत्योर्दृग्गतिदृक्[2]क्षेपज्याद्वयाधीनसिद्धि[3]त्वात् तदानयनायाह— [**राश्यष्टमांशेति ।**]

तत्र **राश्यष्टमांश**तुल्यचापभागस्य ये **लङ्कोदयप्राणाः** प्रागुक्तमार्गेण समानीताः, ये च तदानीं **नतासवो** दिनपूर्वापरार्धयोः दिनार्धप्राणेभ्यो द्युगतप्राणविशोधनेन द्युगतप्राणेभ्यो दिनार्धविशोधनेन[4] च सम्पादिताः, तैरुभयैरपि त्रैराशिकेन **क्षयधनात्मकं** फलद्वयमानीय विधिवद् **रवौ** कुर्यात् । **तन्मध्यलग्नं** भवति ।

तद्यथा—पूर्वाह्णे तावत् तात्कालिकस्य सायनार्कस्य वर्तमानचापखण्डे [5]नतभागान् कलीकृत्य तत्सम्बन्धिभिर्लङ्कोदयप्राणैर्निहत्य चापखण्डेन विभज्य लब्धान् [6]नतप्राणेभ्यो विशोध्य रवेर्गतचापभागं च विशोधयेत् । पुनरपि शिष्टेभ्यो नतप्राणेभ्यो यावतां चापखण्डानां लङ्कोदयप्राणाः ततः प्राक्तना उत्क्रमेण विशोधयितुं शक्याः तावतो विशोध्य चापखण्डानपि तावतः पूर्वागत[7]चापभागविशुद्धाद् रवेः शोधयेत्[8] । [9]पुनरवशिष्टेभ्योऽपि चापखण्डनिहतेभ्य[10]स्तल्लङ्कोदयप्राणैर्विभज्य लब्धाः कलाः तस्मादेव[11] रवेः शोधयेत् । तत्र शिष्टं **मध्यलग्नं** भवति । अपराह्णे पुनस्तात्कालिकस्य सायनार्कस्य गन्तव्यचापखण्डसम्बन्धिनो लङ्कोदयप्राणान् प्राग्वदानीय नतप्राणेभ्यो विशोध्य गन्तव्यचापखण्डं च रवौ प्रक्षिप्य पुनरवशिष्टेभ्यो[12] नतप्राणेभ्यो यावतां चापखण्डानां लङ्कोदयप्राणाः तदूर्ध्वगताः

व्याख्या—1. C. $_{1-6,\ 10}$. ये for तयोः

2. A. om. दृक् 3. C. om. सिद्धि

4. B. दिनार्धप्रविशोधनेन

5. B. om. नत; C. गत 6. C. (except. 9) गत

7. A. पूर्वगत

8. B. Hapl. om. शोधयेत् । [पुनरव to शोधयेत् ।], third line.

9. C. $_{1-6,\ 8\cdot 10}$ पुनरपि

10. C. $_{1-6,\ 10}$ चापखण्डनिर्गतेभ्यः 11. C. om. एव

12. B. C. $_{1-6,\ 8\cdot 13}$ पुनरपि शिष्टेभ्यो

तदक्षचापसंयोगो दिक् साम्येऽन्तरमन्यथा ।
मध्यज्याख्या हि तज्ज्या स्यात् प्राग्लग्नस्याग्रमौर्विका[1] ॥५॥

उदयज्या तयोर्घाता त्रिज्याप्ता[2] बाहुमौर्विका ।
मध्यज्यायास्त्रिजीवायाः कृतिभ्यां तत्कृतिं त्यजेत् ॥ ६ ॥

क्रमेण शोधयितुं शक्याः तावतो विशोध्य चापखण्डानपि तावतो रवौ प्रक्षिप्य शिष्टान् नतप्राणांश्चापखण्डेन निहत्य वर्तमानैर्लङ्कोदयप्राणैर्विभज्य लब्धाः कला अपि प्रक्षिपेत् । एवंकृतो रविर्मध्यलग्नं भवति ।

[1]तस्मान्मध्यलग्नादयनचलनसंस्कारेण उदग्विषुवदादितान्नीतात् क्रान्ति-चापमानीय[2] तस्य स्वदेशाक्षचापस्य च याम्योदग्गोलयोर्योगमन्तरं वा कृत्वा जीवामानयेत् । सा मध्यज्या इत्युच्यते । अथ तात्कालिकमुदयलग्नं च सूक्ष्म-मानयेत् । तत्त प्रागेवोक्तम्—

संस्कृतायनभानूत्थराशिगन्तव्यलिप्तिकाः ।
तद्राशिस्वोदयप्राणहता राशिकलाहृताः ॥

असवो राशिशेषस्य गतासुभ्यस्त्यजेच्च तान् ।
उत्तरोत्तरराशीनां प्राणाः शोध्याश्च शेषतः ॥

मूलम्— 1. B. स्याक्षमौर्विका 2. C. त्रिज्याप्तं

व्याख्या—1. C. adds : इत्येवं सायनार्कस्य ओजपदस्थत्वे सति मध्यलग्नानयनप्रकारः । तस्यैव युग्मपदस्थत्वे पुनः प्राक्कपाले वर्तमानचापखण्डे गतभागसम्बन्धिनो लङ्कोदयप्राणान् नतप्राणेभ्यो विशोध्य रवेर्गतचापभागं च विशोध्य पुनस्तदूर्ध्वोर्ध्वंगतान् लङ्कोदयप्राणान् नतप्राणेभ्यः क्रमेण विशोध्य चाप-खण्डानपि तावतो रवेर्विशोध्य अवशिष्टप्राणसम्बन्धिनश्चापभागानपि विशोध्य मध्यलग्नमानेतव्यम् । अत्रैव अपराह्णे पुनः प्राग्वत् वर्तमान-चापखण्डस्यैष्यभागे पूरणं ततो व्युत्क्रमेण लङ्कोदयप्राणविशोधनं तं तच्चापखण्डप्रक्षेपणं अवशिष्टप्राणसम्बन्धिनश्चापभागप्रक्षेपणं च रवौ कुर्यात् । एवंकृतो युग्मपदस्थो रविर्मध्यलग्नं भवति । यदा पुनर्नतप्राणेभ्यो लङ्कोदयप्राणविशोधने तेषां मध्ये पदसमाप्तिर्भवति तदा तदवशिष्टेभ्यो विशोधने पदान्तरोक्तन्यायमनुसन्धेय इति ।

2, C. 1-6, 8, 10 क्रान्तिश्च मूलमानीय

तन्मूलयोस्त्रिजीवाघ्नामाद्यमन्येन संहरेत् ।
लभ्यते तत्र दृक्क्षेपस्तत्कोटिर्दृग्गतिर्मता ॥ ७ ॥

[लम्बननाडिकाः तत्संस्कारश्च]

एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया ।
छेदाप्तान्तरबाहुज्या भानुदृक्क्षेपलग्नयोः ॥ ८ ॥

पूरयित्वा रवे राशिं क्षिपेद्राशींश्च तावतः ।
विशुद्धा यावतां प्राणाः शेषात् त्रिंशद्गुणात् पुनः ॥

तदूर्ध्वराशिमानाप्तान् भागान् क्षिप्त्वा रवौ तथा ।
षष्टिघ्नाच्च पुनः शेषात् तन्मानाप्तकला अपि ॥
एवं प्राग्लग्नमानेयम् ।

(तन्त्रसंग्रहः, ३. ९५b-९९)

इति । तथाऽऽनीतस्य प्राग्लग्नस्य याग्रज्या—

सायनार्कभुजाजीवा परमक्रान्तिताडिता ।
लम्बकाप्ताग्रजीवा स्यात् ।

(तन्त्रसंग्रहः, ३. ३६-३७)

इत्युक्तप्रकारेणानीता[1] सैवोदयज्या । तयोर्मध्यज्ययोदयज्ययोः संवर्गतः[2] त्रिज्यया विभज्य लब्धं[3] बाहुज्या नाम । तस्या बाहुज्याया वर्गं मध्यज्यायास्त्रिज्यायाश्च वर्गतो[4] विशोध्य शिष्टद्वयं मूलीकृत्य तयोराद्यमूलं त्रिज्यया निहत्य द्वितीयमूलेन विभजेत् । तत्र लब्धं दृक्क्षेपज्या नाम । तद्वर्गं त्रिज्यावर्गतो विशोध्य शिष्टस्य मूलं दृक्क्षेपकोटिः । सैव दृग्गतिज्या चेति ॥ ३b-७ ॥

[लम्बननाडिकाः तत्संस्कारश्च]

अथ दृग्गतिज्याया लम्बननाडिकानयनं पर्वान्ते तत्संस्कारप्रकारं चाह— [एकज्यावर्गत इति ।]

मूलम्— 1. B. दृक्क्षेपं

व्याख्या—1. C. ण समानीता 2. C. संवर्गं तं
3. C. लब्धा 4. C. मध्यज्यावर्गतः त्रिज्यावर्गतश्च

लम्बनं नाडिकादिः स्यात् स्वर्णमूनाधिके रवौ ।
पर्वान्ते मुहुरप्येवं पर्वान्तमविशेषयेत् । ९ ॥

[रवेर्नतिकलाः]

अविशिष्टात् तु दृक्क्षेपात् स्फुटभुक्त्याहताद् रवेः ।
51570
खस्वरेष्वेकभूताप्ता नतिर्दृक्क्षेपवद् दिशा ॥ १० ॥

[चन्द्रस्य नतिकलाः]

तत्कालेन्दुस्फुटात् क्षेपं प्राग्वत् कृत्वा स्फुटं ततः ।
क्षेपदृक्क्षेपचापैक्यात् साम्ये भेदेऽन्तराद् गुणः ॥ ११ ॥

तत्रैकराशिज्यावर्गतो दृग्गतिज्यया विभज्य लब्धः **छेदो** नाम । तेन छेदेन इष्टकाले **भानुदृक्क्षेपलग्नयो**रन्तराल[1]दोर्ज्यां विभज्य लब्धं फलं **लम्बनं नाडिकादिकं** भवति ।[2] तत् **पर्वान्ते** दृक्क्षेपलग्नतो रवेरूनाधिकतावशाद् धनमृणं च कुर्याद् इति । अत्र लम्बनसंस्कृतस्फुटपर्वान्त एव[3] तात्कालिकार्कदृक्क्षेपलग्नादिकं कर्तव्यम् । तत एव च **लम्बन**मिति । अविशेषकरणेनैव स्फुटत्वादुक्तम्— **मुहुरप्येवं पर्वान्तमविशेषये**दिति ॥ ८-९ ॥

[रवेर्नतिकलाः]

अथ लम्बननाडिकानामविशेषे[4] दृक्क्षेपज्याया अप्यविशेषलाभात्[5] तया रवेर्नतिलिप्तानयनायाह— [**अविशिष्टात्विति** ।]

उक्तप्रकारेण **अविशिष्टां दृक्क्षेपज्यां रवेः स्फुटभुक्ति**कलाभिर्निहत्य **खस्वरेष्वेकभूतैः** (५१५७०) विभजेत् । तत्र लब्धा रवेर्नतिकला भवन्ति[6] ॥ १० ॥

[चन्द्रस्य नतिकलाः]

अथ चन्द्रस्यापि नतिलिप्तानयनायाह— [**तत्कालेन्दुस्फुटादिति** ।]

व्याख्या—1. C. रालतो 2. C. Tr. नाडिकादिकं लम्बनं भवति

3. C. पर्वान्तित एव 4. C. मविशेष

5. C. अप्यवशिष्टत्वात्

6. C. adds : तासां दृक्क्षेपज्यावद् दिग्विज्ञातव्या । दृक्क्षेपज्यायाः पुनर्लम्बनाधिक्ये सौम्यत्वं, अन्यदा याम्यत्वं च प्रागेवोक्तमिति ।

51570

द्वितीयस्फुटभुक्तिघ्नो हृतः खाद्रीषुभूशरैः ।
नतिस्तत्क्षेपयोरैक्यं दिक्साम्येऽन्तरमन्यथा ॥ १२ ॥

तदर्कनतिलिप्तानां दिक्साम्येऽन्तरमेव च ।
दिग्भेदे चैक्यमेव स्यात् स्फुटा सूर्यग्रहे नतिः ॥ १३ ॥

अर्कस्य चेन्नतिः शिष्टा विश्लेषे व्यत्ययेन दिक् ।
चन्द्रस्यैव नतेर्ग्राह्या दिक् तस्याश्चान्यदा सदा ॥ १४ ॥

[रविग्रहणस्य सदसद्भावः परमग्रासप्रमाणं च]

सम्पर्कार्धाधिका सा चेत् ग्रहणं नैव भास्वतः ।
सम्पर्कार्धात् त्यजेदूनां परमग्राससिद्धये ॥ १५ ॥

अविशिष्टेन लम्बनेन[1] कृतसञ्चालनात्[2] तत्कालेन्दुस्फुटात् पातं विशोध्य विक्षेपमानीय प्राग्वदेव मन्दस्फुटकर्णेन निहत्य द्वितीयस्फुटकर्णेन विभज्य लब्धस्य स्फुटविक्षेपस्य यच्चापं तस्य दृक्क्षेपचापस्य च मिथो दिक्साम्यभेदवशाद्[3] योगमन्तरं[4] वा कृत्वा ततो जीवामानीय चन्द्रस्य द्वितीयस्फुटगतिकलाभिर्निहत्य खाद्रीषुभूशरैः (५१५७०) विभजेत् । तत्र लब्धाश्चन्द्रस्य स्फुटा नतिकला भवन्ति । तथाऽऽनीतायाश्चन्द्रस्य स्फुटनतेः स्फुटविक्षेपस्य चास्य दिक्साम्यभेदवशाद् योगमन्तरं वा कृत्वा पुनस्तस्या अर्कनतेश्च दिशोर्भेदे साम्ये च योगमन्तरं वा[5] कुर्यात् । एवंकृता सूर्यग्रहणे स्फुटा नतिर्भवति, अर्केन्द्वोरेकदिशा नतयोर्नत्यन्तरस्यान्यदा तद्योगस्य च स्फुटनतित्वात् । तत्र यदि नत्योरन्तरेऽर्कस्य नतिः शिष्येत तर्हि व्यत्ययेनैव नतेर्दिग् ग्राह्या, अन्यथा यथास्थितैवेति ॥ ११-१४ ॥

व्याख्या—1. C. लम्बकेन　　2. C. सञ्चलनात्

3. A. भेदसाम्यवशात्

4. A. दिशोः साम्ये भेदे च योगमन्तरं; C. दिशोर्भेदे योगं साम्ये चान्तरं

5. C. om. वा

[मध्यग्रहणम्]

रवीन्दुबिम्बसम्पर्कदलात् स्फुटनतेरपि ।
स्थित्यर्धे प्राग्वदानेयं[1] तत्र तत्र च लम्बनम् ॥ १६ ॥

कपालैक्ये तु संयोज्यं स्थित्यर्धे लम्बनान्तरम् ।
लम्बनैक्ये तु तद्भेदे तत् स्थित्यर्धे तु योजयेत् ॥ १७ ॥

प्राक्कपाले क्रमान्न्यूनं स्पर्शकालादिलम्बनम्[2] ।
क्रमेण चाधिकं प्रत्यक्कपाले तेषु लम्बनम् ॥ १८ ॥

[रविग्रहणस्य सदसद्भावः परमग्रासप्रमाणं च]

अथैवमानीतया स्फुटनत्या सूर्यग्रहणस्य सदसद्भावौ परमग्रासप्रमाणं च दर्शयितुमाह— [सम्पर्कार्धाधिकेति ।]

तत्रार्केन्द्वोरवनत्योर्योगान्तरोत्पन्ना येयं स्फुटनतिः[1] प्रदर्शिता[2] सा रवीन्द्वोर्बिम्बसम्पर्कार्धतो यद्यधिका स्यात्, तर्हि तयोः बिम्बनेम्योरितरेतराक्रान्तत्वाभावात् ग्राहकबिम्बावच्छादितग्राह्यबिम्बलक्षणं रवेर्ग्रहणं नैव सम्भवति, हीनत्व एव तत्सम्भवात् ।[3] अत एव परमग्रासप्रमाणमपि तयोरेव बिम्बसम्पर्कार्धतः स्फुटावनतिं विशोध्य शिष्टतुल्यमिति[4] ॥ १५ ॥

[मध्यग्रहणम्]

एवं रवेर्मध्यग्रहणं[5] प्रसाध्य तत्रापि स्थित्यर्धद्वयं चन्द्रग्रहणवदेव कर्तव्यमित्याह— [रवीन्दुबिम्बेति ।]

अत्र रवीन्द्वो[6]बिम्बसम्पर्कार्धतः स्फुटनतेरपि स्थित्यर्धं चन्द्रग्रहणोक्तन्यायेन कर्तव्यम् । तद्यथा—बिम्ब[7]सम्पर्कार्धवर्गतः स्फुटनतेर्वर्गं विशोध्य शिष्टं मूलीकृत्य षष्ट्या निहत्य [8]स्फुटगत्यन्तरकलाभिर्विभजेत् । तत्र लब्धं

मूलम्— 1. C. प्राग्वदानीय 2. B. om. लम्बनम्

व्याख्या—1. A. B. स्फुटगतिः 2. C. om. प्रदर्शिता
3. C. तत्स्वभवात् 4. C. शिष्टं तुल्यमिति
5. C. मध्यमग्रहणं
6. C. has an extra word बिम्बे, here,
7. C. बिम्बे 8. C. adds here द्वितीय

[1]यत्रैतद्विपरीतं स्यात् शोध्यं तल्लम्बनान्तरम् ।
आसन्न उदयान्मोक्षे त्वधिकं मोक्षलम्बनम् ॥ १९ ॥
निशि चेन्मध्यकालोऽत्र[2] विप्रकृष्टश्च मौक्षिकात् ।
मौक्षिकाल्लम्बनात् त्याज्यं तदा स्यान्मध्यलम्बनम् ॥ २० ॥
मोक्षस्थितिदलात् तत्र शोध्यं तल्लम्बनान्तरम् ।
एवमस्तमयासन्ने स्पर्शे तल्लम्बनेऽधिके ॥ २१ ॥
मध्यलम्बनकालात्तु त्याज्यं तत्र तदन्तरम् ॥ २२a ॥

नाडिकादिकं स्थित्यर्धं भवति । तस्य स्पर्शमोक्षद्वयसाधारणत्वात् स्वस्वलम्बन-संस्कारेणैव स्फुटत्वात् लम्बनमानेतव्यम् ।[1]

तद्यथा—तत्र स्पर्शमध्यमोक्षेषु एककपालावस्थितेषु स्पर्शमध्य-लम्बनान्तरं[2] स्पर्शस्थित्यर्धे प्रक्षिपेत् । मोक्षमध्यलम्बनान्तरं च मोक्षस्थित्यर्धे प्रक्षिपेत्[3] ।

स्पर्शमध्ययोर्मोक्षमध्ययोर्वा कपालभेदे[4] लम्बनैक्यं तत् स्थित्यर्धे प्रक्षिपेत् । यस्मात् प्राक्कपाले स्पर्शमध्यमोक्षाणां लम्बनं क्रमान्न्यूनं भवति । प्रत्यक्कपाले पुनः क्रमेण चाधिकमिति । यत्र पुनरेतद्विपरीतं स्यात्, तदा लम्बनान्तरं शोध्यमेव । यथा तत्रैव प्राक्कपाले [5]रव्युदयादधऊर्ध्ववर्तिनोर्ग्रहणमध्य-

---

मूलम्— 1. C_7. यद्यैतत् 2. $C_{1 \cdot 6 \cdot 8 \cdot 10}$ कालोक्त

व्याख्या - 1. C. adds here : तत्र प्रथमं साधारणत्वेन आनीतमेतत्स्थित्यर्धं ग्रहण-मध्यकालादविशिष्टस्वलम्बनसंस्कृतपर्वान्ताद्विशोध्य प्रायिकः स्पर्शकाल आनेतव्यः । अथ तस्मिन् स्पर्शकालेऽपि काललग्नादिपुरस्सरं नतिलम्बने समानीय तल्लम्बनं स्थित्यर्धे संस्कुर्यात् ।

2. B. स्पर्शमध्यतया लम्बनान्तरं

3. C. adds here : यदा पुनर्विशेषणीययोर्लम्बनयोरन्यतरस्य शून्यत्वं तदितरलम्बनतुल्यमेव लम्बनान्तरमपि इत्यवगन्तव्यम् । "योगे खं क्षेप-सममिति" न्यायस्य वियोगेऽप्युपलक्षणात् । येन

4. C. कपाले भेदे

5. C. reads the passage as : रव्युदयादधोवर्तिनि मध्यग्रहणे तदूर्ध्व-वर्तिनि च मोक्षे यदा मोक्षस्य उदयासन्नतरत्वं

[स्पर्शकालाविशेषः]

स्थित्यर्धमेवमानीतं स्पार्शिकं[1] पर्वणस्त्यजेत् ॥ २२b ॥

अविशिष्टात् पुनस्तस्मिन् स्पर्शेऽपि नतिलम्बने ।
स्थित्यर्धमपि चानीय तन्नत्यानीतया सकृत् ॥ २३ ॥

स्थित्यर्धं स्पर्शमध्योत्थलम्बनान्तरसंस्कृतम् ।
लम्बनैक्ययुतं वा स्यात् स्पर्शमध्यकपालयोः ॥ २४ ॥

भेदे तेन विहीनो यो मध्यकालोऽविशेषितः[2] ।
तत्रापि सकृदानीय नतिस्थितिदलादिकम् ॥ २५ ॥

लम्बनान्तरमैक्यं वा कुर्यात् स्थितिदलेऽत्र च ।
तेनापि स्पर्शकालादीन् प्राग्वदेवानयेन्मुहुः ॥ २६ ॥

मोक्षयोर्यदा मोक्षस्योपरिवर्तिन उदयं प्रत्यासन्नतरत्वं, ग्रहणमध्यस्य च [1]निशावसानस्थितत्वेपि रव्युदयं प्रति मोक्षकालाद् विप्रकृष्टत्वं, तदा मौक्षिकाल्लम्बनात् मध्यलम्बनं त्याज्यम्, तत्र शिष्टं लम्बनान्तरं मोक्षस्थितिबलाच्छोध्यमेव । तथा प्रत्यक्कपाले स्पर्शे मध्यग्रहणतोऽप्यस्तमयासन्ने स्पर्शलम्बनेऽधिके च सति स्पर्शमध्यलम्बनयोरन्तरं स्पर्शस्थितिदलात् त्याज्यमेव[2] इति ॥ १९-२२a ॥

[स्पर्शकालाविशेषः]

अथ स्पर्शस्थित्यर्धमविशेषयितुमाह[3]—[स्थित्यर्धमिति ।]

तत्रोक्तवल्लम्बनसंस्कृतं स्पर्शस्थित्यर्धं ग्रहणमध्यपर्वान्तादविशिष्टस्वलम्बनसंस्कृताद् विशोधयेत्[4] । स स्पर्शकालो भवति । पुनस्तस्मिन् स्पर्शेऽपि

मूलम् — 1. C. तादृशं 2. C. $_{1\text{-}6\cdot 8\cdot 10}$ काले विशेषतः

व्याख्या—1. C. reads only : निशावसानस्थितस्य विप्रकृष्टत्वं

2. C. शोध्यमेव for त्याज्यमेव

3. B. स्थित्यर्धमपि चानीय तप(?)यितुमाह

4. C. (except 9) संस्कृतादपि शोधयेत्

कालं तं निश्चलीकृत्य मोक्षकालं तथानयेत् ॥ २७a ॥

[मोक्षकालाविशेषः]

अविशिष्टे तु पर्वान्ते स्थित्यर्धं तत् क्षिपेन्मुहुः ॥ २७b ॥

लम्बनान्तरमैक्यं वा मोक्षस्थितिदलेऽपि च ।
तत्तन्नतिकृते कार्यं प्राग्वत्तच्चाविशेषयेत् ॥ २८ ॥

काललग्नादिपुरस्सरं **नतिलम्बने स्थित्यर्धमपि** एकयैवावृत्त्या[1] नीत्वा तस्मिन् स्पर्शस्थित्यर्धे **स्पर्शमध्यलम्बनयोः** कपालैक्यभेदवशाद् विश्लेषं योगं वा प्रक्षिपेत्। यदा पुनः[2] स्पर्शमध्यग्रहणयोर्मध्ये रवेरस्तमयः तदा अस्तमयासन्नतरे स्पर्शे तत्स्थित्यर्धे स्पर्शमध्यलम्बनयोरन्तरं शोधयेत् । तथाकृतं स्पर्शस्थित्यर्धं पूर्वोक्तादेव ग्रहणमध्यपर्वान्ततो विशोधयेत् । पुनरपि तं स्पर्शकालं परिकल्प्य तत्रापि काललग्नाद्यानयनपूर्वकं एकयैवावृत्त्या नतिलम्बने समानीय तत्र स्फुटनतिसिद्धे स्थित्यर्धे पूर्ववत् **लम्बनान्तरमैक्यं वा कुर्यात्** । तथाकृतं स्थित्यर्धं पूर्वोक्तान्मध्यग्रहणपर्वान्ततो विशोध्य पुनरप्येवमेव कुर्यात्, यावदविशेषः । अविशिष्टेन [3]स्थित्यर्धेन विहीनो मध्यग्रहणपर्वान्तः स्फुटः स्पर्शकालो भवति । एवं स्पर्शकालं **निश्चलीकृत्य मोक्षकाल**मप्यविशेषकर्मणैव स्फुटीकुर्यादिति ॥ २२b-२७a ॥

[मोक्षकालाविशेषः]

तदेव दर्शयति — [**अविशिष्ट इति** ।]

तत्र पूर्वानीतमध्यग्रहणत एव[4] यन्मोक्ष**स्थित्यर्धं**, तस्मिंस्तयोर्लम्बनयोर्योगमन्तरं वा प्रक्षिपेत्। मध्यग्रहणतो मोक्षस्य कपालभेदे सति तयोर्लम्बनयोर्योगं, अन्यथा तयोरन्तरं प्रक्षिपेत्। मोक्षे तु रव्युदयादूर्ध्ववर्तिनि तदधोवर्तिनो मध्यकालादुदयासन्ने तयोर्लम्बनयोरन्तरं मोक्षस्थित्यर्धतो विशोधयेत्। तथाकृतं तत्स्थित्यर्धं पूर्वोक्त एव मध्यग्रहणपर्वान्ते[5] कृताविशिष्टस्वलम्बने प्रक्षिपेत्। स मोक्षकालो भवति । ततस्तस्मिन्

व्याख्या—1. C. एकया वृत्त्या 2. C. om. पुनः
3. C. स्पर्शस्थित्यर्धेन 4. C. adds पूर्वानीतं
5. A. adds एव

तद्युते[1] मध्यकालेऽस्य मोक्षो वाच्यो विवस्वतः ॥ २९a ॥

[विमर्दार्धं निमीलनोन्मीलनं च]

चन्द्रबिम्बाद् रवेर्बिम्बे त्यक्ते शिष्टस्य यद्दलम् ॥ २९b ॥

ततः स्फुटनतिर्हीना यदि स्यात् सकलग्रहः ।

चन्द्रबिम्बे रवेर्बिम्बात् त्यक्ते शिष्टस्य यद्दलम् ॥ ३० ॥

मोक्षकालेऽपि[1] काललग्नादिपुरस्सरमेकयैवावृत्त्या[2] नतिलम्बने समानीय तत्स्फुटनत्युत्पन्न[3]मोक्षस्थित्यर्धे पूर्ववद् ग्रहणमध्यमोक्षद्वयोत्पन्नयोर्लम्बनयोरन्तरमैक्यं[4] वा विधिवत् कुर्यात् । ततस्तेन स्थित्यर्धेन युक्ते ग्रहणमध्यपर्वान्ते पुनरपि काललग्नपूर्वकमेकयैवावृत्त्या[5] नतिलम्बने समानीय स्फुटं स्थित्यर्धमप्यानयेत् । ततो मोक्षकालं, ततोऽपि स्थित्यर्धमेवं[6] मुहुः कुर्याद् यावदविशेषः । अविशिष्टेन मोक्षस्थित्यर्धेन संयुक्तो मध्यग्रहणकालस्फुटो **मोक्षकालो** भवतीति । तत्रैव काले[7] **विवस्वतो मोक्षो** वाच्यः । मोक्षग्रहणं स्पर्शस्याप्युपलक्षणम् । तेनाविशिष्ट एव स्पर्शकाले [8]तत्स्पर्शोऽपि वक्तव्य इति ॥ २७b-२९a ॥

[विमर्दार्धं निमीलनोन्मीलनं च]

अथ सकलान्तर्ग्रहयोर्विमर्दार्धान्तर्ग्रहार्धानयन[9]पूर्वकं निमीलनोन्मीलने पूर्तिच्छेदौ च प्रदर्शयितुमाह— [**चन्द्रबिम्बादिति** ।]

तत्र अर्कग्रहणे ग्राह्यात् स्वबिम्बाद् ग्राहके **चन्द्रबिम्बेऽ**धिके सति ततोऽर्कबिम्बं विशोध्य **शिष्टार्धतः स्फुटनतेर्हीन**संख्यत्वे कात्स्र्न्येन ग्रहणं बोद्धव्यम् । अर्थात् तत्तुल्यत्वेऽपि[10] **सकलग्रहण**मेवेति । अथ **चन्द्रबिम्बे रवेबिम्बात् त्यक्ते शिष्टस्य** यदर्धं ततः[11] स्फुटनतेर्हीनसंख्यत्वे सति अन्तर्ग्रह एव भवति । अत एव तत्र बिम्बान्तर्भागस्यैव गृहीतत्वात् समन्ततस्तत्परिधि-

---

मूलम् —1. B. तद्युक्ते

व्याख्या—1. A. C.₉ स्पर्शकालेऽपि 2. C. मेकैकया वावृत्त्या

3. C. न्नं 4. C. मोक्षयोर्लम्बनान्तरमैक्यं

5. C. पूर्वकमेकावृत्त्यैव 6. C. इति for एवं

7. B. तत्रैव कालो 8. C. om. तत्

9. B. ग्रहणार्धानयन; C. ग्रहानयन 10. A. अथार्कात्तुल्यत्वेऽपि

11. C. तत् for ततः

ततो यदि नतिर्हीना दृश्या स्यात् परिधिस्तदा ।
बिम्बे भेदार्धवर्गात्तु नतिवर्गोनितात् पदम् ॥ ३१ ॥

षष्टिघ्नं गतिभेदाप्तं विमर्दार्धं रवेरपि ।
चन्द्रेऽल्पेऽन्तर्ग्रहार्धं स्यात् प्राग्वत् ते चाविशेषयेत् ॥ ३२ ॥

मध्यकालाद् विमर्दार्धे शुद्धेऽत्रापि निमीलनम् ।
क्षिप्ते चोन्मीलनं तद्वत् पूर्तिश्छेदश्च नेमिगः ॥ ३३ ॥

[ग्रहणस्य दृक्संवादः]

द्रष्टुर्भूपृष्ठगस्येन्दुबिम्बोऽर्काच्च महान् भवेत् ।
नानात्वात् प्रतिदेशं तन्नेयं बिम्बं स्वदेशजम् ॥ ३४ ॥

दृश्यते । तत्र ग्राह्यग्राहकयोर्बिम्बभेदस्य यदर्धं तस्य स्फुटनतेश्च वर्गान्तरमूलं षष्टया निहत्य अर्कचन्द्रयोः [1]स्फुटगत्यन्तरेण विभजेत् । तत्र लब्धं **रवेर्ग्रहणे विमर्दार्धं** भवति । अपिशब्देन चन्द्रग्रहणेऽप्येवमेव विमर्दार्धमानेतव्यमिति दर्शितम्[2] । तत्र **चन्द्रबिम्बेऽल्पे** सति तथानीतमन्तर्ग्रहार्धं वेदितव्यम् । **ते च** विमर्दार्धान्तर्ग्रहार्धे स्थित्यर्धवदेवा**विशेषयेत्**[3] । **अत्रापि** ग्रहण**मध्यकालाद् विमर्दार्धे** त्यक्ते **निमीलनं, क्षिप्ते च उन्मीलनं,** [4]अन्तर्ग्रहार्धे त्यक्ते **पूर्तिः** क्षिप्ते **छेदश्च**[5] ग्राह्यबिम्ब**नेमिगो**[6] बोद्धव्य इति[7] ॥ २९b-३३ ॥

[ग्रहणस्य दृक्संवादः]

एवं रवीन्द्वोर्बिम्बद्वयनतिविक्षेपाणां भगोलगतत्वमाश्रित्य ग्रहणसदसद्भाव-सर्वग्रास-मध्यतमांसि प्रदर्शितानि । इदानीं दृग्गोलगतैरेव [8]तैर्दृक्संवाद[9]लाभात् तदानयनायाह— [**द्रष्टुरिति** ।]

व्याख्या—1. C. adds द्वितीय   2. C. दर्शयति
3. C. वदविशेषणीये   4. C. adds तथा
5. A. त्यक्ते पूर्तिः छेदश्च; B. त्यक्ते क्षिप्ते च पूर्तिः छेदश्च
6. C. (except 9) नेमिगौ
7. C. (except 9) बोद्धव्यौ इति ।
8. A. om. तैः   9. C. (other than 6. 9) सम्पात

मध्यकालभुजाज्यायाः प्राग्वद् दृक्क्षेपमानयेत् ।
भानोर्दृक्क्षेपलग्ना ज्या हता दृक्क्षेपशङ्कुना ॥ ३५ ॥

त्रिज्याप्ता दृग्गतिर्भानोर्यत्तद् दृक्क्षेपवर्गयोः ।
योगात् पदं तदैक्योनं त्रिज्यावर्गाच्च यत् पदम् ॥ ३६ ॥

छायाशङ्कू रवेस्ताभ्यां भूव्यासार्धस्य योजनैः ।
हताभ्यां त्रिज्यया लब्धे दोःकोटी योजनात्मिके ॥ ३७ ॥

तत्र तावद् घनभूमध्यकेन्द्रके[1] वृत्ते यानि बिम्बादीनां मानानि प्रदर्शितानि, तान्येव भूपृष्ठावस्थितद्रष्टृदृक्केन्द्रके दृग्गोलाख्ये वृत्ते समानीयमानानि महत्त्वमेवोपयान्ति । तत्रापि इन्दुबिम्बोऽर्कबिम्बादतीव महान् भूपृष्ठसन्निहितत्वात् । प्रतिदेशं नानारूपत्वात्, तत्पुनः[2] स्वदेशजमेव बिम्बादिकमानेतव्यम् । तदिदं दृक्कर्णायत्तमिति प्रथमं दृक्कर्णमानयेत् ।

तद्यथा - मध्यकालभुजाज्यायाः[3] काललग्नकोटिज्यारूपायाः स्वदेशलम्बकेन निहत्य [4]करार्थाब्ध्युरगैः (८४५२) विभज्य यल्लब्धं यच्चान्त्यद्युज्याक्षज्ययोर्घातात् त्रिज्यया विभज्य लब्धं तयोः काललग्नस्य मृगकर्क्यादिवशाद् योगं विश्लेषं वा कुर्यात् । सा दृक्क्षेपज्या । सा पुनः फलयोर्विश्लेषे लम्बजफलस्य शिष्टत्वे सौम्या,[5] अन्यदा [सर्वदा[6] दक्षिणा एव, तस्याः स्वदृक्क्षेपज्यायास्त्रिज्यायाश्च[7] वर्गान्तरमूलं दृक्क्षेपकोटिरिति[8] । एतत्सर्वं प्राग्वदित्यनेन दर्शितम् ।

ततो दृक्क्षेपलग्नतोऽर्कस्य यान्तरालदोर्ज्या सा दृक्क्षेपशङ्कुना दृक्क्षेपकोट्या निहता त्रिज्यया विभक्ता भानोर्दृग्गतिज्या भवति । तस्या दृग्गतिज्याया दृक्क्षेपज्यायाश्च यो वर्गयोगः, यश्च तदूनत्रिज्यावर्गः तयोर्ये[9] मूले क्रमेण रवेः छायाशङ्कू स्यातामिति । तौ छायाशङ्कू पृथग् भूव्यासार्धयोजनैर्निहत्य त्रिज्यया विभजेत् । तत्र लब्धे क्रमेण दोःकोटिफले योजनात्मके स्याताम् । तत्र [छायातो लब्धं दोःफलं, शङ्कोर्लब्धं कोटि-

---

व्याख्या—1. C. $_{1-8\cdot10}$ केन्द्रे 2. C. तस्मात्
3. B. भुजज्यायाः 4. A. कामार्था; C. $_{1-8\cdot10}$ करार्का
5. C. सौम्यदिक्का 6. C. om. सर्वदा
7. A. तस्या स्वदृक्क्षेपज्यायाश्च ; C. तस्यास्त्रिज्यायाश्च
8. C. $_{1-8\cdot10}$ मूलमिति 9. C. om. ये

रविभूम्यन्तरात् कोटिं त्यक्त्वा तद्बाहुवर्गयोः ।
योगात् पदं भवेद् भानोर्दृक्कर्णो योजनात्मकः ॥ ३८ ॥
क्षेपदृक्क्षेपचापैक्यं नतिः साम्येऽन्यथान्तरम् ।
राशित्रयं यदूनं यत् तज्ज्या शङ्कुः पराभिधः ॥ ३९ ॥
चन्द्रोनलग्नबाहूना त्रिज्या जूकादिजान्विता ।
क्षेपकोट्या हता भक्ता त्रिज्यया बाण उच्यते ॥ ४० ॥
ततो दृक्क्षेपकोटिघ्नं[1] त्रिज्याप्तं परतस्त्यजेत् ।
शेषः शङ्कुः शशाङ्कस्य ततो दृग्ज्या च पूर्ववत् ॥ ४१ ॥
भूव्यासार्धहते[2] ते च त्रिज्याप्ते कोटिदोःफले ।
दृक्कर्णोऽर्कवदिन्दोस्तत् स्वभूम्यन्तरयोजनैः ॥ ४२ ॥

फलमिति । तत्र कोटिफलं **रविभूम्यन्तराद्** रवेर्द्वितीयस्फुटयोजनकर्णाद्विशोध्य शिष्टस्य तद्दोःफलस्य च **वर्गयोर्योगपदं रवेर्योजनात्मको दृक्कर्णो** भवति। एवं रवेर्दृक्कर्णयोजनानयनम् ।

अथ चन्द्रस्यापि पूर्ववदानीतदृक्क्षेपचापस्य तत्कालकेवलसायनचन्द्रसमुद्भूतविक्षेपचापस्य च दिक्साम्यभेदवशाद् योगमन्तरं वा कृत्वा **राशित्रयाद्विशोध्य** शिष्टचापस्य या **ज्या** सा[1] **परशङ्कुर्नाम** । ततस्तदानीं लग्नत: केवलं सायनेन्दुं विशोध्य शिष्टे मेषादिगते सति तद्दोर्ज्यां त्रिज्यातो विशोधयेत् । तुलादिगते सति त्रिज्यायां प्रक्षिपेत् । एवंकृतां दोर्ज्यां **विक्षेपकोट्या** निहत्य **त्रिज्यया** विभज्य लब्धो **बाण इत्युच्यते** । तस्माद् बाणाद् **दृक्क्षेपकोटिगुणितात् त्रिज्यया** विभज्य लब्धं फलं पूर्वानीतपरशङ्कोर्विशोधयेत् । तत्र शिष्टश्चन्द्रस्येष्टशङ्कुः स्यात् । **ततो दृग्ज्या च पूर्ववत्** तत्त्रिज्यावर्गविश्लेषमूलेनैव कर्तव्या । तथाकृते चन्द्रस्य शङ्कुच्छाये पृथग्**व्यासार्धयोजनै**र्निहत्य **त्रिज्यया** विभजेत् । तत्र लब्धे[2] क्रमेण इन्दो:[3] **कोटिदोःफले** स्याताम् । ततो **दृक्कर्णोऽपि अर्कवदेव** कर्तव्यः । यस्मात् तदेव[4] कोटिफलं चन्द्रस्य द्वितीयस्फुटयोजनकर्णतो विशोध्य शिष्टस्य

मूलम्— 1. B. कोटिघ्न; C. कोटिघ्ना　2. C. (other than 6, 9) गते

व्याख्या—1. A. B. स　2. C. 1-6-8-10. विभज्य लब्धे

3. A. तस्यैव for इन्दो　4. C. मतस्तदेव

त्रिज्याघ्नाद् योजनव्यासात् तेनाप्ता बिम्बलिप्तिकाः ।
इष्टेन्दुः समलिप्तेन्दोर्द्वितीयस्फुटभोगतः ॥ ४३ ॥

इष्टकेवलपर्वान्तद्युगतान्तरकालजात् ।
विक्षेपः केवलाच्चन्द्रात् प्राग्वत् त्रिज्याहृतो हतः ॥ ४४ ॥

योजनैर्विवरे चन्द्रभगोलघनमध्ययोः ।
दृक्कर्णयोजनैर्भक्तो दृग्गोले क्षेप इष्यताम् ॥ ४५ ॥

केवलादेव दृक्क्षेपात् भूव्यासार्धेन ताडितात् ।
विधोर्योजनदृक्कर्णभक्तात्र नतिलिप्तिकाः ॥ ४६ ॥

तद्वदेव च दृक्क्षेपात् स्वदृक्क्षेपेन[1] भास्वतः ।
रवीन्द्वोर्नतिभेदः स्यात् सर्वदैवं[2] नतिर्विधोः ॥ ४७ ॥

तद्दोःफलस्य च वर्गयोगमूलं चन्द्रस्य दक्कर्णो योजनात्मको भवति इति। ततो रवीन्द्वोर्बिम्बयोजनव्यासौ पृथक् त्रिज्यया निहत्य स्वस्वदृक्कर्ण-योजनैर्विभजेत् । तत्र लब्धा दृग्गोलगता बिम्बलिप्ता भवन्ति ।

अथ लम्बनाद्यविकृतपर्वान्तस्य इष्टकालस्य चान्तरनाडिका द्वितीयस्फुट-भुक्तिकलाभिर्निहत्य षष्टया विभज्य लब्धाः कलाः समलिप्तचन्द्रे तदिष्टकालस्या-धिकोनतावशाद् धनमृणं वा कुर्यात् । ततस्तस्मादेव केवलचन्द्रतः प्राग्वद्विशुद्ध-पाताद् दोर्ज्यामानीय परमक्षेपेण निहत्य त्रिज्यया विभज्य लब्धं फलं पुनरपि चन्द्रभगोलघनमध्ययोर्विवरेण[1] मन्दस्फुटयोजनकर्णेन निहत्य तस्यैव दृक्कर्णयोजनैर्विभजेत् । तत्र लब्धो दृग्गोल[2]विक्षेपो भवति ।

ततो दृक्क्षेपमपि चन्द्रस्य विक्षेपं विना केवलमेव भूव्यासार्धयोजनैर्निहत्य तस्यैव दृक्कर्णयोजनैर्विभजेत् । तत्र लब्धा दृग्गोले नतिकला भवन्ति । एवं रवेरपि दृक्क्षेपतो भूव्यासार्धयोजनैर्निहतात् तस्यैव दृक्कर्णयोजनैर्विभजेत् ।

मूलम्— 1. C. 1-8·10 स्वदृक्कर्णेन 2. C. सर्वदैव

व्याख्या—1. C. मध्ययोरन्तरेण 4. C. दृग्गोले

तद्भूपृष्ठोदितक्षेपयुतिः साम्येऽन्यथान्तरम् ।
एवं भूपृष्ठगां नीत्वा [1]नतिं बिम्बद्वयं तथा ॥ ४८ ॥
सर्वग्रासो विनिर्णेयो नाम्ना मध्यतमस्तथा ।
ग्रहणं वाप्यभावो वा वाच्यो मानैः स्फुटैरिह ॥ ४९ ॥

[ग्रहणमध्यम्]

तत्कालचन्द्रदृक्क्षेपलग्नान्तरभुजागुणात् ।
अर्कवद् दृग्गतिः साध्या भूव्यासार्धहते तयोः ॥ ५० ॥
दृग्गती[2] स्वस्वदृक्कर्णयोजनैर्विहृते कलाः ।
धनं[3] दृक्क्षेपलग्नात् प्राक् सूर्येन्द्वोर् ऋणमन्यथा ॥ ५१ ॥

तत्र लब्धाः[1] तस्य नतिकलाः । तयोर्दृग्गोलगतयोर्नत्योः दिग्भेदसाम्यवशाद् योगमन्तरं वा कुर्यात्[2] । सा विधोः स्फुटनतिर्भवति । एवमानीतायाः स्फुटनतेः भूपृष्ठसम्पादितस्य विक्षेपस्य च दिक्साम्यभेदवशाद् योगोऽन्तरं वा सूर्यग्रहणे स्फुटतरा नतिर्भवति । एवं भूपृष्ठगां स्फुटनतिं बिम्बद्वयमप्यानीय स्फुटैस्तन्मानैरेव ग्रहणसदसद्भावसमस्तग्रहान्तग्रहादिकं[3] सकलं वाच्यमिति ॥ ३४-४९ ॥

[ग्रहणमध्यम्]

अथार्केन्द्वोर्बिम्बयोरत्यन्तसन्निकर्षलक्षणस्य ग्रहणमध्यस्य प्रदर्शनायाह— [तत्कालचन्द्रेति ।]

तत्र यथा तत्कालार्कदृक्क्षेपलग्नयोरन्तराल[4]दोर्ज्यातो दृक्क्षेपकोट्या निहतया त्रिज्यया विभज्य लब्धा दृग्गतिज्या च स्यात् । तथा तत्कालेन्दु-

---

मूलम्— 1. A. C. $_{1-8\cdot10}$ नति for नतिं   2. C. दृग्गतिः
3. C. धन for धनं

व्याख्या —1. C. विभज्य लब्धाः for तत्र लब्धाः
2. C. $_{1-8\cdot10}$ नत्योः सर्वदान्तरमेव कुर्यात् ।
3. C. ग्रहान्तादिकं
4. A. B. Hapl. om. of रन्तराल to रन्तराल, two lines below.

एवंकृतार्कशीतांश्वोः साम्ये स्यात् सन्निकृष्टता ।
कृतलम्बनलिप्तार्कचन्द्रयोर्विवरस्य च ॥ ५२ ॥
कृत्योः स्फुटनतेश्चैक्यात्[1] मूलं बिम्बान्तरं ग्रहे ॥ ५३a ॥

[ग्रहणानादेश्यता]

एवमस्तमये स्पर्शे मोक्षे वाप्युदये रवेः ॥ ५३b ॥
अल्पश्चेद् ग्रास आनीतो न वाच्यो द्वादशांशतः ।
अल्पेऽर्कगतितिथ्यंशयुताल्पव्यासखण्डतः[2] ॥ ५४ ॥

दृक्क्षेपलग्नयोरन्तरालदोर्ज्याया अपि तद्वदेव दृग्गतिः साध्या । ततस्तयोरुभयोरपि दृग्गतिज्ये भूव्यासार्धयोजनैर्निहत्य [1]स्वस्वदृक्कर्णयोजनैर्विभजेत् । तत्र लब्धा [2]यथास्वं लम्बनकलाः भवन्ति । ता[3] लम्बनकलाः सूर्येन्द्वोदृक्क्षेपलग्नतः प्राग्गतयोः प्रक्षिपेत्, प्रत्यग्गतयोर्विशोधयेत् । एवं कृतलम्बनयोरर्कचन्द्रयोः[4] साम्ये सत्येव तद्बिम्बघनमध्ययोः परः[5] सन्निकर्ष इति । तत्रैव ग्रहणमध्येनापि भाव्यम् । कृतलम्बनयोरर्कचन्द्रयोर्विवरकलानां स्फुटनतिकलानां च वर्गैक्यमूलं रवेर्ग्रहणे बिम्बान्तरं भवति । तथाकृतेनैव बिम्बान्तरेण स्पर्शमोक्षेष्टग्रासादिकं सर्वं निर्देष्टव्यमिति ॥ ५०-५३a ॥

[ग्रहणानादेश्यता]

एवं स्पर्शमोक्षेष्टग्रासादिरूपं ग्रहणं विस्तरतः प्रदर्शितम् । इदानीं सम्भविनोऽप्यस्य क्वचिदनादेश्यतामाह— [एवमस्तमय इति ।]

उक्तवदानीतबिम्बान्तरविहितसम्पर्कार्धविशिष्टलक्षण इष्टग्रासो यदा रवेरस्तमयासन्ने स्पर्शे तदुदयासन्ने मोक्षे वा रवि[6]बिम्बव्यास[7]द्वादशभागादल्पो

मूलम्— 1. $C_{1-8\cdot10}$ चैक्यम् 2. C_{1-8} खण्डकः

व्याख्या—1. C. om. one स्व 2. C. यथा स्वलम्बन

3. C. ताश्च

4. A. Hapl. om. of चन्द्रयोः to चन्द्रयोः, two lines below.

5. B. परस्परं 6. C. om. रवि

7. B. व्यासाद् for व्यासः; C. om. व्यास

शङ्कौ मध्यतमः सर्वग्रहणं वा न लक्ष्यते ।
अस्तोदयार्कचन्द्रौ तत्प्राणभोगोनसंयुतौ[1] ॥ ५५ ॥

कृत्वा तत्काललग्नं तैर्नयद् बिम्बान्तरे[2] द्वयोः ।
अधिके बिम्बभेदार्धात् प्राक् पश्चाद् ग्रासमध्यतः ॥ ५६ ॥
नैव ते ग्रहणे दृश्ये सर्वे[3] मध्यतमोऽपि वा ॥ ५७a ॥

[ग्रहणपरिलेखनम्]

स्पर्शे मध्ये च मोक्षे चाप्यन्यत्रेष्टेऽपि वा पृथक् ॥ ५७b ॥

भवति, तदा तद्ग्रहणं सदपि न वक्तव्यम् । ग्रस्तांशस्य अत्यल्पत्वाद्, अनादेश्यत्वात् ।

किञ्च यत्र अर्केन्द्वोरल्पबिम्बस्य व्यासार्धतोऽर्कगतेः पञ्चदशांशेन तल्लम्बनेन युतात् तत्कालशङ्कुरल्पो भवति तत्र सम्भवदपि **मध्यतमस्कं[1] सर्वग्रहणं वा न लक्ष्यते**, भूपृष्ठव्यवहितत्वात्, तस्य इष्टग्रासः पुनस्तत्र लक्ष्येतापीति[2] ।

अपि च उदयास्तमयासन्ने तत्रैव **मध्यतमसि सर्वग्रहणे**[3] वा चन्द्रार्का-वुभावपि उदयास्तमये वा समानीय तयो[4]रिष्टकालसम्बन्धिनां गतगन्तव्य-प्राणानां गतेः क्षेपशोधने च **कृत्वा** ताभ्यां विधिवत्कृतप्राणकलान्तरचरा-सुभ्यां गतगन्तव्यप्राणैश्च काललग्नद्वयमानीय तयोरुभयोरपि स्वदृक्क्षेप-लग्नान्तरालदोर्ज्यया दृग्गतिज्यानयनपूर्वकं लम्बनकलाः समानीय तयोर्विधिवत्-कृत्वा तदन्तरालकलासु वर्गीकृतासु स्फुटावनतेर्वर्गं प्रक्षिप्य मूलीकृतं यद् बिम्बान्तरालं तस्मिन् **द्वयोर्बिम्बविश्लेषार्धादधिके** सति सकलग्रहणं **मध्यतम-स्कमपि**[5] **नैव** दृश्यं, अल्पे सत्येव तयोस्तथादृश्यमानत्वादिति ॥ ५३b-५७a ॥

[ग्रहणपरिलेखनम्]

एवं प्रतिदेशं प्रतिक्षणं च भिन्नरूपं सूर्यग्रहणं विस्तरतः प्रदर्शितम् । सम्प्रति तदेव परिलेखनेन स्पष्टीकर्तुमाह— [**स्पर्शे मध्ये चेति** ।]

मूलम्— 1. C. भोगेन संयुतौ 2. C. बिम्बान्तरं
3. A. सर्व for सर्वे

व्याख्या—1. C. 1-6·8·10 तमसं 2. C. 1-8·10 लक्ष्यतामिति
3. C. 1-8·10 सर्वग्रहणो 4. C. समानीतयो
5. C. 1-6·10 तमस्तमोऽपि

वलनद्वयमानीय प्राग्वत् तद्योगभेदजात् ।

191

गुणादेकाङ्कभूभक्तं वलनं स्यात् स्फुटं त्विह ॥ ५८ ॥

18

वृत्तं धृतिमितास्येन कर्कटेन लिखेत्[1] क्षितौ ।

दिशौ पूर्वापरे व्यस्तं लेखने फलके यदि ॥ ५९ ॥

तत्र सूर्यग्रहणे **स्पर्शे मध्ये मोक्षेऽपि वा** ततोऽन्यत्रेष्टग्रासे वा प्रोक्तरूपं **वलनद्वयमानयेत्** । **प्राग्वदि**त्यनेनात्राप्यक्षज्यानिहताया नतज्याया[1] त्रिज्यया वा आप्तफलस्य यच्चापं पूर्वापरकपालयोः क्रमेण सौम्ययाम्यदिक्कं आक्षं वलनं तथा राशित्रययुताद् ग्राह्याद् रवेर्दोर्ज्यां परमक्रान्त्या निहत्य त्रिज्यया विभज्य लब्धस्य यच्चापं तस्यैवायनसमानदिक्कं[2] आक्षं वलनमिति पूर्वोक्तं सर्वं स्मारितं, ततस्तयोर्वलनयोर्दिक्साम्यभेदवशाद् योगमन्तरं वा कृत्वा दोर्ज्यामानीय तत **एकाङ्कभूमि(191)भक्तं स्फुटं वलनं** स्यादिति । **इहे**त्यनेन अस्य चन्द्रग्रहणवलनतो भेदो दर्शितः, यतस्तत्र बिम्बान्तरेण निहत्य त्रिज्यया विभक्तं स्फुटं वलनम् ।

अथ त्रिज्यात (3438) एकाङ्कभू(191)भागस्य **धृति**(18)सङ्ख्यत्वात्[3] । तत्तुल्याग्रद्वयविवरेण **कर्कटेन** समभुवि **फलके** वा **वृत्तं** विरचय्य तद्वृत्तमध्याव-भेदिनीं पूर्वापररेखां दक्षिणोत्तररेखां च[4] कुर्यात् । फलके पुनः पूर्वापरदिशौ व्यस्तं परिकल्पयितव्ये[5] । यत उत्तानीभूतं[6] फलकमुद्धृत्य[7] अधोमुखं कृत्वैव तत्रेष्टग्रासादिप्रदर्शनं क्रियते । अतः पूर्वापरदिशोः विपर्यासः स्यादिति । ततस्तथा विरचिते दिग्रेखाङ्किते वृत्ते यथादिशं स्फुटवलन-मपि नयेत् । **पूर्ववदि**त्यनेनात्रापि वलनद्विगुणायतया वृत्तपरिधिस्पृष्टो[8]-भयाग्रया तत्पूर्वापररेखास्थमध्याङ्कया शलाकया तत्परिधावेव यथादिशं वलनस्य नयनं वृत्तापरभागेऽपि तत्पूर्वापररेखातः [9]तद्विपरीतदिशि च बिन्दुविरचनं तदुभयस्पृष्टवृत्तमध्यावगाढप्रागपररेखाविरचनं तद्विपरीत-

---

मूलम्— 1. C. कर्कटेनालिखेत्

व्याख्या—1. C. नतज्यया 2. B. तस्यैवायनात् दिक्कं 3. C. संख्यः स्यात्

4. C. भेदिन्यौ पूर्वापरदक्षिणोत्तररेखे 5. C. व्यस्तमेव परिकल्पयेत्

6. C. उक्तवदानीतं 7. C. भूफलकं समुद्धृत्य

8. C. 1-6·8-10 परिस्पृष्टो

9. B. Hapl. om. after तद्विपरीत to तद्विपरीत, next line.

वलनं पूर्ववन्नीत्वा रवेः पन्थाश्च तद्वशात् ।
नतेर्दिशि विधोस्तस्मात् स्फुटनत्यन्तरे परः ॥ ६० ॥

कार्यस्तद्वृत्तमध्येऽथ रविबिम्बं स्फुटं लिखेत् ।
मात्वा तत्केन्द्रगैकाग्रबिम्बान्तरशलाकया ॥ ६१ ॥

बिन्दुं कृत्वा विधोर्मार्गे तद्बिम्बं तत्र संलिखेत् ।
स्पर्शे प्रत्यङ्मुखीं मोक्षे शलाकां प्राङ्मुखीं नयेत् ॥ ६२ ॥

एवमेवेष्टकालेऽपि प्राक् पश्चाद् ग्रासमध्यतः ।

रेखाविरचनं च सर्वं पूर्वोक्तं स्मारितम् । ततः[1] तथाकृतायाः पूर्वापररेखायाः पार्श्वतो यथादिशं स्वावनत्यन्तरितामपरामपि प्रागपरां रेखां कुर्यात् । स इह रवेर्मार्गः ।

ततश्चन्द्रार्कयोरवनत्योर्योगान्तरोत्पन्नस्फुटावनतितुल्येऽन्तरे तद्दिश्यपरामपि प्रागपरां रेखां कुर्यात् । स विधोमार्गः । एवंकृतयोस्तयोर्मार्गयोस्तस्य धृतिमितव्यासार्धवृत्तस्य मध्ये रविबिम्बं[2] स्ववृत्तव्यासार्धेन स्फुटतरं लिखेत् । ततस्तस्यापि बिम्बस्य घनमध्यतो विधोमार्गे बिम्बान्तरशलाकया बिन्दुं नीत्वा विधोर्बिम्बमपि तत्र संलिखेत् । तत्र स्पर्शे प्रत्यङ्मुखीमेव बिम्बान्तरशलाकां नीत्वा तन्मार्गे चन्द्रबिम्बमालिखेत् । ग्राह्यादर्कबिम्बाद् ग्राहकस्य चन्द्रबिम्बस्य प्रत्यग्गतत्वात् । मोक्षे पुनः प्राङ्मुखीं नीत्वा तत्रैव तद्बिम्बमालिखेत् । प्राग्गतत्वात् चन्द्रबिम्बस्य ।

इष्टग्रासेऽप्येवमेव ग्रहणमध्यकालतः[3] पूर्वापरकालानुबन्धितया पश्चान्मुखं प्राङ्मुखं च स्वमार्गेण चन्द्रबिम्बस्य रविबिम्बतो बिम्बान्तरेण विप्रकृष्य विलेखनं स्पर्शमोक्षानुसारेण कर्तव्यम् । एवंलिखिते सत्यर्केन्द्वोर्बिम्बद्वये चन्द्रबिम्बतो बहिर्भूतोऽर्कबिम्बभागो भूपृष्ठावस्थितैर्द्रष्टुं शक्यः । तदन्तर्गतः पुनः तद्भागो नैव दृश्यः । चन्द्रबिम्बेन ग्रस्तत्वादसितत्वादिति ।

व्याख्या—1. C. तत्र 2. C. बिम्ब

3. B. मध्यग्रहणकालतः

चन्द्रबिम्बाद् बहिर्भूतो भागो दृश्योऽर्कमण्डले ।
तदन्तर्गतभागस्तु ग्रस्तस्तेनासितः सदा ॥ ६३ ॥

[इति तन्त्रसंग्रहे रविग्रहणप्रकरणं नाम
पञ्चमोऽध्यायः ॥]

सर्वेत्यनेनैवं[1]क्रियमाणस्य परिलेखनस्य दृक्सम्पर्कादौचित्यं दर्शितम् । तस्मादनेनैव प्रकारेण ग्रहणसदसद्भावेष्टग्रासादिकं[2] सर्वं निर्णीय वक्तव्यमिति[3] ॥ ५७-६३ ॥

इति तन्त्रसंग्रहस्य क्रियाकलापं क्रमेण संगृह्य ।
रचिते तद्व्याख्याने पूर्णोऽभूत् पञ्चमोऽध्यायः ॥

[इति तन्त्रसंग्रहे रविग्रहणप्रकरणं नाम
पञ्चमोऽध्यायः ॥[4]]

व्याख्या—1. A. B. Hapl. om. नेनैवं to नेनैव, next line.

2. A. B. भावेषु ग्रासादिकं

3. A. adds सूचितम्

4. A. actually reads : इति तन्त्रसंग्रहे पञ्चमोऽध्यायः सम्पूर्णः । B. C. omit this colophon.

अथ षष्ठोऽध्यायः

व्यतीपातप्रकरणम्

[व्यतीपातसम्भवः]

अर्केन्द्वोर्हीयते चैका यदान्या वर्धते क्रमात् ।
क्रान्तिज्ययोस्तदा साम्ये व्यतीपातो न चान्यथा ॥ १ ॥

वैधृतोऽयनसाम्ये स्यात् लाटः स्यादेकगोलयोः ॥ २a ॥

[व्यतीपातसम्भवः]

एवं रवीन्द्वोर्ग्रहणद्वयं दृग्गोलविषयं स्पष्टतरं प्रदर्शितम् । इदानीं भगोलविषयं तयोरेव क्रान्तिसाम्यजनितं व्यतीपातं प्रदर्शयितुमाह— [**अर्केन्द्वोरिति** ।]

तत्र **यदार्केन्द्वोरेकतरस्य** इष्टक्रान्तिज्या युग्मपदोद्भूतत्वात् क्रमेण **हीयते,** तदितरस्य ओजपदोद्भूतत्वाद् **वर्धते च,** तत्र तथा क्रमेण क्षीयमाणाया वर्धमानायाश्च क्रान्ते[1]र्यदा मिथः साम्यं[2] स्यात् तदा **व्यतीपातो** नाम दोषः सम्भवति । स पुनरयनान्ततो गोलान्ततश्च तुल्यान्तरितयोरोजयुग्मतया भिन्नपदावस्थितयोरर्केन्द्वोर्बोद्धव्यः । **न** पुनरेकपदावस्थितत्वात् । क्रान्तिज्ययोर्युगपद् वृद्धौ क्षये वा क्रान्तिज्ययोः साम्याभावे[3] वा तस्याभावादिति ।

तत्राप्येकायनगतयोर्गोलभेदे **वैधृताख्यो** व्यतीपातः, **एकगोलगतयो**रयनभेदे लाटाख्यो व्यतीपात इति । उक्तरूपं क्रान्तिसाम्यमेव तयोः सामान्यलक्षणम् । विशेषलक्षणं पुनरयनैक्यं गोलैक्यं चेति ॥ १-२a ॥

व्याख्या—1. C. 1-8·10 क्रान्त्योः 2. C. साम्यः
3. C. 1-8·10 साम्यभावे

[अर्केन्द्वोरिष्टक्रान्तिः]

संस्कृतायनसूर्येन्द्वोः क्रान्तिज्ये पूर्ववन्नयेत् ॥ २b ॥

[चन्द्रस्येष्टक्रान्तौ विशेषः]

पातोनेन्दोर्भुजाजीवा परमक्षेपताडिता ।
त्रिज्याभक्ता विधोः क्षेपः तत्कोटिमपि चानयेत् ॥ ३ ॥

परमापक्रमकोट्या विक्षेपज्यां निहत्य तत्कोट्या ।
इष्टक्रान्तिं चोभे त्रिज्याप्ते योगविरहयोग्ये स्तः ॥ ४ ॥

सदिशोः संयुतिरनयोर्वियुतिर्विदिशोरपक्रमः स्पष्टः ।
स्पष्टापक्रमकोटिर्द्युज्या[1] विक्षेपमण्डले वसताम्[2] ॥ ५ ॥

[अर्केन्द्वोरिष्टक्रान्तिः]

अथार्केन्द्वोरिष्टक्रान्त्यानयनायाह— [संस्कृतायनेति ।]

तत्र सूर्येन्द्वोरिष्टकालसायनस्फुटाद् दोर्ज्यामानीय चतुर्विंशतिभागज्यया निहत्य त्रिज्यया विभज्य[1] लब्धे तयोरिष्टक्रान्तिज्ये स्यातामिति ॥ २b ॥

[चन्द्रस्येष्टक्रान्तौ विशेषः]

तत्र रवेरित्थमानीतैव स्फुटक्रान्तिज्या । चन्द्रस्य पुनर्विक्षेपसंस्कृताया[2] एव[3] स्फुटत्वात् तदानयनायाह— [पातोनेन्दोरिति ।]

तत्र पातहीनात् स्फुटेन्द्वोर्दोर्ज्यां[4] गृहीत्वा परमविक्षेपेण निहत्य त्रिज्यया विभज्य लब्धो विधोरिष्टविक्षेपः । तद्वर्गं त्रिज्यावर्गतो विशोध्य शिष्टस्य[5] मूलं विक्षेपकोटिरिति । अथ परमापक्रमस्य चतुर्विंशतिभागज्यया कोट्या विधोरिष्टविक्षेपज्यां निहत्य तस्येष्टविक्षेपस्य कोट्या तस्येष्टक्रान्तिज्यां च निहत्य तयोर्घातयोः[6] समदिशोर्योगं भिन्नदिशोरन्तरं च कृत्वा

मूलम्— 1. A. B. C_9 द्युज्या   2. C. वसतामिति

व्याख्या—1. C. विभजेत् तत्र   2. C. $_{1-8\cdot10}$ संस्कृतायां

3. C. $_{1-8\cdot10}$ add तस्य   4. C. adds गृहीत्वा

5. A. शेषस्य   6. A. Hapl. om. of घातयोः

इत्युक्तात्र स्फुटा क्रान्तिर्ग्राह्यतां गोलवित्तमैः ॥ ६a ॥

[चन्द्रस्येष्टक्रान्तौ प्रकारान्तरम्]

अथवा क्रान्तिरानेया परक्रान्त्या[1] विधोरपि ॥ ६b ॥

24
परमक्षेपकोटिघ्नं जिनभागगुणं हरेत् ।
त्रिज्यया, क्षेपवृत्तस्य[2] नाभ्युच्छ्रय[3] इहाप्यते ॥ ७ ॥

पातस्य सायनस्याथ दोःकोटिज्ये उभे हते ।
क्षिप्त्या परमया त्रिज्याभक्ते स्यातां च तत्फले ॥ ८ ॥

अन्त्यद्युज्याहतं तत्र कोटिजं त्रिज्यया हरेत् ।

त्रिज्यया विभजेत् । तत्र लब्धा विधोरिष्टापक्रमज्या स्फुटा भवति । तस्या वर्गं त्रिज्यावर्गतो विशोध्य शिष्टस्य मूलं **विक्षेपमण्डले वसतां इष्टद्युज्या च** स्यादिति प्रसङ्गादुक्तम् । **इत्युक्त**प्रकारेण समानीतैव **स्फुटक्रान्तिः** दृग्गोलविषये व्यतीपातादौ **गोलवित्तमैर्ग्राह्या**मिति ॥ ४-६a ॥

[चन्द्रस्येष्टक्रान्तौ प्रकारान्तरम्]

अथ प्रकारान्तरेण तस्यैव स्फुटक्रान्त्यानयनायाह— [**अथवा क्रान्तिरिति** ।]

अथवा विधोरिष्टक्रान्तिस्तस्यैव [1]परमक्रान्त्या नीयताम् । यथा[2]—चतुर्विंशतिभागज्यां **परमविक्षेपस्य** व्योमतारा(270′)प्रमितस्य कोट्या निहत्य **त्रिज्यया** विभजेत् । तत्र लब्धः परमविक्षेपव्यासार्ध[3]वृत्तस्य राशिकूटद्वय-प्रतिबद्धसूत्रकेन्द्रस्य **नाभ्युच्छ्रयो** नाम ।

अथ **सायनपातस्य दोःकोटिज्ये उभे** समानीय परमविक्षेपेण निहत्य त्रिज्यया विभजेत् । [4]तत्र लब्धे दोःकोटिफले **स्याताम्** । तयोः **कोटिफलं**

मूलम्— 1. C. $_{1-8}$ स्फुटक्रान्त्या 2. C. $_{1-5,7}$ वृतेऽस्य
3. C. $_{1-6}$ नाड्युच्छ्रय

व्याख्या—1. A. परक्रान्त्या 2. C. तत्प्रकारस्तु for यथा
3. C. व्यासार्धस्य
4. A. B. Hapl. om. from तत्र लब्धे to तत्र, next line.

नाभ्युत्सेधे च तत्स्वर्णं मृगकर्क्यादिपातजम् ॥ ९ ॥

तद्बाहुफलवर्गैक्यमूलं क्रान्तिः परा विधोः ।

त्रिज्याघ्नं दोःफलं भक्तं तया चलनमायनम् ॥ १० ॥

जूकक्रियादिगे पाते स्वर्णं तत् सायने विधौ ।

तद्बाहुज्या हता क्रान्त्या तदा परमया स्वया ॥ ११ ॥

त्रिज्याप्तापक्रमज्येन्दोः स्फुटा तात्कालिकी भवेत् ॥ १२a ॥

[व्यतीपातस्य सदसद्भावः]

संस्कृतक्षेपचलनसायनेन्दो रवेः पदात् ॥ १२b ॥

अन्त्यद्युज्यया निहत्य त्रिज्यया विभजेत् । तत्र लब्धं फलं तत्क्षेपवृत्तस्य नाभ्युच्छ्र्ये पूर्वानीते सायनपातस्य मृगकर्क्यादिवशाद्धनमृणं वा कुर्यात् । एवंकृतस्य तन्नाभ्युच्छ्र्यस्य दोःफलस्य च[1] वर्गयोगमूलं विधोः परमक्रान्तिर्नाम ।

ततः पूर्वानीतं दोःफलं त्रिज्यया निहत्य[2] तया परमक्रान्त्या विभजेत् । तत्र लब्धं विधोरयनचलनं नाम । तत्पुनर्विक्षेपेणानीतत्वात् विक्षेपचलनमिति चोच्यते । तदिदं सायनपातस्य जूकक्रियादिवशात् सायनचन्द्रे धनमृणं च कर्तव्यम् । [3]ततः प्रागुक्तेनेदमानीतेन चायनचलनेन संस्कृतात् [4]स्फुटेन्दोर्दोर्ज्यामानीय तदानीं नीतया[5] स्वया परमक्रान्त्या निहत्य त्रिज्यया विभजेत् । तत्र लब्धा चन्द्रस्येष्टक्रान्तिः स्फुटा स्यादिति ॥ ६-१२a ॥

[व्यतीपातस्य सदसद्भावः]

एवं [6]रवीन्द्वोरिष्टक्रान्त्यानयनं प्रदर्श्य इदानीं तयोः साम्ये व्यतीपातसदसद्भावनियमं दर्शयति — [संस्कृतक्षेपचलनेति ।]

मूलम् — 1. C. पक्रमज्येन्द्वोः

व्याख्या — 1. C. कृतस्य नाभ्युच्छ्र्यस्य तद्दोःफलस्य च

2. A. om. निहत्य

3. C_{1-9} अथ तत्संस्कृतात्

4. C. सायनेन्द्वोः

5. C. तदानीमानीतया

6. B. रवीन्दोरिष्ट; C. रवेरिन्दोरपि इष्ट

ओजयुग्मतया भेदे व्यतीपातो, न चान्यथा ॥ १३a ॥

[व्यतीपाताभावस्थानम्]

अर्केन्द्वोः परमक्रान्त्योरल्पा त्रिज्याहतान्यया ॥ १३b ॥
भक्ता, ततोऽधिके बाहौ महाक्रान्तेर्न तुल्यता[1] ।
तच्चापं भत्रयाच्छोध्यं तदाढ्यो नायनान्तयोः[2] ॥ १४ ॥
अन्तरालं गते तस्मिन् क्रान्त्योः साम्यं न जायते ॥ १५a ॥

उक्तरूपेण विक्षेपचलनेन अयनचलनेन च संस्कृतस्फुटेन्दुर्यदा सायनार्कादोजयुग्मतया भिन्नपदोऽवतिष्ठते, तत्रैव क्रान्तिसाम्ये व्यतीपातो भवति । न पुनरन्यत्रापीति । अतएव उक्तं—

क्रान्तिसाम्ये व्यतीपातो भवेद् भिन्नपदस्थयोः ।
नाभिन्नपदयोरर्कचन्द्रयोर्नाप्यतुल्ययोः ॥

इति ॥ १२b-१३a ॥

[व्यतीपाताभावस्थानम्]

एवं भिन्नपदावस्थितयोरर्कचन्द्रयोः क्रान्तिसाम्याद् व्यतीपातं प्रदर्श्य 'न चान्यथा' इति दर्शितं तदभावस्थानं विवरीतुमाह— [अर्केन्द्वोरिति ।]

अर्केन्द्वोः परमक्रान्त्योरल्पीयसीं परमक्रान्तिं त्रिज्यया निहत्य महत्या परमक्रान्त्या विभजेत् । तत्र लब्धफलात्[1] महापरम[2]क्रान्तिसम्बन्धिन्यां दोर्ज्यायामधिकायां सत्यां इष्टक्रान्त्योस्तुल्यता न स्यात् । तत् पुनः कियदवधिकमिति चेत् तथानीतं फलं चापीकृत्य राशित्रयाद्विशोध्य [3]यच्छिष्यते तद् द्वयोरयनान्तयो[4] राशित्रयराशिनवात्मकयोः पृथक् प्रत्येकं[5] प्रक्षिपेद् विशोधयेच्च । [6]ततस्तथाकृतयोस्तयोरन्तरालंगते तस्मिन् अल्पेतरपरमक्रान्तौ सति क्रान्त्योः साम्यं नैव सम्भवति । तस्येष्टक्रान्तेस्तदितरपरक्रान्तितोऽप्यधिकत्वादिति ॥ १३b-१५a ॥

मूलम्— 1. C. तुल्यया 2. B. $C_{1-8\cdot10}$ नायनं तयोः

व्याख्या—1. C. फलतो 2. C. om. परम
3. $C_{1-8\cdot10}$ शिष्टं द्वयो 4. C. द्वयोरप्ययनान्तयो
5. C. om. प्रत्येकं 6. C. om. ततः

[व्यतीपातसद्भावस्थानम्]

दोर्ज्यां रवेः परक्रान्त्या[1] हत्वा चान्द्र्या तया हरेत् ॥ १५b ॥
लब्धचापसमे चन्द्रबाहौ क्रान्तिगुणौ समौ ।
चन्द्रस्यौजपदस्थस्य दोर्धनुष्यधिके ततः ॥ १६ ॥
व्यतीपातो गतो, न्यूने भावी, युग्मपदेऽन्यथा ।
तदिष्टचन्द्रधनुषो स्वस्वभुक्तिघ्नमन्तरम् ॥ १७ ॥
गतियोगहृतं स्वर्णं दोषे गम्ये गतेऽपि च ।
सूर्येन्द्वोरन्यथा पाते तावत् कुर्यादिदं मुहुः ॥ १८ ॥

[व्यतीपातसद्भावस्थानम्]

यद्येवं क्वैतत्[1] सम्भवतीत्याह— [दोर्ज्यां रवेरिति ।]

सायनरवेर्दोर्ज्यां स्वकीयपरमापक्रमेण निहत्य चान्द्र्या परमक्रान्त्या[2] विभजेत् । तत्र लब्धस्य चापेन तुल्ये तत्कालचन्द्रस्य बाहुचापे सति चन्द्रार्कयोरुक्तवदानीतौ क्रान्तिगुणौ तुल्यौ स्याताम् । अतस्तत्रैव व्यतीपातोऽपि भवति इत्यर्थः[3] । यदा पुनरोजपदावस्थितस्य चन्द्रस्य भुजाचापमिदानीमानीतफलादधिकं स्यात् तदा व्यतीपातो गतोऽतिक्रान्तः स्यात्[4] । ऊने पुनः तस्मिन् भावी व्यतीपातः । युग्मपदावस्थिते[5] चन्द्रे विपरीतं, स्वभुजाचापेधिके[6] भावी, न्यूने[7] गत इति ।

तस्मादेवमानीतफलचापस्य तदानीमयनचलनद्वितयसंस्कृतचन्द्रचापस्य[8] चान्तरं पृथग् अर्कचन्द्रयोर्गतिकलाभिर्निहत्य तयोर्गतियोगकलाभिर्विभजेत् । तत्र लब्धफलं[9] व्यतीपातस्य गतगन्तव्यत्ववशात् सूर्येन्द्वोः ऋणं धनं च कुर्यात् । पाते त्वन्यथा, विलोमगतित्वात् तस्य । इदं कर्म तावत् कुर्याद्

मूलम्— 1. B. परमक्रान्त्या

व्याख्या—1. C. क्व पुनरेतत्
2. A. चन्द्रपरमक्रान्त्या
3. C. om. इत्यर्थः
4. C. गतः भूत इत्यर्थः
5. C. adds पुनः
6. $C_{1-6\cdot 8}$ चापाधिकः
7. C. ऊने
8. C_{1-8} चलनमितस्य संस्कृत; C_{9-10} चलनद्वितयस्य संस्कृ..
9. C. लब्धं फलं

यावदर्कोत्थधनुषा तत्कालेन्दुधनुः समम् ॥ १९a ॥

[व्यतीपातमध्यः]

क्रान्तिसाम्ये व्यतीपातमध्यकालः सुदारुणः[1] ॥ १९b ॥

यावदर्कदोर्ज्योत्पन्नचन्द्रधनुषा तत्कालेन्दुधनुषस्तुल्यत्वं स्यात्[1] । तदर्थं एवं-कृतादर्कात् पुनरपि दोर्ज्यामानीय स्वकीयपरमक्रान्त्या निहत्य चान्द्रया परमक्रान्त्या विभज्य लब्धस्य यच्चापं [2]तस्य सकृत्संस्कृततत्फलप्रागानीतायनचलनद्वितयसंस्कृतचन्द्रभुजाचापस्य चान्तरं कलीकृत्य[3] स्वस्वगतिकलाभिर्निहत्यार्केन्द्वोर्गतियोगकलाभिर्विभजेत् । तत्र लब्धं फलमपि प्राचीनेषु तत्संस्कृततत्फलेषु चन्द्रार्कपातेषु पूर्ववत्[4] कुर्यात् । एवं तावद्यावदर्कोत्थेन्दुचापेन तत्कालचन्द्रचापं तुल्यं भवेत् । तत्र क्रान्त्योस्साम्योपलम्भाद् व्यतीपातोऽपि विज्ञेय इति ॥ १५b-१९a ॥

[व्यतीपातमध्यः]

कथं[5] क्रान्तिसाम्येन तत्परिज्ञानमित्यत आह— [क्रान्तिसाम्येति ।]

इत्थमानीतयोः क्रान्तिज्ययोस्तुल्यत्वे व्यतीपातस्य मध्यकालो विज्ञातव्यः । मध्यकाल इत्यनेन तत्पूर्वापरकालानुबन्धितया कियन्तश्चित्[6]कालमवस्थानं सूचितम् । यदुक्तं सूर्यसिद्धान्ते—

आद्यन्तकालयोर्मध्ये व्यतीपातोऽतिदारुणः[7] ।
प्रज्वलज्ज्वलनाकारः सर्वकर्मबहिष्कृतः ॥

इति ।

यथा[8]—

बिम्बनेम्योर्बहिर्भावः [9]तयोस्तत्सूत्रतो यदा ।
तावत्कालं विजानीयाद् व्यतीपातमवस्थितम् ॥

इति ॥ १९b ॥

मूलम्— 1. A. B. स दारुणः

व्याख्या—1. $C_{1-8\cdot10}$ तत्कालेन्दोर्भुजाधनुः समं भवति

2. C. तस्य प्राचीनायनचलन
3. C. च विश्लेषकला।
4. C. प्राग्वत्
5. A. अथ कथं
6. C. किञ्चित्
7. C. पातः सुदारुणः
8. C. तथा
9. C. om. तयोः

[व्यतीपातप्रारम्भः पर्यवसानं च]

5/9 25

नवांशपञ्चकं तत्त्वभागौ बिम्बौ स्वभुक्तितः ।
सूर्येन्द्वोर्बिम्बसम्पर्कदलं षष्ट्या निहत्य यत् ॥ २० ॥

गतियोगोद्धृतं तद्धि व्यतीपातदलं विदुः ।
व्यतीपातदले तस्मिन् नाडिकादौ विशोधिते ॥ २१ ॥

मध्यकालाद् भवेत् तस्य प्रारम्भसमयः स्फुटः[1] ।
तद्युते मध्यकालेऽस्य मोक्षो वाच्यो हि धीमता ॥ २२ ॥

[व्यतीपातप्रारम्भः पर्यवसानं च]

अथ अर्केन्द्वोर्भगोलगतलिप्ताव्यासाभ्यां व्यतीपातदलानयनपुरस्सरं तस्यैव प्रारम्भपर्यवसानकालौ दर्शयति— [**नवांशेति** ।]

तत्र तावद् रवेः स्फुटभुक्तिकलाः पञ्चभिर्निहत्य नवभिर्विभजेत् । तत्र लब्धास्तस्यैव बिम्बकला । भवन्ति । इन्दोः पुनः [1]गतिकलाभ्यः पञ्चविंशत्या विभज्य लब्धा बिम्बफलाः । तथानीतयोस्तद्बिम्बयोः सम्पर्कदलं **षष्ट्या निहत्य** तयोर्गतियोगेन विभजेत् । तत्र लब्धं नाडिकादिकं[2] **व्यतीपातदलं** नाम । तेन द्विगुणितेन तुल्यो व्यतीपातस्य कृत्स्नः[3] कालः । **तस्मिन् व्यतीपातदले** तन्मध्यकालतो[4] **विशोधिते** तस्य **प्रारम्भसमयः स्फुटो** भवति । पुनस्तेनैव संयुक्ते तस्मिन् **मोक्षो**ऽपि **वाच्यः** । **धीमते**त्यनेनैवमेव व्यतीपातविज्ञानं[5] युक्ततममिति दर्शितम्[6] ॥ २०-२२ ॥

मूलम्— 1. समयस्फुटः

व्याख्या—1. C. स्फुटगति 2. B. लब्धनाडिकादिकं

3. B. कृत्स्नं

4. B. मध्यकाले 5. C. व्यतीपातकालविज्ञानं

6. C. adds : **बिम्बौ स्वभुक्तितः** इत्यत्र स्फुटभुक्तिर्विवक्षिता । **गतियोगोद्धृतं** तद्धीत्यत्र गतियोगशब्देन क्रान्तिगतियोगो विवक्षित इति युक्तिवशात् सिध्यति । सूर्यस्य पूर्वापरदिनोत्थयोः क्रान्तिचापयोर्यदन्तरं तदत्र सूर्यगतिर्भवति । चन्द्रस्य पूर्वापरदिनोत्थयोः क्रान्तिचापयोर्यदन्तरं तदत्र चन्द्रगतिर्भवति । तयोर्योगोऽत्र **गतियोग** इत्युच्यते ।

[विष्कम्भादियोगान्त्यार्धानां त्याज्यत्वम्]

विष्कम्भादिषु योगेषु व्यतीपाताह्वयोऽपि यः ।
तस्य सप्तदशस्यान्त्यमर्धं चाप्यतिदारुणम् ॥ २३ ॥

[व्यतीपातत्रयाणां त्याज्यत्वम्]

व्यतीपातत्रयं घोरं सर्वकर्मसु गर्हितम् ।
स्नानदानजपश्राद्धव्रतहोमादिकर्मसु ।
प्राप्यते सुमहच्छ्रेयः तत्कालज्ञानतस्ततः ॥ २४ ॥

[इति तन्त्रसंग्रहे व्यतीपातप्रकरणम् नाम
षष्ठोऽध्यायः ॥]

[विष्कम्भादियोगान्त्यार्धानां त्याज्यत्वम्]

न केवलमनयोरेव लाटवैधृतयोः स्वयं व्यतीपतनात्[1] तज्जनकत्वाद्वा दारुणतरत्वं,[2] अपि तु विष्कम्भादिषु, [3]सप्तदशयोगस्यान्त्यार्धस्यापीत्याह— [**विष्कम्भादिष्विति ।**] यदुक्तम्[4]—

सूर्येन्दुयोगे मैत्रस्य परार्धं सम्भवेद् यदि ।
सार्पमस्तकसंज्ञः स्यात् तदा दोषोऽतिनिन्दितः ॥

इति ॥ २३ ॥

[लाट-वैधृत-सार्पमस्तकानां त्याज्यत्वम्]

उक्तरूपं व्यतीपातत्रयं सर्वकर्मसु त्याज्यमेवेत्याह—[**व्यतीपातत्रयेति ।**]

एतद् **व्यतीपातत्रयं** घोररूपं यतस्ततः तस्मिन् यदि **स्नानदानादिकं** क्रियेत तदा अतिमहद् **श्रेयः** प्राप्येतापीति[5] ॥ २४ ॥

इति तन्त्रसंग्रहस्य क्रियाकलापं क्रमेण संगृह्य ।
रचिते तद्व्याख्याने षष्ठोऽध्यायः प्रपूर्णोऽभूत् ॥

॥ इति तन्त्रसंग्रहे सव्याख्याने षष्ठोऽध्यायः[6] ॥

व्याख्या—1. C. पातमात्　　2. C. जनकत्वादुरुतरत्वम्
3. B. C. सप्तदशस्य योगस्य　　4. C. तदुक्तं
5. C. reads : उक्तरूपं लाटवैधृतसार्पमस्तकाख्यं **व्यतीपातत्रय**मेतद् **घोर-रूपं** यतः, अतः **सर्वकर्मसु गर्हित**मेव । यदि पुनस्तस्मिन् **स्नानदानजपश्राद्ध-व्रतहोमादिकर्म** क्रियेत तत् **सुमहच्** **श्रेयः** **प्राप्येत** इति ।
6. B. C. om. this colophon.

अथ सप्तमोऽध्यायः

दृक्कर्मप्रकरणम्

[दृक्कर्मद्वयम्—आक्षं आयनं च]

विषुवद्भाघ्नविक्षेपाद् द्वादशाप्तं विधोः स्फुटात् ।
उदये सौम्यविक्षेपे शोध्यमस्तमये धनम् ॥ १ ॥

व्यस्तं तद् याम्यविक्षेपे, न मध्यस्थे विधाविदम् ।
सत्रिभग्रहजक्रान्तिभागघ्नाः क्षेपलिप्तकाः ॥ २ ॥

विकलाः स्वमृणं क्रान्तिक्षेपयोर्भिन्नतुल्ययोः ।
एवंकृतो ग्रहो लग्नं स्वोदये भवति स्फुटम् ॥ ३ ॥

[दृक्कर्मद्वयम्—आक्षं आयनं च]

एवं व्यतीपातस्वरूपं विस्तरतः प्रदर्शितम् । इदानीं चन्द्रादीनामर्कतो विप्रकर्षवशाद् दृश्यादृश्यविभागस्य दृक्कर्मद्वयसापेक्षत्वात् तत्प्रदर्शनायाह—
[विषुवद्भेति ।]

तत्र चन्द्रस्य विक्षेपानयनं पूर्वमेव प्रदर्शितम्—

पातोनेन्दोर्भुजाजीवा[1] व्योमताराहता हृता ।
त्रिज्यया सौम्ययाम्येन्दोः ॥

(तन्त्रसंग्रहः, ४.२७a-२८a)

इति ।

ततश्चन्द्रस्येष्टविक्षेपं स्वदेशविषुवच्छायाङ्गुलैर्निहत्य द्वादशभिर्विभजेत् । तत्र लब्धमुदये सौम्यविक्षेपे सायनात् स्फुटेन्दोर्विशोधयेत्, अस्तमये पुनस्तस्मिन् प्रक्षिपेत् । याम्यविक्षेपे पुनस्तद् व्यस्तम् उदये सायनस्फुटेन्दौ प्रक्षिपेत्, अस्तमये ततो विशोधयेदिति । खमध्यस्थे विधौ पुनः इदं कर्म न[2] कर्तव्यम् । एतदाक्षं दृक्कर्मेति ।

व्याख्या—1. A. om. जीवा 2. A. B. $C_{1-8\cdot10}$ om. न

स्वास्तेऽस्तलग्नमेवं स्यान्मध्यलग्नं खमध्यगे ॥ ४a ॥

[ग्रहाणां इष्टविक्षेपः]

मन्दस्फुटात् स्वपातोनात् भौमादीनां भुजागुणात् ॥ ४b ॥

परमक्षेपनिघ्ना स्यात् क्षेपोऽन्त्यश्रवणोद्धृतः ।

4　2　8　6　10　10

कृत-नेत्र-भुजङ्गा-ङ्गा दिशो दश-गुणाः क्रमात् ॥ ५ ॥

अथ राशित्रयसहितात् तत्कालसायनेन्दोः [1]क्रान्तिचापमानीय ततः षष्ट्या विभज्य लब्धाः क्रान्तिभागाः । तद्गुणिता इष्टविक्षेपकला एव दर्शनसंस्कारविकलाः । ताश्च राशित्रयसहितग्रहक्रान्तेः[2] केवलोत्पन्नविक्षेपस्य च गोलभेदे ग्रहे प्रक्षिपेत् । तुल्यगोलत्वे ततो विशोधयेत् । एतदायनं दृक्कर्म इति ।

[3]तद्दृक्कर्मफलद्वयसंस्कृतो ग्रहः तदानीमुदयलग्नं, **स्वास्ते** पुन-**रस्तलग्नं, खमध्यगे मध्यलग्नम्** । [4]किन्तु मध्यलग्नेऽस्मिन् आयनमेव दृक्कर्मफलं कर्तव्यम् । न पुनराक्षमपोति ॥ १-४a ॥

[ग्रहाणां इष्टविक्षेपः]

अथ कुजादीनामिष्टविक्षेपानयनायाह— [**मन्दस्फुटादिति** ।]

तत्र **भौमादीनां** पञ्चानां **स्वमन्दस्फुटतः** पातभागान् विशोध्य शिष्टतो गोलद्वयमवधार्य दोर्ज्यामानीय परमविक्षेपकलाभिर्निहत्य अन्त्यश्रवणेन शीघ्र[5]कर्णेन विभजेत् । तत्र लब्ध इष्टविक्षेपः । अत्र मन्दस्फुट-शब्देन कृत्स्नमन्दफलसंस्कृतस्फुटमध्यम उच्यते । शीघ्रकर्णश्चान्त्यस्फुट-कर्मण्यानीतः । अत एवोक्तं **अन्त्यश्रवणोद्धृत** इति । भौमादीनां पञ्चानां **पातभागाः कृत-नेत्र-भुजङ्गा-ङ्ग-दिशो दश-गुणिताः** । तत्र[6] कुजस्य चत्वारिंशद् भागाः । बुधस्य विंशतिः । गुरोरशीतिः । शुक्रस्य षष्टिः । मन्दस्य

व्याख्या—1. B. क्रियाचाप　2. C_{10} क्रान्तौ
3. C. om. तद्　4. C. कृतमध्यलग्ने
5. C. स्वशीघ्र　6. C. om. तत्र

पातभागाः कुजादीनाम्, अथ विक्षेपलिप्तिकाः ।
9 12 6 12 12 10
नवा-र्क-र्त्व-र्क-रवयो दशघ्नाः परमाः क्रमात् ॥ ६ ॥

[ग्रहाणां दृक्कर्म]

विक्षेपाच्छशिवत् कार्ये तेषां दृक्कर्मणी उभे ॥ ७ ॥

[दृक्कर्मणि प्रकारान्तरम्]

विक्षेपदृक्क्षेपवधे त्रिमौर्व्या निहत्य तत्कोटिवधेन भक्ते ।
धनुर्धनर्णं हरिदैक्यभेदात् तयोः शशाङ्काद्युदये[1]ऽन्यथास्ते ॥ ८ ॥

शतमिति । तेषां परमविक्षेपलिप्ताः नवा-र्क-र्त्व-र्क-रवयो दश-गुणिताः । तत्र कुजस्य नवतिः । बुधस्य विंशत्यधिकं शतम् । गुरोः षष्टिः । शुक्रशनैश्चरयो-र्विंशत्यधिकं शतमिति । अत्र विक्षेपस्वरूपं प्रति यद्वक्तव्यं तन्मयैव एतद्व्याख्यायां युक्तिदीपिकायां प्रपञ्चितमिति तत एवावधार्यम् ॥ ४b-६ ॥

[ग्रहाणां दृक्कर्म]

अथ तेषामपि इष्टविक्षेपतो दृक्कर्मयुगलं शशिवदेव कर्तव्यमित्याह—
[विक्षेपादिति ।]

कुजादीनां मन्दस्फुटादानीतं इष्टविक्षेपं विषुवच्छायाङ्गुलैर्निहत्य द्वादशभिर्विभज्य लब्धं आक्षं दृक्कर्मफलं सौम्यविक्षेपे ग्रहस्योदये ततः शोध्यं, अस्तमये क्षेप्यम् । याम्यविक्षेपे विपरीतम् । अथ सायनस्फुटग्रहाद् राशित्रयसहिताद् भुजायाः क्रान्तिभागानानीय तद्गुणिता विक्षेपकला एवायनं दृक्कर्मफलं विकलात्मकम् । तत् सत्रिभग्रहस्य विक्षेपस्य च गोलभेदे धनं, गोलसाम्ये तु ऋणम् । एवंकृतो ग्रहः स्वोदये उदयलग्नं, अस्तमये चास्तलग्नम् । खमध्यगे पुनरायनेनैव दृक्कर्मणा संस्कृतस्फुटग्रहो मध्य-लग्नमिति ॥ ७ ॥

[दृक्कर्मणि प्रकारान्तरम्]

अथ दृक्कर्मण्येव प्रकारान्तरमाह[1]— [विक्षेपेति ।]

मूलम्—1. C. उदयो (wr.)

व्याख्या—1. C. दर्शयति for आह

एवं वा युगपत् कार्यं दृक्कर्मयुगलं स्फुटम् ॥ ९ ॥

[काललग्नम्, कालभागाश्च]

एवंकृतस्य चन्द्रादेः स्वोदयेऽस्तमयेऽपि वा ।
सायनस्य रवेश्चापि काललग्नं नयेद् द्वयोः ॥ १० ॥

तत्रोदयास्तमययोः सायनस्फुटग्रहस्य यो विक्षेपः, यश्च तदानीं काललग्नकोट्याः समानीतो दृक्क्षेपः, तयोः संवर्गात्[1] त्रिज्यया निहतात्[2] तयोर्विक्षेपदृक्क्षेपयोः [3]कोट्योर्घातेन विभजेत् । तत्र लब्धस्य यच्चापं तद्विक्षेपदृक्क्षेपयोस्तुल्यदिक्कत्वे सायनस्फुटग्रहे धनं कुर्यात्, भिन्नदिक्कत्वे पुनः ऋणं कुर्यात् । अस्तमये पुनरन्यथा, दिग्भेदे धनं दिक्साम्ये पुनः ऋणं इति । एवं[4]क्रियमाणमेव आक्षायनं दृक्कर्मयुगलं स्फुटमिति । अत्र दृक्फलसिद्धादेव [5]स्फुटग्रहाद् दृक्क्षेपानयनमुचितम् । तत एव च दृक्फलमित्यन्योन्याश्रयत्वात् अविशेषकर्मणैव स्फुटत्वं स्यादिति । तदुक्तम्—

स्यादेतद्यदि दृक्क्षेपस्सिद्धस्तात्कालिको भवेत् ।
नहि कालान्तरोत्पन्नः स लग्नापादनक्षमः ॥
[6]लग्नाधीनः स दृक्क्षेपस्तदधीनं च[7] दृक्फलम् ।
इत्यन्योन्याश्रयत्वं तदविशेषान्निरस्यते ॥

इति ॥ ८-९ ॥

[काललग्नम्, कालभागाश्च]

अथ दृक्कर्मयुगलसिद्धस्य ग्रहस्यार्कस्य च काललग्नानयनपूर्वकं दर्शनहेतून् तदन्तरालकालभागानुपदिशति— [एवंकृतस्येति ।]

उक्तवद् दृक्कर्मयुगलसंस्कृतस्य सायनस्फुटग्रहस्य उदयेऽस्तमये वा लग्नतां नीतस्य सायनार्कस्य च काललग्नमानयेत् । तत् पुनरुदयास्तलग्नयोश्चरप्राणकालान्तरसंस्कारादेव भवति । तयोः काललग्नयोरन्तरालोत्पन्नैर्द्वादशादिभिः कालभागैर्ग्रहा दृश्या भवन्ति । ततो न्यूनैर्न द्रष्टुं शक्यन्ते,

---

व्याख्या—1. C. सम्पर्कं
2. C. 8-10 निहृत्य 3. C. कोट्या
4. C. adds युगपत्‌ 5. C. स्फुटदृक्क्षेप
6. C. लग्नादीनसदृक्क्षेप 7. A. तदधीनश्च

तदन्तरभवैर्भागैः[1] दृश्यः स्याद् द्वादशादिभिः ।
न्यूनैः खेटो न दृश्यः स्याद् भानुरश्मिहतप्रभः ॥ ११ ॥

12 17 13 11 9 15
द्वादशा-त्यष्टयो विश्वे रुद्रा-ङ्क-तिथयः क्रमात् ।
चन्द्रादिकालभागास्तैर्दृश्या स्वार्कान्तरोद्भवैः ॥ १२ ॥

[ग्रहाणां उदयास्तमयदृश्यादृश्यता]

अस्तं यान्तीड्यशन्याराः पश्चात् प्रागुदयन्ति च ।
ज्ञशुक्रौ वक्रिणावेवमन्यथा शीघ्रगा रवेः ॥ १३ ॥

पश्चाच्चेद् षड्भयुक्तार्कग्रहयोरन्तरोद्भवैः ।
कालभागैरिह ज्ञेयं दृश्यत्वं वाप्यदर्शनम् ॥ १४ ॥

भानुरश्मिभिर्हतप्रभत्वात् । अधिकैः पुनः सुतरां द्रष्टुं शक्या इति । तत्र दृक्कर्मयुगलसंस्कृतश्चन्द्रः स्वस्यार्कस्य च काललग्नीकृतयोरन्तरालोत्पन्नैर्द्वादशभिर्भागैर्दृश्यो भवति । कुजः पुनरत्यष्टिभिः सप्तदशभिः,[1] बुधो विश्वैस्त्रयोदशभिः, जीवो रुद्रैरेकादशभिः, शुक्रोऽङ्कैर्नवभिः, मन्दस्तिथिभिः पञ्चदशभिः इति ॥ १०-१२ ॥

[ग्रहाणां उदयास्तमयदृश्यादृश्यता]

अथ ग्रहाणामुदयास्तमययोर्दृक्फल[2]संस्कारार्थं तद्विभागं दर्शयति—
[अस्तमिति ।]

अत्र ग्रहाणां रविबिम्बप्रवेशः ततो निर्गमश्चोदयास्तमयशब्दाभ्यामुच्यते । न पुनः प्राक्पश्चात् क्षितिजसंस्पर्शाविति । ततोऽर्कान्मन्दगतयः शनिगुरुकुजाः पश्चात् पश्चिमदिश्येवास्तं गच्छन्ति, प्राग्दिशि चोदयं गच्छन्ति । वक्रिणौ बुधशुक्रावप्येवमेव । अर्कतः शीघ्रगतयः पुनः क्रमगती बुधशुक्रौ चन्द्रश्च, अन्यथा पश्चादुदयं यान्ति, प्राग्दिश्यस्तं यान्ति च । तत्र प्राग्दिशि यथोक्तमेव । काललग्नीकृतयोर्ग्रहार्कयोरन्तरालोत्पन्नैः कालभागैः दृश्यादृश्यविभागः परिकल्पयितव्यः । पश्चिमदिशि पुनः षड्भयुक्तयोरेव ग्रहार्कयोरिति विभागः इति ॥ १३-१४ ॥

मूलम्—1. C, कालैः for भागैः

व्याख्या—1. A. om. सप्तदशभिः 2. C. दृक्कर्मफल

स्वारूढभांशलिप्ताद्यैः स्वस्वविक्षेपतोऽपि च ।

ज्योतिषामितरेषां च कालांशैर्नीयते स्वकैः ।

दर्शनादर्शने वाच्ये सम्यगेव परीक्षकैः ॥ १५ ॥

[इति तन्त्रसंग्रहे दृक्कर्मप्रकरणं नाम

सप्तमोऽध्यायः ॥]

एवमितरेषामपि ज्योतिषां दर्शनादर्शनविभाग इत्याह— [**स्वारूढेति ।**]

तत्र *यथा* चन्द्रादीनां भगोलावस्थितिरनियता,[1] तास्वारूढराश्यंशस्य विक्षेपस्य च प्रतिक्षणं विभिन्नत्वात् । न त्वेवमन्येषां **ज्योतिषां** सदैवाऽस्थिरत्वान्नियतरूपत्वादुभयोरिति । ततस्तेषामपि तद्द्वितयावगमपूर्वकं उक्तन्यायेन दृक्फलद्वयमानीय तत्संस्कृतस्य तस्यैव ज्योतिषः सायनार्कस्य च द्वयोः काललग्नानयनपूर्वकं नियतैस्तदन्तरालोत्पन्नैः कालभागैः **दर्शनादर्शने** वक्तव्ये इति । अत्र ज्योतिषां स्वबिम्बमहत्त्वाल्पवशात् कालांशनियम इति ॥ १५ ॥

इति तन्त्रसंग्रहस्य क्रियाकलापं क्रमेण संगृह्य ।

रचिते तद्व्याख्याने पूर्णोऽभूत् सप्तमोऽध्यायः ॥

॥ इति तन्त्रसंग्रहे सव्याख्याने

सप्तमोऽध्यायः[2] ॥

व्याख्या—1. C. स्थितीरानीय (wr.)

2. A. adds : समाप्तः । शम् । B. C. om. the colophon.

अथ अष्टमोऽध्यायः

शृङ्गोन्नतिप्रकरणम्

[चन्द्रस्य द्वितीयस्फुटः]

व्यर्केन्दुबाहुकोटिज्ये हतेऽपीन्दूच्चभास्वतः ।
कोट्यर्धेन त्रिजीवाप्तदशघ्नेन्दुकलाश्रुतौ ॥ १ ॥

अयनैक्ये च भेदे च स्वर्णं कोटिजमेतयोः ।
तद्बाहुफलवर्गैक्यमूलमिन्दुधरान्तरम् ॥ २ ॥

[चन्द्रस्य द्वितीयस्फुटः]

एवं ग्रहाणां भगोलविषयं दृक्कर्मयुगलं स्फुटतरं प्रदर्शितम् । इदानीं चन्द्रस्यैव सितमानशृङ्गोन्नत्यादिकं प्रदर्शयितुमाह— [**व्यर्केन्दुबाहुरिति ।**]

तत्र [1]स्फुटार्कोनस्फुटेन्दोः दोःकोटिज्ये उभे समानीय चन्द्रोच्चविरहित-स्फुटार्ककोटिज्यार्धेन निहत्य त्रिज्यया विभजेत् । तत्र लब्धे दोःकोटिफले स्याताम् । तत्र कोटिफलं दशगुणिते चन्द्रस्फुटकलाकर्णे कुर्यात् । स्फुटार्कोन-स्फुटचन्द्रस्य चन्द्रोच्चोनस्फुटार्कस्य च अयनैक्ये धनं कुर्यात् । अयनभेदे पुनः ऋणं कुर्यात् । एवं तत्कोटिफलसंस्कृतस्य दशगुणितचन्द्रमन्दस्फुटकर्णस्य तद्बाहुफलस्य च वर्गयोगमूलं इन्दुधरयोरन्तरं योजनात्मकं द्वितीयस्फुटकर्ण इत्यर्थः ।

ततो बाहुफलं त्रिज्यया निहत्य तेन कर्णेन विभजेत् । तत्र लब्धं विधोः स्फुटे कुर्यात् । तद्यथा—शुक्लपक्षे चन्द्रोच्चोनस्फुटार्के कर्क्यादिगते विधु-स्फुटे धनं कुर्यात्, शुक्लस्य एव चन्द्रोच्चोनस्फुटार्के मृगादिगते[2] पुनस्तस्मिन्नेव विधुस्फुटे ऋणं कुर्यात् । असिते कृष्णपक्षे पुनरन्यथा । कर्क्यादावृणं, मृगादौ[3] धनं कुर्यादित्यर्थः । एवं द्वितीयस्फुटीकरणसिद्धो विधुर्भवति ॥ १-३ ॥

व्याख्या—1. B. Hapl. om. : स्फुटा to स्फुटा, next line.

2. C_{10} मेषादिगते 3. C_{10}. मकरादौ

त्रिज्याघ्नं बाहुजं तेन भक्तं स्वर्णं विधोः स्फुटे ।
कक्र्यैणादौ विधूच्चोनरवौ शुक्लेऽन्यथाऽसिते ॥ ३ ॥

मध्यभुक्तिर्दशघ्नेन्दोस्त्रिज्याघ्ना योजनैर्हृता ।
भूचन्द्रान्तरगैर्भुक्तिर्विधोरस्य स्फुटा मता ॥ ४ ॥

ग्राह्योऽयमेव भूस्थानां द्रष्टॄणां चन्द्रमाः सदा ।
तिथिनक्षत्रयोगादौ लाटे चान्यो भगोलगः ॥ ५ ॥

[विक्षेपः नतिश्च]

पातं विशोध्य चान्यस्माद् व्यतीपातोक्तवर्त्मना ।
आनीतमिष्टविक्षेपं योजनश्रुतिताडितम् ॥ ६ ॥

अथ तत्रैव स्फुटभुक्तेरानयनमाह— [मध्यभुक्तिरिति ।]

चन्द्रस्य मध्यभुक्तिकला दशभिस्त्रिज्यया च निहत्य भूचन्द्रान्तरगैर्योजनैः द्वितीयस्फुटकर्णाख्यैरिदानीमानीतैर्विभजेत् । तत्र लब्धा चन्द्रस्य द्वितीयस्फुट-भुक्तिर्भवतीति ॥ ४ ॥

द्वितीयस्फुटीकरणस्य विभागमाह[1]— [ग्राह्योऽयमिति ।]

[2]भूपृष्ठावस्थितद्रष्टृदृक्केन्द्रेण ग्रहप्रापिणा[3] प्रतिक्षणमन्यादृशसंस्थानेन दृङ्मण्डलेन यदा ग्रहः परिच्छिद्यते[4] यथा ग्रहणद्वये चन्द्रार्कौ यथा वा शृङ्गोन्नतौ चन्द्रः तत्रोक्तवद्, द्वितीयस्फुटसिद्ध एव, चन्द्रो ग्राह्यः । अन्यत्र तिथिनक्षत्रयोगादौ लाटे च भगोलगत एव । प्रथमस्फुटसिद्ध एवेत्यर्थः ॥ ५ ॥

[विक्षेपः नतिश्च]

अथ विक्षेपानयनायाह— [पातं विशोध्येति ।]

व्याख्या—1. C_{1-9}. विषयं दर्शयति

2. B. Hapl. om. of भूपृष्ठ to भगोल, 3 lines below.

3. A. ग्रहलाघविना; B. Included in hapl. om. above.

4. $C_{1-6,9}$ विच्छिद्यते

भूचन्द्रान्तरगैर्हत्वा लब्धः क्षेपस्तथैव च ।
रवीन्द्वोः पृथगानीय नतिलम्बनलिप्तिकाः ॥ ७ ॥

तत्र[1] द्वितीयस्फुटं विना अन्यस्मादेव केवलात् स्फुटेन्दोः पातं विशोध्य गोलद्वयमवधार्य दोर्ज्यामानीय परमविक्षेपेण निहत्य त्रिज्यया विभजेत् । तत्र लब्धो विक्षेपो व्यतीपातोक्तवर्त्मनाऽऽनीतः । यदुक्तम्—

पातोनेन्दोर्भुजाजीवा परमक्षेपताडिता ।
त्रिज्याभक्ता विधोः क्षेपः ॥
(तन्त्रसंग्रहः, ६.३)

इति ।

तमिष्टविक्षेपं मन्दयोजनकर्णेन[2] निहत्य द्वितीयस्फुटयोजनकर्णेन विभजेत् । द्वितीयस्फुटकर्णस्यैव भूचन्द्रान्तरयोजनरूपत्वात् । तत्र लब्धो भूगोल-विषय इष्टविक्षेपः । स[3] पुनर्दृग्गोले[4] कर्तव्यः । तच्च प्राग्वदेव । यदुक्तं प्राक्—

विक्षेपः केवलाच्चन्द्रात् प्राग्वत् त्रिज्याहृतो हतः ।
योजनैर्विवरे चन्द्रभगोलघनमध्ययोः ॥
दृक्कर्णयोजनैर्भक्तो दृग्गोले क्षेप इष्यताम् ॥
(तन्त्रसंग्रहः, ५.४४b-४५)

इति ।

तत उक्तवदानीतं विक्षेपं पुनर्द्वितीयस्फुटयोजनकर्णेन निहत्य दृक्कर्णयोजनैर्विभजेत्[5] । अथवा अत्र द्वितीययोजनकर्णेन हरणं पुनस्तेनैव गुणनं च विधाय[6] त्रिज्यया विभज्य लब्धं इष्टविक्षेपं स्फुटयोजनकर्णेन निहत्य दृक्कर्णयोजनैरेव विभजेत् । तत्र लब्धः स्फुटो विक्षेप इति । स च विक्षेप इन्दुनतिसंस्कृतो बिम्बान्तरे नतित्वेन गृह्यते । अर्कस्य पुनर्विक्षेपाभावात् स्वाभाविक्येव नतिरिति । नत्यानयनं प्रागेवोक्तम्—

व्याख्या—1. $C_{1-6\cdot8}$ ततः 2. C. मन्दस्फुटयोजनकर्णेन
3. C. एवमानीतो विक्षेपः for स
4. C. भगोले
5. B. Hapl. om. । विभजेत् to विभजेत् of next sentence.
6. C. चावधूय

प्राग्वद् भूपृष्ठविक्षेपः[1] स चेन्दुनतिसंस्कृतः[2] ।
बिम्बान्तरे नतिर्ग्राह्या विधोरर्कस्य चेत् स्वकाः ॥ ८ ॥

[चन्द्रार्कबिम्बान्तरानयनम्]

कृतलम्बनचन्द्रार्कविवराज्ज्याशरौ नयेत् ।
तज्ज्यामिन्दुनतीषुघ्नां त्रिज्याप्तां गुणतस्त्यजेत् ॥ ९ ॥

केवलादेव दृक्क्षेपाद् भूव्यासार्धेन ताडितात् ।
विधोर्योजनदृक्कर्णभक्तास्त्र नतिलिप्तिकाः ॥
तद्वदेव च दृक्क्षेपात् स्वदृक्कर्णेन भास्वतः ॥

(तन्त्रसंग्रहः, ५.४६-४७a)

इति । तत्र विधोर्नतिविक्षेपयोः तुल्यदिशोर्योगं भिन्नदिशोर्विश्लेषं च कुर्यात् । एवंकृत इन्दुनतिसंस्कृतस्फुटो विक्षेपो भवति । नत्युत्क्रमोऽपि स्फुटनतिचापस्योत्क्रमज्यैव[1] । लम्बनमपि तयोः प्रागेवोक्तम्—

तत्कालचन्द्रदृक्क्षेपलग्नान्तरभुजागुणात् ।
अर्कवद् दृग्गतिः साध्या भूव्यासार्धहते तयोः ॥
दृग्गती स्वस्वदृक्कर्णयोजनैर्विहृते कलाः ।
धनं दृक्क्षेपलग्नात् प्राक् सूर्येन्द्वोर्ऋणमन्यथा ॥

(तन्त्रसंग्रहः, ५.५०-५१)

इति । एतत्सर्वं प्राग्वदित्यनेन सूचितम्[2] । अतएव वक्ष्यति[3]— **कृतलम्बनचन्द्रार्कविवरात्** इति । (तन्त्रसंग्रहः, ८.९) ॥ ८ ॥

[चन्द्रार्कबिम्बान्तरानयनम्]

अथ चन्द्रार्कान्तरे प्रथमपदगते बिम्बान्तरानयनायाह— [**कृतलम्बनेति** ।]

मूलम्— 1. B. C. विक्षेपं 2. C. °संस्कृतम्

व्याख्या— 1. C. adds : नान्यत् किञ्चिदिति ।
2. C. वर्णितम् for सूचितम् 3. C. वक्ष्यते

नतीषुफलकृत्योश्च भेदान्मूलमिषौ क्षिपेत् ।
गुणबाणौ तथाभूतावुच्येते[1] विवरोद्भवौ[2] ॥ १० ॥

विवरोत्थशरस्यार्कनतिबाणस्य चान्तरम् ।
अन्तरज्या च या यच्च नतिज्या विवरं तयोः ॥ ११ ॥

योग एव दिशोर्भेदे नत्योरत्र शशीनयोः ।
त्रयाणां वर्गयोगस्य मूलं बिम्बान्तरं स्फुटम्[3] ॥ १२ ॥

[4]कृतलम्बनचन्द्रार्कविवरे भत्रयाधिके ।
तदन्तरदलस्यैव ज्या ग्राह्या न शरस्तदा ॥ १३ ॥

उक्तवल्लम्बनसंस्कृतयोश्चन्द्रार्कयोर्यदन्तरालचापं ततः क्रमज्यां [1]व्युत्क्रमज्यां चानीय तयोः क्रमज्यां पृथगिन्दोः नत्युत्क्रमज्यया पूर्वानीतया निहत्य त्रिज्यया विभजेत् । तत्र लब्धं **नतीषुफलं** नाम । तत् पृथक्स्थितायाः क्रमज्याया विशोधयेत् । तत्र [2]लब्धश्चन्द्रार्कयोर्विवरोत्पन्नो गुणः । अथ नत्युत्क्रमस्य **नतीषुफलस्य** च वर्गान्तरतो यन्मूलं तच्चन्द्रार्कान्तरोत्क्रमज्यायां प्रक्षिपेत् । स तयोर्विवरोत्पन्न उत्क्रमगुणः । अथ तस्माद् **विवरोत्क्रमगुणाद्** अर्कस्य नत्युत्क्रमगुणः सर्वदैव विशोध्यः । तत्र शिष्ट एको राशिः । नतीषुफलसंस्कृता चन्द्रार्कान्तरालज्या द्वितीयो राशिः । चन्द्रार्कयोर्नतिज्ययोर्भिन्नतुल्यदिशोर्योगोऽन्तरं[3] वा तृतीयो राशिः । तेषां **त्रयाणां** राशीनां **वर्गयोगमूलकृतलम्बनयोश्चन्द्रार्कयोरन्तरे** [4]प्रथमपदगते स्फुटं **बिम्बान्तर**मिति ॥ ९-१२ ॥

अथ द्वितीयपदगते बिम्बान्तरानयनायाह— [**कृतलम्बनेति** ।]

कृतलम्बनयोश्चन्द्रार्कयोर्विवरचापे राशित्रयादधिके सति तदर्धस्य क्रमज्यैव **ग्राह्या**, **न** पुनरुत्क्रमज्यापि । ततः तथा गृहीतां क्रमज्यामुभयत्र कृत्वा ते उभे अपि पूर्ववद् **रवीन्द्वोः** [5]उत्क्रमज्याभ्यां निहत्य **त्रिज्यया** विभजेत् ।

मूलम्— 1. C. उच्यते 2. B. Hapl. om. of **विवरोद्भवौ**
3. B. om. स्फुटम् 4. $C._{1-5\cdot 10}$ तत्तल्लम्बन

व्याख्या—1. A. उत्क्रमज्यां ; B. Hapl. om. of the word.
2. शिष्ट for लब्ध
3. C. योगमन्तरं 4. B. प्रथमस्फुटगते बिम्बा
5. C. नत्युक्रमज्याभ्यां

रवीन्दुनतिबाणघ्ना द्विष्ठा त्रिज्याहृता पृथक् ।
योज्ये स्वस्वफलोने ते जीवा सैवान्तरोद्भवा ॥ १४ ॥

नतीषुफलकृत्योर्ये भेदमूले तदन्तरम् ।
द्वितीयं चरमा प्राग्वन्नतियोगो भिदापि वा ॥ १५ ॥

त्रयाणामपि वर्गैक्यान्मूलं बिम्बान्तरं तदा ।
सदा[1] बिम्बान्तरार्धस्य चापं द्विगुणमन्तरम् ॥ १६ ॥

तत्र लब्धं फलद्वयं तयोरुभयोर्नतीषुफलं नाम[1] । तद्द्वयं पृथक्कृताभ्यां स्वस्वक्रमज्याभ्यां विशोध्य शिष्टे द्वे मिथो योजयेत् । सैवेहान्तरोद्भवा स्फुटा जीवा स्यात् । सा तावदिहैको राशिः । अथ रवीन्द्वोर्ये नत्युत्क्रमज्ये ये च तयोर्नतीषुफले तत्र तत्र रवेर्नत्युत्क्रमस्य [2]नतीषुफलस्य च यद्वर्गान्तरं यच्च चन्द्रस्यापि नत्युत्क्रमं तन्नतीषुफलयोर्वर्गान्तरम् । तयोरुभयोर्मूलयोरन्तरं द्वितीयो राशिः । तयोरेव नत्योर्दिग्भेदैक्यवशात् पूर्ववद्योगोऽन्तरं[3] वा तृतीयो राशिः[4] । तेषां त्रयाणां वर्गयोगमूलं द्वितीये पदे[5] स्फुटं बिम्बान्तराल-मिति ॥ १३-१६a ॥

एवमानीतमेव बिम्बान्तरालं दृग्विषये[6] स्फुटं भवतीत्याह—[सदेति ।]

भूपृष्ठावस्थितद्रष्टृमध्यं[7] चन्द्रार्कयोर्बिम्बघनमध्यद्वयावभेदि यद् दृङ्-मण्डलं परिकल्प्यते, यत्रार्कभासा तदभिमुखं चन्द्रबिम्बं दीप्यते[8] । यदुक्तं सिद्धान्तदर्पणे—

द्विस्पृग्वृत्तेऽर्कभासेन्दोरर्धं भात्यतिरोहितम् ॥

इति । (सिद्धान्तदर्पणम् , ३०)

मूलम्— 1. B. तदा

व्याख्या—1. C. Hapl. om. of तयोरुभयोर्नतीषुफलं नाम

2. C. तन्नतीषु 3. C. योगमन्तरं

4. B. om. वा तृतीयो राशिः 5. A. पादे

6. C_{1-8} दिग्विषये (wr.) 7. B. मर्कं (wr.)

8. A. भासते

रवीन्द्वोर्वलये तत्र द्रष्टृमध्योभयस्पृशि ॥ १७a ॥

[सितमानार्थं बिम्बान्तरम्]

तद्बाहुज्या च कोटिज्या चन्द्रदृक्कर्णताडिते ॥ १७b ॥

भुजाकोटिफले भक्ते [1]रविदृक्कर्णयोजनैः ।

ताभ्यां त्रिभज्यया[2] कर्णाच्छीघ्रन्यायेन दोःफलम् ॥ १८ ॥

चापितं धनमेवात्र बिम्बान्तरधनुष्यदः ।

कर्क्येणादौ त्रिभज्यायां स्वर्णं कोटिफलं त्विह ॥ १९ ॥

सितमानार्थमेवैवं रवीन्द्वन्तरमिष्यते ॥ २०a ॥

तत्रैवमानीतस्य बिम्बान्तरसमस्तज्यारूपस्य यदर्धं तस्यैव यच्चापं द्विगुणितं तदेव तयोर्बिम्बान्तरालमित्येतन्न क्वचिद् व्यभिचरति ॥१६b-१७a॥

[सितमानार्थं बिम्बान्तरम्]

अथैवमानीतस्य बिम्बान्तरालस्य चन्द्रबिम्बे सम्पादनायाह— [**तद्बाहुज्येति** ।]

उक्तवदानीते बिम्बान्तरे चापे राशित्रयादूने सति ततो गृहीता ज्या **बाहुज्या**। तच्चापं राशित्रयाद्विशोध्य शिष्टस्य[1] ज्या तत्**कोटिज्या** चेति। राशित्रयादधिके पुनः तस्मिन् ततो राशित्रयं विशोध्य शिष्टस्य ज्या कोटिज्या। तच्चापं राशित्रयाद्विशोध्य ज्या तद्बाहुज्येति। तां बाहुज्यां कोटिज्यां च **चन्द्रस्य दृक्कर्ण**योजनैः निहृत्य **रवेर्दृक्कर्णयोजनै**र्विभजेत् । तत्र लब्धे क्रमेण भुजाकोटिफले स्याताम् । तयोः कोटिफलं त्रिज्यायाम् अन्तरालचापस्य मृगकर्क्यादिगतत्ववशादृणं धनं च[2] कृत्वा तस्याः [3]तद्भुजाफलस्य च वर्गयोगाद्यन्मूलं तत्कर्णः स्यात्। ततः **शीघ्रस्फुटन्यायेन** तद्बाहुफलं त्रिज्यया निहृत्य तेन कर्णेन विभजेत् । तत्र लब्धफलस्य **यच्चापं** तत् बिम्बान्तरालधनुषि सर्वदा **धनमेव** कर्तव्यम्। न पुनः कदाचिदृणमिति । उक्तरूपमिदं रवीन्द्वोः **बिम्बान्तरानयनं सितमानार्थमेव** कर्तव्यम्, न पुनरन्यत्र ।

मूलम्— 1. A. विदृक्कर्ण (wr.) 2. A. त्रिभज्ये यत् (wr.)

व्याख्या—1. B. Hapl. om. after शिष्टस्य to शिष्टस्य, next line.

2. B. गते त्वधनं ऋणं च

3. B. तद्भुजास्य च ; C. तद्बाहु

उत्क्रमज्या ततो ग्राह्या क्रमज्या च समे पदे ॥ २०b ॥
बिम्बमानाहताद् बाणात् त्रिज्याढ्या च पदाधिके ।
तद्गुणात् कृत्स्नविष्कम्भभक्तमेव सितं सदा ॥ २१ ॥

[सितमानस्य वलनम्]

प्राग्वच्छायाभुजा भानोः स्वाग्राभ्यां[1] च विधोर्नयेत् ।
शङ्क्वग्रं सौम्यदिक्कं स्याद्दृश्यार्धगते ग्रहे ॥ २२ ॥
दृक्कर्णानयने शङ्कोः फलमप्यत्र योजयेत् ।
व्यासार्धात् [2]तद्धृताच्छायाभक्ते क्षितिजगे उभे ॥ २३ ॥

अथवा बिम्बान्तरमिदं सितमानार्थमेवमेव कर्तव्यम् । न पुनः प्रकारान्तरेण इति ॥ १७b-२०a ॥

अथ सितमानानयनार्थमाह— [उत्क्रमज्येति ।]

उक्तवदानीतादर्केन्द्वोः स्फुटान्तरालचापादोजपदे तस्मिन्नुत्क्रमज्यां, [1]युग्मपदे तु राशित्रयादधिकस्य क्रमज्यां त्रिज्यया सहितामानीय चन्द्रबिम्बमानकलाभिर्निहत्य कृत्स्नविष्कम्भेण द्विगुणितत्रिज्यातुल्येन विभजेत् । तत्र लब्धं सितमानं भवति । सदेत्यनेन प्रकारान्तरं पराकरोति[2] ॥ २०b-२१ ॥

[सितमानस्य वलनम्]

अथास्य सितमानस्य वलनानयनायाह— [प्राग्वच्छायेति ।]

तत्र भानोश्चन्द्रस्य च छायाभुजां शङ्क्वग्रार्काग्राभ्यां प्राग्वदेवानयेत् । यथोक्तं प्राक्—

> अक्षज्याघ्नान्महाशङ्कोः शङ्क्वग्रं लम्बकाहृतम् ।
> सर्वदा दक्षिणं तद्धि योज्यमर्काग्रयापि तत् ॥
> याम्ये गोले महाबाहुः सौम्ये चाग्रद्वयान्तरम् ।
> अधिकेऽग्रापि शङ्क्वग्रे याम्यः स्यादन्यथोत्तरः ॥

इति । (तन्त्रसंग्रहः, ३.४७-४८)

मूलम्— 1. A. स्वग्राभ्यां 2. C. तद्धृतात् (wr.)

व्याख्या—1. B. Duplicates युग्मपदे to क्रमज्यां

2. C. परं करोति (wr.)

योगस्तद्धनुषोः कार्यो यथा युक्त्यन्तरं तथा।
छायाबाह्वोर्दिशोर्भेदे योगः साम्येऽन्तरं तथा ॥ २४ ॥
विश्लेषचन्द्रबाहुश्चेत्[1] शिष्टः स्याद् व्यत्ययेन दिक्।
सूर्यस्यैव ततोऽन्यत्र ग्राह्या दिग् योगभेदयोः ॥ २५ ॥

इन्द्वग्रस्यापि तस्य परमापक्रमस्य सिद्धत्वात्—

साघनेन्द्वोर्भुजाज्यां[1] स्वपरमक्रान्तिताडिताम् ॥
लम्बकेन विभज्येन्द्वोरग्रज्या साध्यतेऽर्कवत् ॥

इति सुकरैवम्। शङ्क्वग्रानयनमप्युभयोः समानमेव। किन्तु अदृश्यार्धगते ग्रहे शङ्क्वग्रं सौम्यदिग्गतमेव भवतीति। तत्र—

छायाशङ्कू रवेस्ताभ्यां भूव्यासार्धस्य योजनैः।
हताभ्यां त्रिज्यया लब्धे बोःकोटी योजनात्मिके ॥
रविभूम्यन्तरात् कोटिं त्यक्त्वा तद्बाहुवर्गयोः।
योगात् पदं भवेद् भानोः दृक्कर्णो योजनात्मकः ॥
(तन्त्रसंग्रहः, ५.३७-३८)

इत्यत्र दृक्कर्णानयने द्वितीयस्फुटकर्णतः शङ्कुफलस्य शोधनीयत्वं यदुक्तं तदिह अदृश्यार्धगते ग्रहे[2] योज्यमेव। एवंकृतस्य द्वितीयस्फुटकर्णस्य छायाफलस्य च वर्गयोगमूलं दृक्कर्ण इति। अथोक्तवदानीते अर्केन्द्वोः छायाभुजे द्वे अपि त्रिज्यया निहत्य छायया विभजेत्। तत्र लब्धे द्वे अपि क्षितिजगते स्याताम्। येन तयोः त्रिज्यावृत्तगतत्वात् चापीकरणं सुकरं स्यात्। ततस्तयोः चापयोर्दिशोर्भेदे मिथो युञ्ज्यात्। दिक्साम्ये च विश्लेषं कुर्यात्। तत्र विश्लेषे चन्द्रबाह्वोः शिष्टत्वे व्यत्ययेन दिग् ग्राह्या। अन्यत्र [3]सूर्यबाह्वोः शिष्टत्वे छायाभुजाचापयोर्योगे च सूर्यस्यैव छायाभुजाया दिग् ग्राह्या।

मूलम्— 1. A. om. चेत्
व्याख्या—1. C. भुजाभ्यां (wr.) 2. A. B. अदृश्यार्धग्रहे
3. C. om. सूर्य

स्वभूम्यन्तरनिघ्नस्वदृग्ज्या दृक्कर्णभाजिता ।
अर्केन्द्वोः सुस्फुटा दृग्ज्या द्रष्टृभूपृष्ठगस्य हि ॥ २६ ॥

बाहुचापान्तरज्याघ्ना दृग्ज्या त्रिज्याहृता रवेः ।
चन्द्रबिम्बार्धनिघ्नाथ बिम्बान्तरभुजाहृता ॥ २७ ॥

उन्नतिश्चन्द्रशृङ्गस्य नतिर्वार्धगुणात्मिका ।
वर्गत्रयैक्यमूलस्य दलस्य द्विगुणं धनुः ॥ २८ ॥

यत्तस्य बाहुजीवात्र बिम्बान्तरभुजोदिता[1] ॥ २९a ॥

[शृङ्गोन्नतेः परिलेखनम्]

चन्द्रबिम्बार्धमानेन लिखेद् वृत्तं तु, तद्गते ॥ २९b ॥

रेखे द्वे दिग्विभागार्थं, प्रत्यग्रेखाग्रतः[2] पुनः ।
नीत्वा शृङ्गोन्नतेर्मानं प्राग्वदर्धगुणात्मकम् ॥ ३० ॥

अथ **अर्केन्द्वोः दृग्ज्याद्वयं** स्वेन द्वितीयस्फुटयोजनकर्णेन निहत्य **दृक्कर्ण**-योजनैर्विभजेत् । तत्र लब्धे **भूपृष्ठगतस्य द्रष्टुः** सम्बन्धिन्यौ **स्फुटे**[1] **दृग्ज्ये** स्याताम् । अथ छायाभुजाचापयोगान्तरतो वा ज्यामानीय स्फुटया स्वस्वदृग्ज्यया निहत्य **त्रिज्यया** विभजेत् । तत्र लब्धं फलं पुनरपि **चन्द्र-बिम्बव्यासार्धेन** निहत्य **बिम्बान्तरभुजया** विभजेत् । तत्र लब्धा **चन्द्र-शृङ्गस्योन्नतिरवनतिर्वा अर्धज्यात्मिका** स्यादिति । **बिम्बान्तरभुजा** च त्रयाणां राशीनां वर्गयोगमूलस्यार्धीकृतस्य यच्चापं द्विगुणितं प्रागेव प्रदर्शितं तद् भुजाया अर्धज्येति ॥ २२-२९a ॥

[शृङ्गोन्नतेः परिलेखनम्]

अथैवामानीतां शृङ्गोन्नतिं परिलेखनेन स्पष्टीकर्तुमाह— [**चन्द्र-बिम्बार्धेति** ।]

तत्र **चन्द्रबिम्बस्य** व्यासार्धमानेन कर्कटेन **वृत्तमालिख्य** तन्मध्ये बिम्बकेन्द्रावभेदिनीं समपूर्वापरां समदक्षिणोत्तरां च **रेखां** कुर्यात् । येनात्र

मूलम्—1. A. भुजोदितम्　　2. C. रेखाग्रता (wr.)

व्याख्या—1. C. स्फुटौ (wr.)

चन्द्रादर्कदिशीन्दोस्तु परिधौ प्राग्विपर्ययात् ।
बिन्दुं कृत्वा लिखेद् रेखां तन्मार्गेण सितं नयेत् ॥ ३१ ॥

प्रत्यगग्रात् सिते पक्षे प्रागग्रादसितेऽपि च ।
सितान्ते बिन्दुमाधाय तिर्यग्रेखाग्रयोस्ततः ॥ ३२ ॥

बिन्दुं कृत्वा लिखेद् वृत्तं बिन्दवो नेमिगा यथा ।
वृत्तान्तराकृतिश्चन्द्रः शृङ्गोन्नत्या प्रदर्श्यताम् ॥ ३३ ॥

व्यस्तदिक्कोऽर्कबाहुः स्यात् तयोर्नानाकपालयोः ।
प्रत्यासन्नरवेर्भागादिहाप्यन्तर्नयेत् सितम् ॥ ३४ ॥

विग्विभागः स्यादिति । ततः पूर्वापररेखायाः प्रत्यगग्राच्चन्द्रतोऽर्कविस्थितदिशि, प्रागग्रात् तद्विपरीतदिशि च तत्परिधावर्धगुणात्मकं शृङ्गोन्नतेः मानं उक्तवदानीतं नीत्वा बिन्दुद्वयमपि[1] विरचय्य तद्द्वयस्पृष्टां बिम्बकेन्द्रावभेदिनीं अपरामपि रेखां कुर्यात्[2] । ततस्तद्द्वितयावष्टब्धकेन्द्रयोरुभयोर्वृत्तयोः परिधिभेदोत्पन्नमत्स्यानुसारेण तत्समतिर्यग्गतामपरामपि रेखां कुर्यात् । सा तिर्यग्रेखा नाम ।

तयोराद्यरेखायाः प्रत्यगग्रात् सिते पक्षे तन्मार्गेण सितमानं [3]बिम्बान्तर्नयेत् । ततः सितान्ते तस्यामेव रेखायां बिन्दुमाधाय तत्तिर्यग्रेखाग्रयोरप्युभौ बिन्दू कुर्यात् । एवंकृतेषु त्रिषु बिन्दुषु तत्त्रितयावगाढनेमिकमपरमपि[4] वृत्तं[5] विरचयेत् । तत एवंकृतस्यास्य त्रिस्पृग्वृत्तस्य [6]चन्द्रबिम्बार्धवृत्तस्य च यद् बिम्बनेम्योरन्तरालं तस्य [7]सुधादिना धवलीक्रियमाणस्येवाकृतिर्यस्य तादृशश्चन्द्रः तदानीं शृङ्गोन्नत्या समुपरक्षितः सन् प्रदर्श्यताम् ।

व्याख्या—1. A. om. अपि

2. B. Hapl. om. after कुर्यात् to कुर्यात्, next line.

3. C. बिम्बान्तं 4. A. नेमितोपरमपि; C. नेमितमपरमपि

5. A. बिन्दं (wr.) 6. C. om. चन्द्रबिम्बार्धवृत्तस्य

7. C. om. सु

अन्यस्मादसितं वापि सर्वमन्यद् यथोदितम् ॥ ३५a ॥

[अर्कास्तमयात्परं चन्द्रस्योदयादिगणना]

उदयास्तमयाविन्दोरविशेषेण सिद्ध्यतः ॥ ३५b ॥

यदा पुनरर्केन्दू भिन्नकपालौ[1] स्यातां तदार्कस्य छायाबाहुर्व्यस्तदिक्कोऽवगन्तव्यः । तत्र चक्रार्धान्तरितादेवार्कतस्तद्बाहोरिष्यमाणत्वात् तस्य च प्रागुक्तवैपरीत्यादिति । तत्रापि सितमानानयनं **प्रत्यासन्नरवेर्भागादेव** ।

एतदुक्तं भवति— यद्यप्यर्केन्द्वोर्भिन्नकपालावस्थितयोः सतोरर्कबाहुः चक्रार्धान्तरितादेवार्कतो ग्राह्यः, तथापि सितमानं चन्द्रबिम्बे सूर्याभिमुखस्यैवार्धस्य वेदितव्यम् । तत्करस्पर्शादेव तदानीं तस्य शौक्ल्योपलम्भाद् असितमानं पुनस्ततो व्यस्तदिग्गतमेव, तत्रैव [2]तत्करस्पर्शप्रतिबन्धान्मालिन्योपलम्भात् तत्रापि चन्द्रबिम्बगतया अर्धगुणात्मिकया शृङ्गोन्नत्या तन्मध्यगतप्रागपरसूत्रस्य प्राक्प्रत्यग्ग्राभ्यां बिन्दोः सञ्चालनं, तदुभयस्पृष्टरेखान्तरविरचनं, तत्तिर्यग्रेखापरिकल्पनम्, तद्रेखानुसारेण[3] तदग्रतो बिम्बान्तरसितमानप्रवेशनं, तदग्रे तिर्यग्रेखाग्रयोश्च बिन्दुत्रयविरचनं, त्रिस्पृग्वृत्तपरिलेखनं,[4] बिम्बपरिध्यन्तरालेनासितमानप्रदर्शनं च पूर्ववदेव । किन्तु तत्र बिम्बपरिध्यन्तरालस्य मष्यादिविलेपनतो[5] मालिन्योत्पादनेनासितमानं प्रदर्शयितव्यमिति ॥ २९b-३५a ॥

[अर्कास्तमयात्परं चन्द्रस्योदयादिगणना]

एवं चन्द्रबिम्बसितमानशृङ्गोन्नत्यादिकं सप्रपञ्चं प्रदर्शितम् । इदानीं तस्यैव अर्कास्तमयात्परं उदयादिकालपरिज्ञानम् उक्तमार्गेणैव सेत्स्यतीत्याह— **[उदयास्तमयेति ।]**

इन्दोरुदयादिकालावगत्यर्थम**विशेषं** कर्मैव अभिधातव्यं, दृक्कर्मादीनां प्रागेव प्रदर्शितत्वादिति । तत्र तावत् कृष्णपक्षे सूर्यास्तमयकालोत्थौ स्फुटावर्केन्दू समानीयार्के राशिषट्कं च क्षिप्त्वा स्फुटादावुदयोक्तं[6] दृक्कर्म-

व्याख्या—1. B. कपाले

2. A. तत्करस्पर्शोपलम्भात्; C. तत्करस्पर्शगतिलम्भात्

3. C. तत्तिर्यग्रेखानुसारेण　　4. A. om. त्रिस्पृग्वृत्तपरिलेखनं

5. C. विलेखनतो　　6. C. स्फुटोभावुदयोक्तं

मध्यप्राप्तिश्च कालश्च छाययैष्यो गतोऽपि वा ॥ ३६[a] ॥

युगलं च तयोः कृतप्राणकलान्तरयोः विवरकलाभिः प्राणतुल्याभिः त्रैराशिकेन स्फुटगतिद्वयमानीय तयोः[1] प्रक्षिपेत् । पुनरप्येवंकृतस्य चन्द्रस्य कृतदृक्कर्मयुगलस्यार्कस्य च केवलस्य कृतप्राणकलान्तरचरयो[2]र्विवरप्राणैः स्फुटगतिमानीय प्राच्ययोरेव[3] चन्द्रार्कस्फुटयोः प्रक्षिप्य उक्तवदेव [4]तद्विवरप्राणान् मुहुरानयेत्, यावदविशेषः। अविशिष्टः सोऽर्कास्तमयाच्च[5] चन्द्रोदयावधिकः कालो भवति। एवं शुक्लपक्षे तदस्तमयकालोऽपि वेदितव्यः। किन्तु, तत्र चन्द्रे अस्तमयोक्तं दृक्कर्मयुगलं कार्यम् । **मध्यप्राप्तिकालानयनमप्येवमेव कार्यम्** । किन्तु तत्रायनमेव दृक्कर्म कार्यम् । तदप्युक्तम् **अमुनैव**—

> **दृक्क्षेपः काललग्नस्य क्रान्तिरेव खमध्यगे ।**
> **क्रान्तिक्षेपविशोर्भेदे धनं साम्ये त्वृणं तदा ॥**
>
> (चन्द्रच्छायागणितम्, २३)

इति ।

सर्वत्रापि तत्तद्दृक्कर्मसंस्कृतो ग्रह एव लग्नम्[6]। यदुक्तम्—

> **उदयास्तखमध्येषु लग्नमेवंकृतो ग्रहः ॥**
>
> (चन्द्रच्छायागणितम्, २४)

इति । तत्र कृतप्राणकलान्तरमेव[7] मध्यलग्नं मध्यकालः, कृतप्राणकलान्तरचरमुदयलग्नमुदयकालः । तदुक्तम्—

> **मध्यलग्नं स्वकालः स्यात् कृते प्राणकलान्तरे ।**
> **चरं चोदयलग्नस्य कुर्यात् कालप्रसिद्धये ॥**

इति ।

मध्यलग्नस्याविशेषणमप्युक्तम्—

> **सन्निभो लग्नकालः स्यात् तत्क्रान्तीन्द्वादिभिर्मुहुः ।**
> **मध्यलग्नं तथा कार्यं यावन्निश्चलतामियात् ॥**
>
> (चन्द्रच्छायागणितम्, २५)

इति ।

व्याख्या—1. B. आनीतयोः (wr.)
2. C. कलान्तरस्य चरयोः 3. C. प्राचीनयोरेव
4. A. पदात् for तत् 5. C. अस्तमयः for अस्तमयाच्च
6. B. बलनम् for लग्नम् 7. B. कलान्तरमध्यमेव

अस्तलग्नं तस्याविशेषणमपि[1]—

अस्तलग्नं सचक्रार्धं प्राग्लग्नं, तस्य कालतः ।

चन्द्रदृक्क्षेपकालादि नीत्वा तमविशेषयेत् ।।

(चन्द्रच्छायागणितम्, २६a-२७b)

इति । एवंकृतस्य लग्नकालस्य रविकालस्य च यो भेदः स दिवानिशोः काल इति । तदुक्तम्—

रविकालस्य तस्यापि भेदः कालो दिवानिशोः ।।

(चन्द्रच्छायागणितम्, २७b)

इति ।

तत्र खमध्ये रविकालो राशित्रयविरहितः कृतप्राणकलान्तरो रविरेव । ततस्तस्य मध्यकालस्यापि[2] विवरप्राणान् प्राग्वदविशेष्य तन्मध्यप्राप्तिकालोऽपि साधयितव्य एव । तथा चन्द्रस्य छायया गतैष्यकालानयनं सिध्यत्येव । तद्यथा—प्रथमं छायावाक्यैः स्वदेशपठितैः चन्द्रस्य गतगन्तव्यनाडीरवगम्य ऊहसिद्धं[3] तत्कालचन्द्रं लग्नं च अवगम्य लग्नार्कान्तिरनाडिकाश्चानयेत् ।[4] ऊहसिद्ध[5]नाडिकादिगतिसंस्कृतस्य चन्द्रस्य लग्नत्वात्[6] ततो लग्नेऽर्के च प्राणकलान्तरं चरं च विधिवत् कृत्वा लग्नकालात् सूर्यकालं विशोध्य शिष्टा गन्तव्यासवः, अन्यथा गतासवः । दिनमानादधिकाश्चेद् राशिगत[7]नाड्यादिकमिति ज्ञेयम् । एवंसिद्धाभिर्गतगन्तव्यनाडीभिस्तत्कालेन्दुमवगम्य दृक्कर्म विधिवत् कृत्वा लग्नं लग्नकालं च आनीय तस्य रविकालस्यापि भेदतो गतगन्तव्यप्राणानानीय कुत्रचिद् रक्षेत् । अथ प्रकारान्तरेणापि गतगन्तव्यप्राणानानीय तान् पूर्वानीतैः[8] सह विश्लेष्य शिष्टस्फुटगतिमानीय तत्कालचन्द्रार्कयोर्धनमृणं च कुर्यात्, यदि प्रकारान्तरसमानीता अधिकाः स्युः । अन्यथा पुनर्ऋणधने व्यत्ययतः कार्ये[9] । एवं गन्तव्यकालविषये ज्ञेयम् । गतकालविषये पुनर्व्यत्ययेनेदं कर्म असकृत् कुर्यात्, यावदुभयथा समानीतयोः कालयोः साम्यं स्तात् । एतत्सर्वममुनैवान्यत्र प्रदर्शितम्—

व्याख्या—1. A. अस्तलग्नस्याविशेषणमपि

2. C. Hapl. om. after पि to कालोऽपि, following.

3. A om. गम्य ऊहसिद्धं 4. C. adds साधयेत्

5. A. ऊहसिद्धगम्य ऊहसिद्धं (wr.)

6. B. चन्द्रलग्नत्वात् 7. A. रात्रिगत (wr.)

8. A. पूर्वमानीतैः 9. C. om. कार्ये

[कुजादीनां कक्ष्याद्यानयनम्]

रविवच्चन्द्रकक्ष्याया नेयाऽन्येषां हि सा[1] ततः ॥ ३६b ॥

शङ्कुच्छायाकृती युक्त्वा स्वकर्णार्थं पदं नयेत् ।
याम्योदग्भूगुणो[1]नाढ्या द्युज्यान्त्या, विषुवच्छ्रुतेः[2] ॥

त्रिज्याघ्नायाः स्वकर्णाप्ता हीनान्त्या त्रिज्यया हृता ।
द्युज्याप्ता चापिता बाणैर्नतप्राणविधोरमी ॥
त्याज्या मध्याह्नकालात् प्राक्, क्षेप्याः प्रत्यग्गतासुभिः[3] ।
एभिर्विश्लिष्यपूर्वोक्तानन्तरप्राणभोगतः ॥
नीत्वार्केन्द्वाधिकं भूयः कुर्यात् कर्मासकृत् तथा ।
साम्यसिद्ध्यै रवीन्दुभ्यां सिद्धयोः कालयोर्द्वयोः ॥

(चन्द्रच्छायागणितम्, २८-३१)

इति ।

These verses are quoted also by Śaṅkara in his commentary on Nīlakaṇṭha's *Tantrasaṅgraha* (on ch. IV, verse 27, *TSS* 188, p. 107) with the introductory remark : तदुक्तमनेनैव ग्रहणनिर्णये ।

9. *Sundararāja-praśnottara.* Sundararāja, son of Ananta-nārāyaṇa, was an astronomer of the Tamil country contemporaneous with Nīlakaṇṭha and author of a detailed commentary on the *Vākyakaraṇa* or *Vākyapañcādhyāyī* which is a manual on the basis of which almanacs in the Tamil districts are computed.[1] Sundararāja had the greatest

---

1. Cr. ed. by T.S. Kuppanna Sastri and K.V. Sarma, K. S. R. Inst., Madras, 1962.

respect for Nīlakaṇṭha whom he addressed for clarification of certain points in astronomy. Nīlakaṇṭha's detailed answers to these questions formed a regular work, *Sundararāja-praśnottara*. Manuscripts of this work are yet to come to light, but both authors refer to this work. Sundararāja in his commentary on the last verse of ch. V of the *Vākyakaraṇa* says[1] :

अत्र तु गतियोगांशकेनैव हरणं युक्तमिति श्रीमत्-केरलसद्ग्रामनिवासि-नीलकण्ठार्येण त्रिस्कन्धविद्यापारदृश्वना षड्दर्शनीपारंगतेन आश्वलायनसूत्रेण गर्गगोत्रेण नवकलरु(?)जातेन गोलचूडामणिना अस्मदनुग्रहार्थे सुन्दरराजप्रश्नोत्तराख्ये ग्रन्थे प्रतिपादितम् । तेन गतियोगेनैव विभज्य स्थितिदलं ज्ञेयम् ।

Nīlakaṇṭha too refers to this work in his *ĀBh.Bhāṣya*, *Gola.*, 48 : *cf.* सुन्दरराजप्रश्नोत्तराख्ये मयोक्तमत्राप्यनुसन्धेयम् (*TSS* 185, p. 149).

10. A *Gruhaṇādi-grantha*, copied in continuation of Nīlakaṇṭha's *Siddhānta-darpaṇa-vyākhyā* in the Trivandrum Palace manuscript No. 975. The work as available in this manuscript begins '**अथ ग्रहणम्**' and without any more introduction, continues : **नन्वेवमपि स्वकाल एव गीतिकोक्तभगणाद्या: । गीतस्य ग्रहणस्य [च] प्रत्यक्षसंवाद: स्यात् ।** It goes on to describe the necessity of correcting old astronomical constants by observation, deals in detail with the *Śakābda-saṁskāra*, quotes the verses of N's *Parama-guru* Parameśvara from his *Siddhāntadīpikā* (*Mahābhāskarīya-bhāṣya-vyākhyā*),[2] on the latter's observation of some eclipses and after some more discussion ends abruptly. There is no doubt that this work is from Nīlakaṇṭha's pen. References herein to his own works, teacher, etc. fully confirm this point. One of his own works is referred to herein thus : **अत एव मया छायागणिते तत्साधनतया दृक्क्षेपानयनमुक्तम्**—'**अन्त्यद्युज्या**' etc. (p. 60 of my transcript). The verses quoted are from Nīlakaṇṭha's *Candracchāyāgaṇita*, vv. 8-10. He refers to his grand-teacher Parameśvara and his own *ĀBh.Bhāṣya* too, herein : *cf.*, **तस्मात् सिद्धान्तदीपिकोदाहृतानि ग्रहणान्यस्माभिर्दृष्टानि च तत्तदवसरे वक्ष्यमाणानि परमेश्वरोक्तप्रकारेण अर्कादिमध्यममानीय श्रीपत्युक्तप्रकारेण स्फुटीकृत्य कालक्रिया-गोलपादोक्ताभिरस्माभिर्व्याख्याताभि: युक्तिभिस्सिद्धै: क्रियाविशेषैश्च गण्यन्ताम् ॥** (pp. 57-58 of my transcript). The *ĀBh.Bhāṣyā* also is referred to elsewhere in this work (*cf.* pp. 62, 63

1. *Ibid.*, p. 119.
2. Ed., *Madras Govt. Or. Ser.*, 130 (1957).

of the transcript). For a characteristic reference to N's teacher, see : प्रकारान्तरेण 'चन्द्रबाहुफलवर्गं' त्याविना श्रीमद्-दामोदराह्वयास्मद्गुरुमुखोद्गतेन श्लोकेनोक्ता, तद्युक्तिरपि आर्यभटीयान्तर्भूतैव ॥ (p. 61 of the transcript).

11. *Grahaparīkṣākrama* (?). The well-known Kerala astrologer Puliyūr Purushottaman Nampūtiri has edited[1] an old, incomplete[2] Malayalam summary of a Sanskrit work under the title *Grahaparīkṣākrama*. The textual verses were not available to the editor and he presumed that the author was Dṛggaṇita-Parameśvara.[3] These verse are, however, found in Nīlakaṇṭha's *Bhāṣya* on the *Golapāda* of the *Āryabhaṭīya*, under verse 48 (*TSS* 185, pp 132-49). It is a long tract of about 200 verse, summing up the principles and methods followed in Hindu astronomy and forms a veritable handbook on the subject. It ends :

इति संक्षेपतः प्रोक्ता परीक्षा ज्योतिषामिह ।
कालमानचतुष्कस्य श्रुतस्य विवृतिस्त्वियम् ॥

It is not however very definite whether this is an independent work with the title *Grahaparīkṣākrama* and is quoted in extenso in the *Bhāṣya* or is but a part of the *Bhāṣya*.

Nīlakaṇṭha should have written more works than those mentioned above since there are quotations attributed to him in later works, for instance, in Śaṅkara's commentary *Laghuvivṛti* on Nīlakaṇṭha's *Tantrasaṅgraha*, which could not be traced to his known works. Again, the Trivandrum Palace Ms. No. 975 containing Nīlakaṇṭha's *Siddhāntadarpaṇa-vyākhyā* and the work on eclipses etc. described above, has, in continuation, some incomplete tracts with no definite titles, which again, to all appearance, seem to be Nīlakaṇṭha's writings.

---

1. Pub. by the Astrological Research Institute, Bombay-25, 1950.

2. The colophonic words at the end of the edition indicating its completion form only the editor's addition.

3. *Vide* the editor's Introduction, p. i ; see also Shri Nampūtiri's review and opinion on *Gaṇitaprakāśika* by K. V. A. Rama Poduval, Canannore, 1950, p. xiv.

According to some, Nīlakaṇṭha has composed a work entitled *Grahanirṇaya.*[1] It is likely, however, that this is only the *Grahaṇa-nirṇaya*, noticed above Ulloor attributes to Nīlakaṇṭha a work called *Gaṇitayukti.* Thus, speaking about a *Bhāṣāyuktibhāṣā*, he says that "it is not the work of Keḷallūr Comātiri, author of *Gaṇitayukti.*"[2] The ascription is wrong and the fact is that while our author belonged to the Gārgya-gotra, this latter work is by an anonymous author belonging to the Bhāradvāja-gotra as is clear from its first verse, which runs as follows :[3]

विदित्वार्यभटप्रोक्तगोलतत्त्वेन केनचित् ।
भारद्वाजेन तन्यन्ते काश्चित् गणितयुक्तय: ॥

Chronology of Nīlakaṇṭha's Works

It has been noticed[4] that Nīlakaṇṭha's *ĀBh.Bhāṣya* is later than his *Tantrasaṅgraha* and *Golasāra* which are quoted in the former. But nothing has been said about the chronology of his other works. The present writer's investigations have, however, shed some light on this matter.

The first five works enumerated above, *viz.*, *Golasāra*, *Siddhānta-darpaṇa*, *Candracchāyāgaṇita*, the commentary thereon, and *Tantra-saṅgraha* do not refer to any other work. but are, in their turn, quoted in other works of Nīlakaṇṭha. Of these, the *Tantrasaṅgraha* is the most comprehensive of the five and gives the date of its composition as 1500 A.D., *i.e.*, it was written when the author was fifty-seven. On the above considerations it may be presumed that the other four works were written before this date. The *Grahaṇanirṇaya* and the *Sundararāja-praśnottara*, of which manuscripts have yet to be discovered and which are quoted in the *ĀBh.Bhāṣya*, have also to be ascribed to about this period. This *Bhāṣya*,

---

1. Vatakkumkur, *Hist. of Skt. Lit. in Kerala*, vol. I, p. 389 ; Ulloor, *Kerala Sāhitya Caritram*, vol. II, p. 117.

2. Uloor, *Ibid.*, p. 122.

3. Ms. : Madras, Mal. D. 339, pp. 83-89, now, transferred to the Kerala Univ. Or. Res. Inst. and Mss. Library, Trivandrum.

4. Ulloor, *Kerala Sahitya Caritram*, vol. II, p. 119.

a mature work, Nīlakaṇṭha wrote when he was very old, as he himself remarks : मयाद्य प्रवयसा ··· यथाकथंचिदेव व्याख्यानमारब्धम् (*TSS* 101, p. 156). The *Siddhānta-darpaṇa-vyākhya* which refers to the *Āryabhaṭīya-Bhāṣya*, (*Cf.* com. on verse 25 : एतत् सर्वं मया आर्यभटीयव्याख्याने प्रपञ्चितमिति विरम्यते । see p. 24, below) is still later. And so also his discursive treatise on eclipses which too refers to the *ĀBh.Bhāṣya* more than once ; *cf.* तत्र कालक्रियापादे सूचितं मया विवृतम् (p. 63 of my transcript) ; एतत् सर्वं गणितपादे विस्तरेणोपपादितं । (*ibid*, 63).

Date of Nīlakaṇṭha

Indisputable evidences are available for fixing the date of our author. Śaṅkara, Nīlakaṇṭha's pupil, in his commentary on his teacher's *Tantrasaṅgraha*, points out that the first and last verses of that work contain chronograms specifying the dates of the commencement and of the completion of the work. Thus, after giving the literal meaning of the first verse of the work :

'हे विष्णो निहितं कृत्स्नं' जगत् त्वय्येव कारणे ।
ज्योतिषां ज्योतिषे तस्मै नमो नारायणाय ते ॥

Śaṅkara says : आचार्येण इमं श्लोकं आदितो ब्रुवता प्रथमपादेन प्रबन्धारम्भदिन-कल्यहर्गणश्च अक्षरसंख्यया उपदिष्टः । समाप्तिसमयाहर्गणश्च 'लक्ष्मीशनिहितध्यान' इत्यन्ते भविष्यति ।

These two Kali dates, 16,80,548, and 16,80,553, work out to Kali Year 4601, Mīna 26, and 4602, Meṣa 1, both dates occurring in April 1500.

The *Siddhānta-darpaṇa* and Nīlakaṇṭha's own commentary thereon give, respectively, the year and actual date of his birth. *Cf.* :

Text : कलिसन्ध्याष्टमांशे स्वशतांशाढ्ये गते ततः ।
धनुर्मिथुनयोर्मध्ये प्रायशस्त्वयने उभे ॥
(*Sid. dar.* 18)

Com. : द्वियाब्दशतमिता खलु काले सन्ध्या स्मर्यते । तस्य अष्टमांशः सार्धद्विव्याब्दद्वादशकः । स च सौराब्दानां पञ्चचत्वारिंशत् शतमितः (4500) । तस्य शतांशः पञ्चचत्वारिंशदब्दः (45) । ततः स्वशतांशाढ्यः 'शिवशिवे'ति (4545) कल्यब्दैस्तावति याते उभे अयने उत्तरदक्षिणाख्ये प्रायशो धनुर्मिथुनमध्ये स्तः । तदा

अयनचलनांशाः धनात्मकाः पञ्चदशसंख्या बभूवुः । प्राथिकत्वं च कलाष्टकाधिकत्वात् । यतो भार्गव-परमेश्वराचार्येण अस्मत्परमगुरुणा 'चन्द्रांशास्त्वं' (4536) इति कल्यब्दे परीक्ष्य पञ्चदशांशपूर्तिर्निर्णीता । अतः सन्ध्याष्टमांशशतांशस्य प्राथिकत्वम् । स्वजन्मकालज्ञापनार्थं चैवमुक्तम् । तदा अहर्गणश्च 'त्यजाम्यज्ञतां तर्कैः (16,60,181) **इति ।** (p. 17, below). Here, Nīlakaṇṭha himself says that he was born on the Kali day 16,60,181, which works out to A.D. 1443 Dec. (Kali 4545 Vṛścika).

That Nīlakaṇṭha lived to a ripe old age, even to become a centenarian, is attested by a contemporary reference made of him in a Malayalam work on astrology, *viz.*, the *Praśnasāra* by Mādhava, a Nampūtiri brāhman of the Īñcakkāzhvā house in Kerala, who wrote his work in A.D. 1542-43. Here, Mādhava says that he could count upon reputed authorities like 'Keḷanallūr' to recommend his work. *Cf.* :

> āḷ-āyat-ādaravil ādiyil Attimaṯṯam
> lōkōttaran punar-itinn-iha '*Kēḷanallūr*' /
> ābhāsar allarivatuḷḷavar ādarippān
> porum prasiddhi perikoḷḷavar uṇṭanekam //

The date of composition of this work, *Praśnasāra*, is given as Kali 4644 (A.D. 1542-43) by the following verse in the work itself :

> ezhunūṯṯorupatteṭṭāvatu Kollam atāya nāḷ /
> varunna viṣuvad *bhāvatattvam* (4644) kalyabdam āyatu //

Rightly does Nīlakaṇṭha remark in his *Ā.Bhāṣya* **मयाद्य प्रवयसा ··· ··· यथाकथंचिदेव व्याख्यानमारब्धम्** (*TSS* 101, p. 156). Moreover, we know of at least two more works composed by him subsequent to his writing the *ĀBh.Bhāsya*, *viz.*, the commentary on the *Siddhānta-darpaṇa* and the work on eclipses etc., both of which quote the *ĀBh.Bhāṣya*.

Versatility of Nīlakaṇṭha

For a mere Jyautiṣika and one who had specialised only on its astronomical aspect, Nīlakaṇṭha seems to be very well read. Every other page of his writings substantiate his knowledge of the several branches of Indian philosophy and culture. Sundararāja, the Tamil astronomer, calls him *ṣaḍ-darśanī-pāraṅgata*, 'one who had mastered the six systems of philosophy'.[1] Nīlakaṇṭha himself informs us that he

---

1 *Cf.* his commentary on the *Vākyakaraṇa*,, 5.19 (edn., p. 119).

studied Vedānta under Ravi : *cf., Ravita atta-Vedāntaśāstreṇa.* He can refer to a Mīmāṁsā authority to establish a mathematical point[1] and with equal felicity apply a grammatical dictum to the same purpose.[2] Piṅgala's *Chandas-sūtra*[3] and the lexicons are quoted as the occasion demanded. The scriptures and the Dharmaśāstras also come in for citation.[4] And, so also the Purāṇas[5] like the *Bhāgavata*[6] and the *Viṣṇu.*[7] As for Jyotiṣa works, Nīlakaṇṭha exhibits a surprising familiarity with a large number of them, from the *Vedāṅga-Jyotiṣa* down to the treatises of his own times. He uses all types of jyotiṣa texts, *Gaṇita, Saṁhitā* and *Horā,* but as became his subject of specialisation, his quotations are mainly from texts dealing with astronomy proper. Some of the more important texts of all-India prevalence that Nīlakaṇṭha quotes are : *Vedāṅga-Jyotiṣa, Āryabhaṭīya,* Varāhamihira's *Pañcasiddhāntikā, Bṛhajjātaka* and *Bṛhatsaṁhitā,* the *Sūryasiddhānta,* Śrīpati's *Siddhāntaśekhara* and Muñjāla's *Laghumānasa.* Of texts popular mainly in Kerala may be mentioned the *Parahitagaṇita* or *Grahacāranibandhana* of Haridatta, the *Bhāṣya* by Bhāskara I on the *Āryabhaṭiya* and his *Laghu* and *Mahābhāskarīyas,* Govindasvāmin's *Bhāṣya* on the latter and Parameśvara's super-commentary thereon ; other works of Parameśvara like his *Āryabhaṭīya-vyākhyā* also come in for citation as also passages from his own teacher Dāmodara. Another Kerala author whom Nīlakaṇṭha quotes often is Mādhava, often styled 'Golavid', who

---

1. *Cf. ĀBh.Bhāṣya, TSS* 101, pp. 54, 158, where Pārthasārathi Miśra's *Vyāptinirṇaya* and *Advaitavivaraṇa* and *Ajitā* (com. on *Ślokavārttika*) and its commentary *Vijayā* come in for quotation. On *Golapāda,* 50, the *Bṛhaṭṭīkā* of Kumārila Bhaṭṭa is cited.

2. *Cf.* quotations from the *Vākyapadīya, ĀBh. Bhāṣya, TSS* 110, p. 31.

3. See *ĀBh.Bhāṣya, TSS* 101, p. 4.

4. See com. on *Siddhānta-darpaṇa,* verses 1, 2; the Grahaṇa work pp. 48, 49 ; and *Āryabhaṭīya-bhāṣya, Golapāda,* verse 48, where the *Taittirīya-Āraṇyaka, Ṛgveda, Pārāśarasmṛti, Kālanirṇaya* of Sāyaṇa, *Manusmṛti* etc. are quoted.

5. See *Siddhānta-darpaṇa-vyākhyā,* p. 1.

6. *Cf., ĀBh.Bhāṣya, TSS* 110, pp. 16, 26.

7. *Cf., ibid.,* p. 8.

was a reputed astronomer of the times.[1] Manuscripts of several works quoted by Nīlakaṇṭha are yet to be unearthed and a detailed study of the numerous authorities quoted by Nīlakaṇṭha is bound to throw welcome light on the annals of Hindu astronomy.

Acknowledgements

As mentioned earlier, the textual verses of the *Siddhānta-darpaṇa* had been edited by me with Translation through the pages of the *Adyar Library Bulletin* in 1955. The authorities of the Adyar Library and Research Centre graciously agreed to my using the said edition in the present publication with Commentary. I am extremely grateful to them for this kind gesture. From out of the ten manuscripts made use of in this edition, nine, being five manuscripts of the text, one of the Text with Commentary, and three of the Appendices, belong to the Oriental Research Institute and Mss. Library of the Kerala University, Trivandrum. My thanks are due in full measure to the authorities of this institution for making these manuscripts available for my study. My thanks are due in equal measure also to the India Office Library, London, from whom the tenth manuscript was procured. To Prof. T.S. Kuppanna Sastry, formerly of the Presidency College, Madras, I am indebted for the interest he took in the work and the help and advice he gave towards its edition and translation. True to form, the V.V.R.I. Press have done their work with painstaking care. Full credit is due to them in this regard.

K.V. SARMA

Vishveshvaranand Institute,
Panjab University, Hoshiarpur,
'Independence Day',
August 15, 1976

---

1. On this Mādhava, (*c.* 1340-1425), who was a teacher of Parameśvara, see the present writer's Introduction to his edition of Mādhava's *Veṇvāroha*, (Trippunithura, Cochin, 1957), and *Sphuṭacandrāpti*, (Hoshiarpur, 1973).

नीलकण्ठ-सोमयाजि-विरचितम्

सिद्धान्तदर्पणम्

ग्रन्थकर्तृप्रणीतया व्याख्यया समेतम्

[मङ्गलाचरणम्]

[1]श्रीमद्दामोदरं नत्वा भगवन्तं रविं तथा ।
तत्प्रसादान्मया लब्धं ज्योतिश्चरितमुच्यते ॥ १ ॥

[व्याख्या]

·········य]स्माद्[1] ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयः, तदर्थश्च ज्ञातव्यः' (तैत्तिरीय-आरण्यकम्, २.१५), इति, तस्माद् ब्राह्मणेन विहिताननुष्ठाननिमित्तात् प्रत्यवायाद् बिभ्यता अवश्यमध्येयानि[2] शिक्षादि-षडङ्गानि इति सिद्धम् ॥१॥

मूलम्— 1. Mss. used : **A** (Ms. No. 475-D), **B** (No. 5867-C), **C** (No. C. 1869-C), **D** (No. C. 1024-F), **E** (No. 8358-I), (all from the Kerala Univ. Or. Res. Inst. and Mss. Library, Trivandrum, **F** (No. 6302) from the India Office, London and **G** (No. 975) from Trivandrum Palace Collection.

व्याख्या—1. The only available manuscript of the work (Trivandrum Palace Collection, Ms. No. 975), commences from here, the first folio containing the beginning of the commentary having been lost.

2. Ms. reads ध्येयानीति

१. उपदेशभागः

[ग्रहपर्ययाः]

[1]'कोटिघ्न-रदवेदाः'[2] प्राक् कल्पे सूर्यस्य पर्ययाः[3] ।
'भूदन्तरददेवेषु[4]'सप्ताद्यूर्था' विधोः, क्षितेः ॥ २ ॥

अथ चतुर्भिः श्लोकैः सूर्यादीनां कल्पपर्ययाः प्रदर्श्यन्ते—

432,00,00,000
कोटिघ्न-रदवेदाः प्राक् कल्पे सूर्यस्य पर्यय[ा]ः ॥ २a ॥

इति । ये प्राग्गत्या सूर्यादीनां स्वस्ववृत्तपर्यय[ा]ः ते **कल्पे** एतावन्तः स्युः इत्यर्थः । तत्र **कोटिघ्ना रदवेदाः सूर्यस्य पर्यया** भगणाः । अश्विन्यादिपौष्णान्तो भगणः । ननु मेषादिमीनान्तो भगण इति कुतो न व्याख्यायते ?

तेषां तु [परिवर्तन][1] पौष्णान्ते भगणः स्मृतः ।

इति **सूर्यसिद्धान्तोक्तेः** (२. २७), इह 'भ'शब्दस्य नक्षत्रवाचकत्वात् । राशिवाचकत्वे हि मेषादिमीनान्तत्वं स्यात् । यद्यपि—

पुनर्द्वादशधात्मानं विभेजे राशिसंज्ञितम् ॥
नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी ।
(सूर्यसि० १२. २४-२५)

इत्युभयेषां कालपुरुषावयवत्वमविशिष्टम्, तथापि समूहवाचिना गणशब्देनाभिधानं नक्षत्रगणस्यैव [यु]क्तम्, अधिकसंख्यात्वात्; न राशिगणस्य अन्यस्मादल्पसंख्यत्वादिति भावः । अथवा राशिभ्यो नक्षत्राणां प्रसिद्धतर[त्वाद्] ग्रहणं युक्तम् । प्रसिद्धतरत्वं च तेषां [क]ल्याणाकल्याणभेदात्, तज्ज्ञानस्य कर्मसूपयोगभूयस्त्वाद् इत्याशयः ।

मूलम्— 1. G. available only from here.
2. वेदार्काः (wr.)
3. G. पर्ययः; so also in the comments, below.
4. B. F. G. वेदेषु (wr.) ; G. however, gives the number correctly as 533 in the commentary.

व्याख्या—1. G. reads परिध्यूने for परिवर्तन

रविभगणाः कोटिघ्न-रदवेदा एव, न न्यूनाधिकाः । न हि रविभगणनाम् आचार्यैः नानावचनं युक्तम् ।

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् ।
दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः ॥

तत्प्रमाणैः शतैः सन्ध्या पूर्वा तत्राभिधीयते ।
सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरं हि सः ॥

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः ।
रात्री युगसहस्राणां तेऽहोरात्रविदो जनाः ॥

इत्यादिभिः पुराणेतिहासस्मृतिषु व्यवस्थापितत्वाद् युगाब्दानाम् । रविभगणस्यैव हि देवासुराहोरात्रत्वम् ।

देवासुराणामन्योन्यमहोरात्रं विपर्ययात् ।
(सूर्यसि० १.१४ ; १४.२०)

इति द्युनिशोर्व्यत्यासे सत्यपि नाहोरात्रपरिमाणभेदः । उत्तरायणमध्ये विषुवत्संज्ञे काले देवानामुदयः । तदेवासुराणामस्तमयश्च । दक्षिणायनमध्ये विषुवति देवानामस्तमयोऽसुराणामुदयश्चेति भेदः ।

ननु उत्तरायणं कृत्स्नं देवानामहः, दक्षिणायनं रात्रिश्च—

शिशिरपूर्वमृतुत्रयमुत्तरं ह्ययनमाहुरहश्च तदापरम् ।
भवति दक्षिणमन्यदृतुत्रयं निगदितो रजनी मरुतां च सा ॥

इत्यादिस्मृतेः । नैष दोषः । तत्राप्युन्नतकालो दिनत्वेन व्यवस्थितः, रात्रिकालश्च रात्रितया ।

आ मध्याह्नादार्धरात्राद् दिवा रात्रिरिति क्रमात् ।

इति पाराशरे दृश्यकालो दिनत्वेन विवक्षितः, अदृश्यकालो रात्रिश्च । यतोऽर्धरात्रे रवेर्दिनबलं शून्यम्, ततः क्रमेण वर्धमानं मध्याह्ने परिपूर्णं स्यात् । ततः क्रमेण हीयमानं अर्धरात्रे शून्यतां याति, इति बलनिरूपणावस्थायामेव आरोहणकालस्य दिवाख्या, अवरोहणकालस्य रात्र्याख्या च । उत्तरायणं च देवानामुन्नतिकालः; दक्षिणायने रवेरवनतिश्च, मेरुसंस्थत्वात् तेषाम् ।

उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् ।
हृद्रोगं मम सूर्यः हरिमाणं च नाशय ।

उदगादयमादित्यो विश्वेन सहसा सह ।
द्विषन्तं मह्यं रन्धयन् मो अहं द्विषते रधम् ॥
(ऋग्वेदः, १.५०.११, १३)

इत्यादि मन्त्रवर्णतश्च आरोहतः सूर्यस्य इष्टफलप्रदत्वं बलवृद्धिश्चावगम्यते । अतो युज्यत एव देवभागस्थान् प्रति उत्तरायणे अभीष्टफलप्रदत्वं रवेः । दक्षिणायने चासुरभागोद्‌गमनात् तदपेक्षया बलवृद्धेः तदिष्टफलप्रदत्वाद् अनिष्टफलप्रदत्वं च नो युज्यते, 'द्विषन्तोऽन्योन्यमाश्रिताः' इत्युक्तेः । तस्मात् 'उत्तरायणे कृतमुपनयनादिकं इष्टप्राप्तये, दक्षिणायने अनिष्टप्राप्तये च स्यात्'। इत्युदगयनादिविधेः प्रशंसार्थमेव उत्तरायणस्य दिवाऽख्यत्ववचनमित्यविरोधः । 'विषुवतोरुदयास्तमयेन देवासुराणाम्' इति यदुक्तं तद् युक्तमेव ।

सुरासुराणामन्योन्यमहोरात्रं विपर्ययात् ।
(सूर्यसि० १.१४; १४.२२)

इति चोपपद्यते । एवं रविभगणस्य दिव्याहोरात्रत्वाद् रविभगणानां षष्ट्युत्तरशतत्रयमेव दिव्यं वर्षम् । उक्तं च—

षष्टिसङ्गुणं (? गुणितं) दिव्यं वर्षमासुरमेव च ।
तद्द्वादशसहस्राणि चतुर्युगमुदाहृतम् ॥

सूर्याब्दसंख्यया द्वित्रिसागरैरयुताहतैः ।
सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम् ॥

इति युगरविभगणानां व्यवस्थितत्वात् केनचिदपि नावापोद्वापौ कार्यौ । अतः कल्पभगणा अपि कोटिघ्नरदवेदा एव सर्वैर्वाच्याः, युगसहस्रात्मकत्वात् कल्पाख्यस्य ब्रह्मदिवस्य ।

य[तश्चा]ब्दा भटस्यापि द्वित्रिवेदहतायुताः ।
युगानां तन्मते कल्पे त्वष्टोत्तरसह[स्रकाः] ।
435,456
कल्पार्काब्दास्ततोऽस्या'ङ्गेष्वब्धिभूताग्निसागराः' ।
कृतादीनां चतुर्णां स्यात् तुल्यत्वाद् युगपादता ॥
432,00,00,000
'अह्नीनेन ननानेद्रे गावः' कल्पेऽर्कपर्ययाः ॥

'खखेषुगोगुणाष्टाश्वाग्न्यशिवद्व्यष्टशरेन्दवः' ।
'सप्ताग्न्येकाशिवषण्णागरसाङ्काकृतयो'ऽसृजः ॥ ३ ॥

[1]स्वबृत्तेऽ'र्थाश्वभूखार्काद्रिद्व्यग्न्यङ्कात्यष्टयो' विदुः ।
गुरो'रीशाङ्कखाङ्गैकवेदाङ्ग'[2]शिखिनः', कवेः ॥ ४ ॥

[3]'द्वीष्वर्थाभ्रभनेत्राग्निखागा'[4], लङ्कोदयाच्छनेः ।
'नृपाशाश्वेषु तर्केन्द्रा', भुवोऽन्ये वारपा ग्रहाः ॥ ५ ॥

57,75,33,32,321
भूदन्तरददेवेषुसप्ताद्यूर्था विधोः, क्षितेः ॥ 2b ॥
57,75,33,32,321
'यत्राम्बुखण्डबिम्बे मृतसच्छांशो' शशिनस्तथा ॥

15,82,23,78,39,500
खखेषुगोगुणाष्टाश्वाग्न्यशिवद्व्यष्टशरेन्दवः ॥ ३a ॥

इति ।

क्षितेः कल्पे प्राग्भ्रमणसंख्या भानां क्षित्यपेक्षया प्रत्यग्भ्रमणसंख्याः । उभयथापि ग्रहकर्मणि न विशेष इत्यभिप्रायः । अतएव 'भोदया' [इति] उच्यन्ते । यतो भूभ्रमाद् यावन्तः कल्पे तावत्कृत्वो भान्युद्यन्ति । भोदयेभ्यस्तत्तद्भगणानपास्य ग्रहाणामुदयश्च ज्ञेयाः । उक्तं च—

भोदया भगणैः स्वैः स्वैरूना स्वस्वोदया युगे ।

(सूर्यसि० १.३३)

इति ।

मूलम्— 1. A. B. read this line as : ज्ञस्यार्काश्विखाब्ध्यगाभ्राद्रित्र्यङ्काद्येका स्वमण्डले । which also gives the figure given in verse 1 of Appendix I, below. The reading adopted in the edition is the one given in the author's commentary.

2. F. वेदाग (wr.)

3. G. gives a corrupt but variant reading : चकरर्थाकखभाश्वक्षि ।

4. F. खांगा (corrupt)

कुतः पुनर्भोदयाः स्वभगणोनाः स्वोदयाः स्युः ? भचक्रभ्रमण-विपरीतदिक्त्वात् ग्रहभ्रमणस्य । भचक्रं हि प्रत्यग् भ्रमति । ग्रहास्तु तत्र भचक्रे प्राङ्मुखा भ्रमन्ति । अतो युज्यत एव भानां प्रत्यग्भ्रमणसंख्यातो ग्रहस्य प्राग्भ्रमणसंख्यान्यूनत्वं स्वस्य प्रत्यग्भ्रमणानाम् । तस्माद् रविभगणोना आर्क्षदिवसा सावनाः स्युः । यतो भानोः प्रत्यग्भ्रमः सावनो दिवसः, [स] एव भूदिवसश्च । यथोक्तम्—

उदयादुदयं भा[नोः] भूमिसावनवासराः ।

(सूर्यसि० १.३६)

इति । तस्मादिहोक्ता भूपर्यया एव आर्क्षदिवससंख्या । स हि रविभगणोनो सावनसंख्या ।

15,82,23,78,39,500

'अनुमाधोगहंसागुप्रग्रहे मध्य' आर्क्षजा ।

15,77,91,78,39,500

'स्नाने शुद्धिर्गृहस्थस्य धीस्था सा मर्त्य'सावनाः ॥

कल्पार्कभगणानिन्दोर्भगणेभ्यो विशोध्य तु ।
ज्ञेयाश्चन्द्रमसो मासा,स्त्यक्त्वा सौरांस्ततोऽधिकाः ॥

भवेयुर्दिवसा, मासाः सर्वेषां त्रिंशता हताः ।
सावनाहानि चान्द्रेभ्यो द्युभ्यः प्रोह्य तिथिक्षयाः ॥

इतिहासपुराणेभ्यो लोकाच्चातीतवत्सराः ।
वक्ष्यत्यत्रापि यातानि युगान्यब्दांश्च तद्गतान् ।

"युगं कल्पसहस्रांशो मनुस्तान्येकसप्ततिः ।
सन्धयः कृततुल्यास्तदाद्यन्ताभ्यन्तरेष्वपि ॥

युगस्यापि दशांशोऽब्धित्रिद्व्येकघ्नः कृतादि च ।
अष्टाविंशे युगे तिष्यः सप्तमस्य मनोरयम् ॥"

(सि० दर्पणम्, ११-१२)

इत्यतो वर्तमानात् प्राक् कलेः काल इहोदितः ।
कलेर्यातं गुरोर्ज्ञात्वा फाल्गुनान्ते मुहुः स्वयम् ॥

अत्र तावत् क्षिपेदेकं सौराब्दांस्ताननुस्मरेत् ।
द्वापरान्तं प्रसंख्याय संख्यामेकत्र पिण्डयेत् ॥
चतुर्युगदशांशान् वा द्वापरान्तगतान् न्यसेत् ।
6
मन्वन्तरयुगान्येकसप्तति गुणयेद् रसैः ॥

सप्तमस्य मनोर्याता युगानां सप्तविंशतिम् ।
10
क्षिप्त्वा च गुणयेद् दिग्भिः, सप्तसन्धिकृतैर्युतान् ।
अष्टाविंशयुगे यातान् दशांशान् नव योजयेत् ।
426
यद्वोत्कृतिकृतैस्तुल्ये षण्मनूनां चतुर्युगे ।
10
क्षिप्त्वाष्टाविंशतिं दिग्भिर्हत्वा रूपं विशोध्य च ।
4
कृतघ्नसप्तसन्धीनां क्षेपोऽष्टाविंशतेरिह ॥

4567
'सितः शिवा' इतीष्टाऽत्र कल्पादिध्रुवसाधने ।
प्रमाणमयुतं कल्पे चतुर्युगदशांशकाः ।
4567 10,000
हत्वा 'सितशिवै.' काल्पं 'नानाज्ञानकु'बुद्धृतम् ।
द्वापरान्ताधिमासादि ग्रहपातोच्चमध्यमम् ॥

द्युगणेऽप्येवमानीते योजयेत् कल्पहर्गणम् ।
432,000
यद्वा युगदशांशाब्दो सहस्रघ्नरदाब्धिभिः ।
4567
क्षुण्णे 'सितशिवे' युक्त्वा कल्यब्दद्युगणे नयेत् ।
197,29,44,000
नाकत्रयाब्धिकृताङ्काश्विसप्तातिधृतयः[1] कृताः ॥

सौराब्दा द्वापरान्तेऽत्र व्यासादिमुनिसम्मताः ।
पृथक् कल्पादिमासघ्ना हृता कल्पाधिमासकैः ॥

व्याख्या—1. The ms. reads धृतयोः

15,93,33,32,321
'पष्ठेद् गुरोर्बली बोद्धुं शिष्यः,' कल्पाधिमासकाः ।
51,84,00,00,000
'आनूनज्ञानिनं नत्वा दर्पणे' मास उष्णगोः ॥

लब्धाधिमासकान् युक्त्वा प्रथमस्थेषु दिनीकृताः ।
मासयातदिनैर्युक्ताः पृथक् कल्पावमाहृताः ॥

कल्पचान्द्रदिनैर्भक्ताः शोध्या स्युरवमागताः ।
प्रथमर्क्षात् सावनः शेषो द्युगणोऽर्कोदयावधि ॥

सप्तभिः क्षुभितः, शेषः सूर्याद्यो वासरेश्वरः ।
160,29,99,69,630
'उद्गता धीस्तु धद्धा धीरा इति कि'मु[ता]क्षरैः ॥

तिथयः, कल्पजे याभ्यः सावने शोधितेऽबलाः ।
53,43,33,32,321
'यत्र गात्रबलं बाले स्वो गुणे'श्चान्द्रमासकाः ॥

25,08,21,30,130
'[उ]ल्लेखयानां लयं राजन्नमरा' दर्पणावमाः ।
63,12,61,50,712
'श्रेयसे नौमिका चन्द्रकलान्तो' द्वापरान्तजः ॥

7,20,63,50,77,300
'ज्ञानगाथार्थिनां शूली तनुरच्छा'गतं दिनम् ।
शोध्या मध्यमसंक्रान्तावेकविंशतिनाडिका ॥

रात्रौ नाड्यां नवम्यां तं रविपर्ययपूरणम् ।
पूर्णे वा द्युगणे प्रोक्ते शुक्रवाराद्यहर्गणः ॥

क्षिप्त्वा कलिगतं ज्ञेयः कल्पयातोऽर्कवारतः ।
उदयावधिकोऽत्रेष्ठा ग्रहपातादिमध्यमे ।
फलं स्वभगणास्तेषां प्रमाणं कल्पभूदिनम् ॥

2,29,68,62,137
'सप्ताग्न्येकाग्निवषण्णागरसाङ्काकृतयो'ऽसृजः ॥ ३८ ॥

2,29,68,62,137

'सालोक्या: श्रितवीप्तोद्धा वक्रा' कल्पे कुजस्य च ॥

17,93,71,20,175

स्ववृत्ते'ऽर्थाश्विभूखार्काद्रिधगन्यङ्कात्यष्टयो' विदु: ॥ ४a ॥

17,93,71,20,175

'मासपक्षा रयो स्थूलधीसाध्या' बुधपर्ययाः ॥

स्ववृत्ते इत्यनेनान्येषामिव बुधशुक्रयोरपि स्वबिम्बगत्या स्ववृत्तपरिपूरणसंख्या एवात्र निर्दिष्टा भगणा:, न तु तयो: शीघ्रोच्चस्य ।

ताराग्रहाणां सर्वेषां शीघ्रोच्चं रविरेव हि ।

गोलयुक्त्योपरिष्टात्तत् स्फुटे स्पष्टीभविष्यति ॥

36,41,60,611

गुरो'रीशाङ्कखाङ्कैकवेदाङ्कशिखिन:', कवे: ॥ ४b ॥

36,41,60,611

'कल्पान्तोनोच्चपर्वाग्निफलीना' जीवस्य पर्ययाः ॥

7,02,22,70,552

[1][द्विशरार्था]खभाश्व्यक्षिखागा लङ्कोदयात्, शने: ॥ ५a ॥

7,02,22,70,552

'प्रमाणज्ञ: सुरश्रेष्ठनाथा:' कल्पाच्छपर्ययाः ॥

[ल]**ङ्कोदया**दिति सर्वत्र संबध्यते । लङ्कायां मीनमेषसन्ध्युदये तत एव सूर्यादीनां स्वस्व[क]क्ष्यासु भ्रमण[प्र]वृत्ति: । चन्द्रादिपातानां मीनान्तात् प्रभृति प्रतिलोमभ्रम[ण]प्रवृत्तिश्च । द्वितीयपातानां कन्यान्ताच्च ।

14,65,71,016

'नृपाशाश्वेषु तर्केन्द्रा', भुवोऽन्ये वारपा ग्रहाः ॥ ५b ॥

14,65,71,016

'तपनाद्या: समन्ताद् भे व्योम्नि' मन्दस्य पर्ययाः ॥

भुवोऽन्ये वारपा ग्रहा:[2] तेष्वप्यनयो: मध्यगतेषु मध्ये भुवं क्षितिं विना येऽन्ये सप्त ते ग्रहा: क्रमेण वाराधिपा: स्यु: ।

व्याख्या—1. The ms. reads चकरर्थाक for द्विशरार्था

2. Ms. Hapl. repetition of तपनार्क्यो: (?द्या:) सम here.

ननु रवेः इतरेभ्यः प्राधान्यात् (? प्राथम्यम्)। चन्द्रस्य द्वितीय[त्व]-मप्यस्तु। कुतः पुनः कुजस्य तृतीयत्वम्? सर्वेभ्योऽल्पत्वाच्चरमत्वमेव युज्यते। भृगु-गुरु-बुध-शनि-भौमानामेव क्रमेण तृतीयादित्वमुपपद्यते।

नवभिर्भूगोस्तंद्व्यधिकैर्द्व्यधिकैर्यथा श्लक्ष्णा.।

(आर्यभटीयम्, गोल० ४)

इत्युक्तेः। निसर्गबलक्रमश्च [स][1] एव। तस्माद् वारपत्वक्रमेणापि तेनैव भवितव्यम्। नैतदस्ति। काल-होरा-दिनाद्याधिपत्यं कक्ष्यात्मानुसार्येव[2] स्मर्यते—

भानामधः शनैश्चर-सुरगुरु-भौम-र्क-शुक्र-बुध-चन्द्राः।

तेषामधश्च भूमिर्मेधीभूता खमध्यस्था॥

सप्तैते होरेशाः शनैश्चराद्या यथाक्रमं शीघ्राः।

शीघ्रक्रमाच्चतुर्था भवन्ति सूर्योदयाद् दिनपाः॥

(आर्यभटीयम्, काल० १५-१६)

इति। दिनाधिपत्यस्य किल होराक्रमेण चतुर्थत्वमपि तत्तद्दिनाद्यकालहोरेशस्य वारेशत्वादेव स्यात्। यतः अहोरात्रकाले कालहोराश्चतुर्विंशतिः सन्ति। [ताभ्यः][3] एकविंशत्यैव त्रिः परिवृत्तौ। शिष्टानां तिसृणां चतुर्थावृत्तिगतानां पूर्वास्विव तदहोरात्राद्यकालहोरेशात्प्रभृति शीघ्रक्रमेण त्रयाणां ग्रहाणां परेद्युरुदयात्प्रागेवातीताः [होराः]स्युः। या पुनश्चतुर्थी परेद्युराद्या कालहोरा तदीशः पूर्वेद्युराद्यकालहोरेशात्प्रभृति कक्ष्याक्रमश्चतुर्थं इति क्रमप्राप्तमेव परेद्युः पूर्ववारेशात्प्रभृति कक्ष्याक्रमेण चतुर्थस्य वाराधिपत्यम्। अत एव सूर्यानन्तरं चन्द्रस्य, न पुनस्ताराग्रहेभ्यः, प्रकृष्टप्रकाशत्वात्। चातुर्थ्यं च शीघ्रक्रमापेक्षया। अर्काच्चन्द्रस्य यतोऽर्कगतेर्महती शुक्रगतिः स्यात्, ततोऽपि महती बुधस्य, ततोऽपि चन्द्रस्य, इत्यर्कशुक्रबुधचन्द्राणां क्रमाच्छीघ्रगतित्वात् क्रमेण अर्काच्चतुर्थश्चन्द्रमाः। एवं कालहोराक्रमत्वम्। वारेशानां कालहोराक्रमश्च कक्ष्याक्रमवशादित्यवगन्तव्यम् इत्यभिप्रायात्(? प्रायः)।

द्वि नव द्वादशांशो मता कालहोरा पतिस्तस्य पूर्वस्य वाराधिनाथः।

ततः षष्ठषष्ठा क्रमेणेतरेषां निशायां तु वारेश्वरात् पञ्चमाद्याः॥

इति यदुक्तं तत्र निमित्तनिमित्तिनोर्व्यत्यासः स्यात्।

व्याख्या—1. Ms. reads ता for स

2. Ms. reads : कक्ष्यात्मा एवानुसारेव

3. Ms. reads ता स्युः for ताभ्यः

[मन्दोच्चपर्ययाः पातपर्ययाश्च]

तेषां 'त्रीष्वग्नयोऽष्टैक[1]सुरार्काष्टाहिसागराः' ।
मन्दोच्चानां 'कृतेष्वश्वा' 'वेदतानाः' 'कुखर्वतः' ॥ ६ ॥

---

[1]एकस्तत्र कला ··· ··· ··· होराक्रमे वा । क्रमो निमित्तत्वेनोक्तः । वस्तुतस्तु वारक्रमे कालहोराक्रमस्यैव निमित्तत्वम् इति तान्मात्रश्रव[णे][2] गम्यगमकयोर्व्यत्यासः प्रतीये[त] । तस्मात् शास्त्राभ्यासा[भ्य]सितसंस्कार-वाण्यनुसारिणी तदुक्तिः । निशायां तु वारेश्वरपञ्चमाद्यत्वमपि कक्ष्याक्रम-प्राप्तमेव । यतोऽर्कवारे द्वितीया[वृत्तौ गते][3] अर्कशुक्रबुधचन्द्रशनीनां जीवैव (?) गता । ततो षष्ठी निशायामाद्या । तस्मात् कक्ष्याक्रमेणैव होरेशा गण्याः । तथा च लाघवं स्यात् । मासाधिपत्यं च सावनमासारम्भकालहोरेशस्य । अब्दाधिपत्यं च सावनाब्दप्रथमदिनाद्यहोरेशस्य ।

त्रयोदशदिनेनोनं कलियातदिनं भजेत् ।
360
त्रिशता, खांशरामैश्च द्वित्रिघ्नं सप्तभिर्हृतम् ॥
मासपो वर्षपस्तमादित्युक्तं जातके **यतः ॥**

353 48,81,23,318
तेषां 'त्रीष्वग्नयो''ष्टैकसुराकष्टिाहिसागराः' ।
754 494 601
मन्दोच्चानां 'कृतेष्वश्वा' 'वेदताना' 'कुखर्तवः' ॥६॥
272 54 23,22,96,745
'द्विभान्य''ब्धीषवो'ऽ'र्थाब्ध्यद्यूङ्गाङ्काश्विरदाश्विनः'[4] ॥ ७a ॥

मूलम्— 1. D. F. का for क

व्याख्या—1. Ms. defective. It reads : एतस्तत्र कना -gap- होरा

2. The Ms. reads श्रवश्रे for श्रवणे

3. Ms. reads वृत्तेगे for वृत्तौ गते

4. The Ms. exhibits a big gap from here to a part of the com. on verse 16, below p. 13.

'द्विमान्य''ब्धीषवो'[1]'ऽर्थाब्ध्यग्यङ्का'[2]'ङ्काश्विरदाश्विनः'।
[3]'वेदाग्नीभा''द्विशून्याङ्का'[4]'स्तत्त्वेभा' 'ऋतुषट्स्वराः' ॥ ७ ॥

प्रत्यग'श्वेष्वगा'श्चन्द्रात् पातानां ; तद्ग्रहान्तरात् ।

[परमविक्षेपकलाः]

[5]धृत्य-ङ्ग-मूर्च्छना-ऽब्धी-श-नागाः स्वांशाङ्घ्रयोऽर्धयोः[6] ॥ ८ ॥

क्षेपा मन्दोच्चवृत्तानां ;

[मन्दपरिधयः शीघ्रपरिधयश्च]

स्वांशैस्तान्यार्धपञ्चमैः ।
त्र्य-श्वा-ष्टी-न्द्रा-हि-रामा-शाः सूर्यात् ; शैघ्राणि भूसुतात् ॥ ९ ॥

'त्र्यर्था' 'रूपगुणा' 'भूपा' 'गोबाणा' 'नव' तुङ्गतः ।
द्वि-द्व्ये-क-द्व्ये-क-हीनास्तेऽप्योजयुग्मपदादिषु ॥ १० ॥

[युगमानम्]

युगं कल्पसहस्रांशो मनुस्तान्येकसप्ततिः ।
सन्धयः कृततुल्यास्तदाद्यन्ताभ्यन्तरेष्वपि[7] ॥ ११ ॥

मूलम्— 1. D. E. F. द्विभाग्न्य इषवो (corrupt).

2. A. र्थाह्यश्वाङ्का ; B. C. र्थाब्ध्यश्वाङ्का ; D. E. F. र्थाश्वाग्र्यङ्का (corrupt).

3. G. verses 7c-16 broken away.

4. D. F. शून्याङ्क

5. A. 8c to 12 frayed out.

6. D. F. स्वांशाङ्घ्रियोः (corrupt).

7, D. E. F. न्तरेष्विति

युगस्यापि दशांशोऽब्धि-त्रि-द्वये-क-घ्नः कृतादि च ।
अष्टाविंशे[1] युगे[2] तिष्यः सप्तमस्य मनोरयम् ॥ १२ ॥

[भगणांशाः]

द्वादश-त्रिंश-षष्ट्यंशा भगणाद् भांशलिप्तिकाः ।

[ग्रहयोजनभुक्तिः]

[3]ग्रहयोजनभुक्तिः स्याद् दशघ्नेन्दोः[4] कलागतिः ॥ १३ ॥

[भूमीन्दुरविव्यासाः]

भूगोलः[5] 'खेषुदिग्व्यासो' भमध्ये व्योम्न्यधः स्थितः[6] ।
'तिथ्यग्नि'[7]योजनश्चन्द्रो 'दिग्वेदाब्धि'मितो रविः ॥ १४ ॥

[अवन्तीस्थानम्]

उदक् पञ्चदशेऽवन्ती लङ्कायाः परिधेर्भुवः ।

[नक्षत्रपरिधिः]

रवेः षष्टिगुणे[8] भानि प्रत्यगीरयति ह्यतः ॥ १५ ॥

[अपक्रमवृत्तस्थितिः]

भगोलमध्यवृत्तार्धे वायुगोलस्य मध्यतः ।
अपक्रान्ते चतुर्विंशत्यंशैः सौम्यतराशयोः[9] ॥ १६ ॥

... ... [1]तेषां द्वादशाराणामन्तरालगता ये द्वादशापक्रममण्डलखण्डाः तेषामेव न केवलं मेषादिराशित्वम् । तं तं खण्डमभितः यद्यद् द्वयोर्द्वयोर्मण्डलतलार्धयोर्विवरं तत् कृत्स्नमपि तत्तद्राश्यात्मकमेव ।

मूलम् — 1. F. अष्टविंशे 2. D. E. F. युगो
3. D. दश for ग्रह (corrupt). Ms. C commences from here.
4. C. न्दु for न्दो 5. D. F. भूगोलं (wr.)
6. D. स्थिति: (wr.) 7. E. त्रिथ्यग्नि (corrupt)
8. A. षष्टिगुणो 9. D. E. तरांशयो:

व्याख्या—1. Ms. commences here after the gap.

[अयनचलनम्]

'भां'शैश्चलति तद्योगः प्राक्प्रतीच्योः पृथक् पृथक् ।
वृद्धिह्रासश्च दिव्याब्दैः पञ्चभिश्च क्रमोत्क्रमात् ॥ १७ ॥

तत्र निरक्षदेशे मीनमेषसन्ध्युदये पूर्वोक्तानि तन्मण्डलानि अपमण्डल-तिर्यञ्चि बध्नीयात् । तानि षड अपमण्डलतुल्यान्येव । तेष्वेकं पूर्वापर-स्वस्तिकलग्नं उत्तरस्वस्तिकादूर्ध्वं दक्षिणस्वस्तिकादधश्च दक्षिणोत्तरमण्डले परमापक्रमतुल्यान्तरे बध्नीयात् । द्वितीयमपि दक्षिणोत्तरमण्डले प्रथममण्डल-सम्पात एव सम्पातं कृत्वा अपक्रममण्डले मेषान्ते तुलान्ते च बध्नीयात् । तयोः प्राग्दिग्गतमन्तरालं कृत्स्नं मेषादिराशिः, प्रत्यग्गतं कृत्स्नं तुलादिराशिः । प्रथमद्वितीयसम्पातयोरेव च तृतीयमपि वृषकीटान्तयोर्बध्नीयात् । एवमेव अन्यानि त्रीण्यपि अपक्रममण्डलद्वादशांशान्तरालानि बध्नीयात् । एवं द्वादशविवराणि कृत्स्नशो द्वादश राशयः स्युः । अत उक्तम्—

यत्र क्वापि च दृष्टं ज्योतिर्मेषादिराशिगं तस्मात् ।
(गोलसारः, २. ८ c-d) ॥ १६ ॥

तत्र भगोलावयवानां वायुगोलावयवैः सह सम्बन्धो न नियत इति वायुगोलावयवेषु भगोलावयवानां संयोगविप्रयोगप्रकारः प्रदर्श्यते—

27
'भां'शैश्चलति तद्योगः प्राक्प्रतीच्योः पृथक् पृथक् ।
वृद्धिह्रासश्च दिव्याब्दैः पञ्चभिश्च क्रमोत्क्रमात् ॥१७॥

इति ।

तद्योगः प्रकृतयोर्घटिकापक्रममण्डलयोर्योगः चलति स्पन्दते । कथम् ? प्राक्प्रतीच्योः पृथक् पृथक् भांशैश्चलति । स यदा प्राक् चलति तदा अयनचलनम् ऋणम् । तत् सप्तविंशतिभागान्तम् । तथा प्रत्यक् चलनं धन[मपि][1] तावत् स्यात् । एवम् मीनमेषसन्धिमभितः चतुष्पञ्चाशद्भागानां घटिकामण्डलगतै-स्तावद्भिरंशैः सम्बन्धः स्यात् । एवं जूककन्यागतानामपि तावतां तावद्भि-र्घटिकामण्डलांशैः सह संयोगः स्यात् । कियता कालेन सप्तविंशतिभागचलनं इत्याह—

वृद्धिह्रासश्च दिव्याब्दैः पञ्चभिश्च क्रमोत्क्रमात् ॥ १७ b ॥

व्याख्या—1. Ms. ऋणम — for धनमपि

पञ्चभिर्दिव्याब्दैः ऋणं परिपूर्णं स्यात्। पुनश्च पञ्चभिः कृत्स्नस्य क्षयश्च स्यात्। एवमात्मकमपि ऋणं धनं वा यावता कालेन यावद् वर्धते तत् पुनरुत्क्रमेण तावता कालेन तावद्धीयते। पञ्चमे दिव्याब्दे यावती वृद्धिः षष्ठे ह्रासश्च तावानेव इत्यादि द्रष्टव्यम्। तेन विषुवत्प्रत्यासन्नानां नक्षत्राणां दक्षिणोत्तरदिक्चलनं ईषदधिकमेव विंशतिभागात्मकं स्यात्। तत्र चित्रायाः कन्यातुलासन्धिस्थत्वाद् अयनचलनाभावे भुजाया अप्यभावात् कन्यातुला-सन्धेरपक्रमस्याप्यभावः। ततश्चित्रायाः स्वक्षेप एवापक्रमः। तद्विक्षेपचापं च भागद्वयं सूर्यसिद्धान्ते स्मर्यते याम्यदिक्का—"दक्षिणे रुद्रयमलाः" (सूर्यसि० ८.७) इति। हस्तचित्रयोः क्रमेण एकादशभागा भागद्वयं च क्रमाद् विक्षेपावित्यर्थः।

ऋणात्मकायनचलनपरिपूर्तौ तु राशिषट्काद् भांशेषु त्यक्तेषु भाग-त्रयाढ्यं राशिपञ्चकं शिष्यते। तत उदग्गोलगतस्तदपक्रमः। तद्भुजा च राश्यष्टमांशतुल्यचापभागसप्तकः सपञ्चमांशः[1]।

अत्र सप्तममपक्रमचापं करोतीति तदन्तरं च द्व्यशीतिः। तत्पञ्चमांशः षोडशकलाः सावयवाः। तत्संयुक्तं 'सङ्कृतम्' (६३७') इति। तद्विक्षेपचापयोः दिग्भेदात् ततो भागद्वयगते विक्षेपे त्यक्ते सति शिष्टं अष्टौ भागाः, षट्त्रिंशत् कलाश्च (८° ३७')।

धनायनचलने परिपूर्णे तु दक्षिणगोलगतं भुजाचापम्। अपक्रमचापं च पूर्वोक्तमेव। तद्विक्षेपयोर्दिगैक्यात् तत्संयोगस्फुटो दक्षिणापक्रमः, द्वादश भागाः सप्तत्रिंशत्कलाश्च (१२° ३७'). ततस्तत्संयोगः सपादा एकविंशति भागाः। परमायनचलनकालयोर्मध्याह्नप्रदेशान्तरालचापं तद्दक्षिणोत्तरमण्डल-गतं कृत्स्नं सममण्डलाद् दक्षिणगतमेव प्रायशो भारतखण्डे। कन्याकुमार्या दक्षिणतः सिंहलादिष्वेव दक्षिणोत्तरशलाकयोः खण्डशः (?) स्युः।

रेवत्या अपि मीनान्तात् प्रत्यक् कलादशकान्तरस्थत्वात् दक्षिणोत्तर-मण्डले सपादैकविंशतिभागाः द्वयोः कालयोर्मध्याह्नश्चान्तरालगताः स्युः। रेवत्यास्तु विक्षेपचापं सौम्यं भागपञ्चकं स्मर्यते। ततस्तद्विक्षेपद्वययोगस्तदप-क्रान्तकलाचतुष्कोनः सदापि। रेवती च तयोर्मध्याह्नच्छायान्तरम्। अगस्त्यस्य तु मिथुनान्तगतत्वात् पादोनं भागत्रयमेव अयनचलनहेतुकं दक्षिणोत्तरमण्डल-गतं चलनं स्यात्। एवं कर्किद्वितीयभागस्थस्य[2] पुनर्वसोरपि तद्वदुदग्विक्षेपस्य भागषट्कत्वाद् अवन्त्यां सममण्डलादुत्तरत एव सर्वदा मध्याह्नप्राप्तिः।

व्याख्या—1. The Ms. reads सप्तकं सपञ्चमांशम्।

2. The Ms. reads भागस्थः स्यात् for भागस्थस्य

'संवृतार्थः सञ्चिन्त्यः' (१६,७७,६४७) [कलि० ४५९३, A. D. १४९१] इति कल्यहर्गणे चन्द्रः चित्रामाच्छादयत्। 'उडु-त्वाष्ट्रमिन्दुसुताढ्यम्' (१६,७८,५२४-३०) (कलि० ४५९५, A. D. १४९३) इति नाडयाद्यहर्गणे चित्रायाः उदक्पार्श्वगतो बुधः परेद्युसमोपरिदृष्टकृत्तिकास्थितेऽर्केऽह्नि चन्द्रदक्षिणपार्श्वग[त]: 'लीनन्निळस्थितोऽयम्' (१६,७९,००३)(कलि० ४५९६, A. D. १४९४) इत्यहर्गणे चन्द्रान्मुक्ता रोहिणी दृष्टा समोपरिष्ठा। तस्मान्नक्षत्राणामपि ग्रहवत् स्वभागादेरयनचलनं संस्कृत्य अपक्रमं गहीत्वा तद्विक्षेपयोः योगं वियोगं वा कृत्वा स्फुटापक्रमो ज्ञेयः। तेन छायादिकं च ग्रहवत् कुर्यात्।

तस्मात् ज्योतिस्समुदायस्य कृत्स्नश एव चलनम्, नापक्रममण्डलमात्रस्य। तस्मान्नक्षत्राणामन्योन्यं विवरं सर्वदा सममेव। प्रत्येकविक्षेपश्च सर्वदा सम एव। अपक्रममण्डलासन्नानि पञ्चषभागविक्षेपान्येव शुक्रादिभिश्छाद्यानि। ततो विप्रकृष्टानां विक्षेपाः योगभागाश्च यन्त्रैरेव [आनेयाः।] तस्माद्—

[अ]शीतिभागे याम्यायामगस्त्यो मिथुनान्तगः।

इत्यादिस्मृतिरपि प्रत्यक्षमूलैव।

ननु ज्योतिश्चक्रस्य कृत्स्नस्यापि प्राक्प्रतीच्योश्चलने तत्स्थानां ज्योतिषामुदयकालो भिद्येत। तेन आर्क्षदिवसानामपि महत्त्वमल्पत्वं च स्यात्। तत्रायनचलनसाधनमध्यमस्य मकरादित्वे सावनदिवसा आर्क्षाश्चाल्पाः प्रत्यक्चलनाद् भगोलस्य, कर्क्यादौ तु प्राक्चलनात् महान्तश्च स्युः। तथा च ग्रहाणामप्युदयादिकालभवत्वाय यः कश्चित्संस्कारः कार्यः स्यात्, स च क्वापि नोक्त इति चेत्—यदि प्राक्प्रतीच्योश्चलनं, तर्हि तच्चलनांशान् लिप्तीकृत्य स्वगत्या हृत्वा चक्रलिप्ताप्ताः कलाः तन्मध्यमे मेषादौ ग्रहमध्यमेषु स्फुटेषु [ततः][1] शोध्याः, तुलादौ योज्याश्च।

तर्हि स च वक्तव्यः। स च सूर्यसिद्धान्तादिषु नोक्तः, तच्चलनानयनमेवोक्तम्। अतः कल्प्यते भगोलस्य न प्राक्प्र[ती]च्योश्चलनम्। कस्य तर्हि? घटिकापक्रममण्डलयोगस्यैव प्राक्प्रतीच्योश्चलनम्। अत उक्तम्—'भांशैश्चलति तद्योगः प्राक्प्रतीच्यो'रिति।

तर्हि भगोलस्य वा वायुगोलस्य वा उभयोर्वा चलनम्? भगोलस्य चेत् प्रथमं मीनमेषसन्धेः दक्षिणतश्चलनं, कन्यातुलासन्धेरुत्तरतश्चलनं युक्तम्। यतस्तथा सत्येव मेषतुलयोरादितःप्रभृत्युपर्युपरिप्रदेशस्य घटिकामण्डलावयवेनापि उपर्युपरिगतेन सह सम्बन्धः स्यात्। तन्मध्यमस्य तुलादित्वे विषुवद्वयस्य

व्याख्या—1. The Ms. reads वता for ततः

[विदितकाले अयनस्थितिः]

कलिसन्ध्याष्टमांशे स्वशतांशाद्वये गते ततः[1] ।
धनुर्मिथुनयोर्मध्ये प्रायशस्त्वयने उभे ॥ १८ ॥

व्यत्ययेन चलनात् उभयोर्मण्डलयोरपि प्रत्यगयनचलनतुल्यान्तरे संयोगः स्यात् । ततश्च अयनचलनाज्जायमानो विशेषः संस्कृतायनरविबाहुजचरप्राण कलान्तर-संस्कारयोरेवान्तर्भवति । घटिकामण्डलस्य चलने पूर्वापरदिशोः तद्वशात् कालतो भेदः स्यात् । स च नोपलभ्यते । अतो न वायुगोलस्य, नोभयोरपि । तस्माद् भगोलस्यैव चलन-मिति सिद्धम् ॥ १७ ॥

तत् स्वकाले कियदित्याह—

कलिसन्ध्याष्टमांशे स्वशतांशाद्वये गते ततः ।
धनुर्मिथुनयोर्मध्ये प्रायशस्त्वयने उभे ॥ १८ ॥

इति । दिव्याब्दशतमिता खलु काले सन्ध्या स्मर्यते । तस्याष्टमांशः सार्ध-दिव्याब्दद्वादशकः । स च सौराब्दानां पञ्चचत्वारिंशत्-शतमितः, तस्य शतांशः पञ्चचत्वारिंशदब्दः । ततः **स्वशतांशाद्वयः सन्ध्याष्टमांशः** 'शिव शिव' (४५४५) इति कल्यब्दैस्तावति याते **उभे अयने** उत्तरदक्षिणाख्ये **प्रायशो धनु-मिथुनमध्ये स्तः । तदा अयनचलनांशाः धनात्मकाः पञ्चदशसंख्या बभूवुः ।** प्रायिकत्वं च कलाष्टकाधिक्यात् । यतो **भार्गव-परमेश्वराचार्येण अस्मत्परमगुरुणा** 'चलांशा-स्त्वम्' (४५३६) इति कल्यब्दे परीक्ष्य पञ्चदशांशपूर्तिर्निर्णीता । अतः सन्ध्याष्टमांशशतांशस्य वा प्रायिकत्वम् । स्वजन्मकालज्ञापनार्थं चैवमुक्तम् । तदाहर्गणश्च 'त्यजाम्यज्ञतां तर्कैः' (१६,६०,१८१) (A. D. १४४३) इति ।

ननु तदा **सूर्यसिद्धान्ते** अयनचलनांशाः चतुर्दशैव सार्धा दशकलाश्च । ततोऽत्रोक्तम्—"सार्धकलोनांशकाधिकम्" इति । नैष दोषः । तत्रोक्तस्य गणितस्य स्थौल्यं स्वयमेव ख्यापितम्, पुनः परीक्षणेन निर्णयस्य प्रदर्शनात् । अतः सिद्धम्—"परीक्षणेनैव तद्व्यक्तिः" इति । **मानसोक्तं** तु—द्वाविंशति-कलाधिकांशकपञ्चदशकम् । **अन्यैः** कैश्चित् प्रदर्शितं ततोऽप्यधिकम् ॥ १८ ॥

एवंभूतभगोलावयवविशेषेषु भादिषु रवीन्द्वादिचारवशादवगतेषु तारा-तिथ्यृतुमासायनादिकालविशेषेषु श्रौतस्मार्तकर्माणि विधीयन्ते । तच्चारश्च मध्यमचाराद् भिन्न इति मध्यमस्य स्फुटीकरणेनैव कालविशेषज्ञानं शास्त्र-

---

मूलम्— 1. D. गतेस्ततः (corrupt)

[मन्दशीघ्रवृत्तानि]

ग्रहभ्रमणवृत्तानि गच्छन्त्युच्चगतीन्यपि ।
मन्दवृत्ते[1] तदर्केन्द्वोर्घनभूमध्यनाभिकम् ॥ १९ ॥

मध्यार्कगति चान्येषां तन्मध्यं शीघ्रवृत्तगम् ।
तेषां शैघ्र्यं[2] भचक्रान्न विक्षिप्तं गोलमध्यगम् ॥ २० ॥

शैघ्रत्वेन तदंशैः स्वं प्रमायोक्तं ज्ञशुक्रयोः ।
मन्दवृत्तस्य चैवात्र क्षयवृद्धी स्वकर्णवत् ॥ २१ ॥

प्रयोजनं स्यात् । मध्यमस्फुटादिविवेकश्च गोल एव प्रदर्श्य इति गोलस्वरूपं संक्षेपतः प्रदर्श्य तद्गतानि स्फुटोपयोगीनि मण्डलानि प्रदर्शयति—

ग्रहभ्रमणवृत्तानि गच्छन्त्युच्चगतीन्यपि ।
मन्दवृत्ते तदर्केन्द्वोर्घनभूमध्यनाभिकम् ॥ १९ ॥

मध्यार्कगति चान्येषां तन्मध्यं शीघ्रवृत्तगम् ।
तेषां शैघ्र्यं भचक्रान्न विक्षिप्तं गोलमध्यगम् ॥ २० ॥

शैघ्रत्वेन तदंशैः स्वं प्रमायोक्तं ज्ञशुक्रयोः ।
मन्दवृत्तस्य चैवात्र क्षयवृद्धी स्वकर्णवत् ॥ २१ ॥

तद् **ग्रहभ्रमणवृत्तं**, ग्रहो यत्र भ्रमति तत्र ग्रहभ्रमणवृत्तम् । ग्रहाणां बहुत्वात् तद्भ्रमणवृत्तान्यपि बहूनि स्युः इति बहुवचनप्रयोगः । तान्यपि **गच्छन्ति** । 'अपि'शब्देन ग्रहाः समुच्चीयन्ते । तानि कियद्गतीनि इत्याह— **उच्चगतीनीति** । उच्चस्य गतिर्येषां तानि उच्चगतीनि । क्व पुनस्तानि गच्छन्तीत्यत आह—**मन्दवृत्त** इति । भचक्रलिप्ताशीत्यंशैः त्रि(३)-अश्व(७)-अष्टया(१६)दिभिः परिमितं स्वं स्वं प्रतिमण्डलं भ्रमति । तच्च क्वावतिष्ठत इत्याह—**तदर्केन्द्वोर्घनभूमध्यनाभिकमिति** । घनभूमध्यमेव नाभिर्यस्य तद् घनभूमध्यनाभिकम् । अर्केन्द्वोः मन्दवृत्तमेव घनभूमध्यनाभिकम्, नान्येषाम् । तेषां नानादेशनाभिकमेव । केषु देशेषु तर्हि तन्मध्यम् इत्याह—

मध्यार्कगति चान्येषां तन्मध्यं शीघ्रवृत्तगम् ॥ २० a ॥

मूलम्— 1. G. मान्दे वृत्ते 2. A-F. शैघ्रं

इति। अन्येषां मन्दवृत्तान्यपि भ्रमन्त्येव, न क्वचिदेवावतिष्ठन्ते। तेषां भ्रमतां क आधार इत्यत्राह—तन्मध्यं शीघ्रवृत्तगम् इति। तत्र च कियती गतिरित्याह—मध्यार्कगतीति। एतदुक्तं भवति—कुजादीनां मन्दवृत्तानां भ्रमतां रविपर्यया एव पर्ययाः। ते च स्वस्वशीघ्रोच्चपरिधौ मध्यं कृत्वा भ्रमन्ति। आदित्यमध्यगतिरेव तन्मन्दपरिधीनामपि गतिः। अत एव पञ्चानाम् आदित्यमध्यमेव शीघ्रोच्चम्। तेषां गतिमन्तो[1] वा गतयो वा शीघ्रपरिधयः। अगतिकाश्चेत् क्व कथं वा तिष्ठन्तीत्याद्याकाङ्क्षायामाह—

तेषां शैघ्र्यं भचक्रान्न विक्षिप्तं गोलमध्यगम्॥ २० b॥

इति। तेषां शैघ्र्यवृत्तं सदापि गोलमध्यगमेव, न भ्रमति, न च विक्षिप्यते, भचक्रात् अपमण्डलात्। मन्दोच्चवृत्तानामेव स्वस्वपातगतिवशाद् विक्षेपोक्तेः,

धृत्य-ङ्क-मूर्च्छना-ऽधी-श-नागाः स्वांशाङ्घ्रयोर्द्वयोः॥

क्षेपा मन्दोच्चवृत्तानाम्। (सि० दर्पणम्, ८-९)

इति। तस्मात् सर्वेषामपि शीघ्रवृत्तं सदापि अपक्रममण्डलसमाननाभिकं तन्मार्ग[ग]मेव च। तत्परिधिगतनाभिकं मन्दवृत्तमेवापक्रममण्डलमभितोऽर्धशो विक्षिप्यते।

ज्ञशुक्रयोर्विशेषमर्धेनाह—

शीघ्रत्वेन तवंशैः स्वं प्रमायोक्तं ज्ञशुक्रयोः॥ २१ a॥

इति। बुधशुक्रयोः स्वभ्रमणमेव शीघ्रपरिधित्वेनोक्तम्। तर्हि चक्रांशतुल्यमेव तत् सदा स्यादिति। नेत्याह—तवंशैः वस्तुतः शीघ्रवृत्तभूतस्य षष्टिशतत्रयांशैः प्रमाय स्वभ्रमणवृत्तं शैघ्रतयोक्तम्, स्वप्रतिमण्डलात् शीघ्रवृत्तस्य महत्वात्। अन्येषां त्रयाणां प्रतिमण्डलादल्पमेव शीघ्रवृत्तम्। तन्निमित्तं स्फुटकर्मविशेषं युक्तिभागे वक्ष्यति—

ग्रहोच्चयोर्विपर्यस्तौ भोगावप्यत्र कल्पयेत्। (सि० दर्पणम्, २४)

इति।

उत्तरार्धेन सप्तानां मन्दवृत्तेषु अनुवृत्तं शीघ्रवृत्तेभ्यो व्यावृत्तं विशेषमाह—

व्याख्या—1. The ms. reads गतिमतो

२. न्यायभागः

[प्रतिमण्डलं कक्ष्यामण्डलं च]

ज्ञातभोगग्रहं वृत्तं सर्वत्र प्रतिमण्डलम् ।
कक्ष्यावृत्तं च तत्तुल्यं ज्ञेयभोगप्रदेशगम् ॥ २२ ॥

मन्दवृत्तस्य चैवात्र क्षयवृद्धी स्वकर्णवत् ॥ २१b ॥

इति । **अत्र,** स्फुटहेतुषु द्वादशसु परिधिषु मध्ये **मन्दवृत्तानां** सप्तानामेव **स्वकर्णवत्** स्वस्वमन्दकर्णवत् **क्षयवृद्धी** स्तः, न शैघ्राणाम् । अयमेव मन्दशीघ्रकर्मणो-र्विशेषहेतुः । विक्षेपश्च मन्दक्षेत्रगतानां वृत्तानामेवेति मन्दस्य शैघ्रादप्यधिकं धर्मद्वयं विद्यते ॥ १९-२१ ॥

एवमुपदेशभागमुपसंहृत्य न्यायभागं च संक्षेपतः प्रदर्श्यते । आप्त-वचनात् प्रत्यक्षपरीक्षणैर्वायं भागो ज्ञेयः । वक्ष्यमाणस्तु बुद्धिमतां स्वयं निरूप्यैव ज्ञातुं शक्यम् । तथापि शिष्याणां लाघवाय तद् दिङ्मात्रं प्रदर्श्यते ।

तत्र प्रथमं स्फुटन्यासं लम्बनादिष्वतिदिशति—

ज्ञातभोगग्रहं वृत्तं सर्वत्र प्रतिमण्डलम् ।
कक्ष्यावृत्तं च तत्तुल्यं ज्ञेयभोगप्रदेशगम् ॥ २२ ॥

सर्वत्र शैघ्रे मान्दे च कर्मणि, चन्द्रस्य द्वितीयस्फुटकर्मणि, लम्बने, सितमानानयने, चन्द्रमण्डलघनमध्यदृष्ट्यपेक्षया रविगत्यानयने, अन्यत्रापि। **ज्ञातभोगग्रहं वृत्तं प्रतिमण्डलम्** । ज्ञातो भोगो यस्य ग्रहस्य स ज्ञातभोगः, ज्ञातभोगो ग्रहो यस्य वृत्तस्य तद् वृत्तं ज्ञातभोगग्रहम् । यस्मिन् वृत्ते स्वपरिधिस्थघनमध्य-ग्रहस्य कल्पिताद् यतःकुतश्चि[त् स्थाना]देः प्रभृति ग्रहबिम्बघनमध्यपर्यन्तः प्रदेशो ग्रहभुक्तो ज्ञातः, तद् वृत्तं ज्ञातभोगग्रहमित्यर्थः । तद्वृत्तमध्यगतदृष्टेरेव दृग्गोलगतः ग्रहः तावद्राश्यादिकः स्यात् । तद्वृत्तमध्याद् विप्रकृष्टदृष्टेः पुनः तद्ग्रहपर्यन्तस्य दृग्गोले तद्ग्रहः कुत्र दृश्य इत्येतत् शीघ्रस्फुटन्यायेन ज्ञेयम् । योऽत्र द्वितीयो दृग्गोल उक्तः तद्व्यासार्धः स्फुटकर्मणि कर्णः । यत्तु ज्ञातभोग-ग्रहस्य प्रथमोक्तस्य व्यासार्धं तत् त्रिज्यास्थानीयम् । तत्तुल्यव्यासार्धमन्य-न्मण्डलं ज्ञेयभोगप्रदेशमध्यग्रहसूत्रस्पृक्परिधिकं कल्प्यम् । तत् कक्ष्यावृत्तमिति **आर्यभटाद्यै**राख्यायते । एतत् स्फुटकर्मणि छायालम्बनादिषु च स्पष्टी-भविष्यति ॥ २२ ॥

त एवाप्युच्चनीचाख्ये बहिश्चेदितरेतरम् ।
तद्व्यासार्धान्तरे चान्ये तन्मध्यान्तरनिर्मिते ॥ २३ ॥

ग्रहोच्चयोर्विपर्यस्तौ भोगावप्यत्र[1] कल्पयेत् ।
तिर्यक्त्वे ज्ञेयभोगात्तत् कोटीव्यासदले तयोः ॥ २४ ॥

तत्रैव विशेषमाह—

त एवाप्युच्चनीचाख्ये बहिश्चेदितरेतरम् ।

तद्व्यासार्धान्तरे चान्ये तन्मध्यान्तरनिर्मिते ॥ २३ ॥

ग्रहोच्चयोर्विपर्यस्तौ भोगावप्यत्र कल्पयेत् ॥ २४ a ॥

इति । **ते** कक्ष्याप्रतिमण्डले, अन्योन्यं **बहिर्गतकेन्द्रे चेत् त एव उच्चनीचाख्ये** स्तः । तदा **अन्य**कक्ष्याप्रतिमण्डले **तन्मध्यान्तरनिर्मिते** स्तः । तच्छब्देन उच्चनीचाख्यत्वमापन्ने उच्येते । तन्मध्ययोरन्तरालं तन्मध्यान्तरम् । तत्तुल्येन व्यासार्धेन भ्राम्यमाणेन निर्मिते द्वे वृत्ते तदा कक्ष्याप्रतिमण्डले स्तः । तन्मध्ययोरन्तरं च कियदित्याह— **तद्व्यासार्धान्तरे** इति । उच्चनीचत्वमापन्नयोर्वृत्तयोरुभयोस्तुल्यं व्यासार्धं यावत् तावदेव पुनः कल्पितयोः कक्ष्याप्रतिमण्डलयोर्मध्ययोरन्तरालमित्यर्थः ॥ २३ ॥

ज्ञेयभोगग्रहस्य ज्ञातभोगग्रहस्य च कथंभूतः सम्बन्ध इत्याह इत्येतच्चोपरितनेन ग्रन्थेन—

ग्रहोच्चयोर्विपर्यस्तौ भोगावप्यत्र कल्पयेत् ।

तिर्यक्त्वे ज्ञेयभोगात्तत् कोटीव्यासदले तयोः ॥ २४ ॥

किञ्च— **अत्र** उच्चनीचवृत्तात् स्वभ्रमणवृत्तस्याल्पत्वेन उच्चनीचवृत्तत्वप्राप्तौ **ग्रहोच्चयोर्भोगावपि विपर्यस्तौ कल्पयेत्** । स्वभ्रमणवृत्ते ग्रहभुक्ते राश्यादिकमुच्चं कल्पयेत् । स्वभ्रमणवृत्तमध्येन वृत्तान्तरेण भ्रमता तत्र भुक्तं राश्यादिकं मध्यमं च कल्पयेत् इत्येतावानेव विशेषः ।

पुनरपि नियतगतीनां तद्गतिहेतुभूतानामपि नियतगतित्वे सत्यपि आकृतिपरिमाणादिवशात् सम्भवन्न्यायान्तरमाह—

तिर्यक्त्वे ज्ञेयभोगात्तत्कोटी व्यासदले तयोः ॥ २४ b ॥

मूलम्— 1. D. E. F. भागावप्यत्र

दोर्भेदो वा युतिः क्षेपस्तन्मध्यग्रहगोलगः ।

[भुजादिलक्षणम्]

[1]दोःकोटिभुजयोर्योगः कर्णबाहु[2]चतुर्भुजः ॥ २५ ॥

दोर्भेदो वा युतिः क्षेपस्तन्मध्यग्रहगोलगः ॥ २५ a ॥

इति ।

तत्र **ज्ञेयभोगमण्डलापेक्षया** ज्ञातभोगमण्डलस्य **तिर्यक्त्वे तद्व्यासार्धस्य** इतरव्यासार्धदिगपेक्षया तिर्यक्त्वात् कर्णत्वं प्राप्तस्य या कोटिः तत्तुल्य एव कक्ष्याप्रतिमण्डलयोर्व्यासदलस्थतद्वृत्तस्यापि, भ्रमतः तन्नाभिगमनमार्गगं यद्वृत्तं तस्यापि । ज्ञेयभोगातिर्यक्त्वे तत्कोटिरेवोच्चनीचव्यासार्धतया कल्प्या । ये पुनरुभयोर्भुजे तद्योगतुल्य एव ज्ञेयमण्डलात् तद्ग्रहस्य क्षेपश्च । कदाचिद् भुजयोर्वियोगश्च विक्षेपः स्यात् । एतत्सर्वमुपरिष्टादुदाहरणेन स्पष्टीकरिष्यति (?भविष्यति) ॥ २४-२५ a ॥

एवमेकस्यैव ग्रहस्य द्रष्टृदेशवशात्सम्भवं नानादर्शनन्यायं कृत्स्नं संक्षेपतः प्रदर्श्य तत्क्षेत्रगतगणितन्यायमपि प्रदर्शयति । तत्र एकेनार्धेन अखिलक्षेत्रस्य गणितस्य बीजभूतं भुजाकोटिकर्णक्षेत्रगणितन्यायः प्रदर्श्यते—

दोःकोटिभुजयोर्योगः कर्णबाहुचतुर्भुजः ॥ २५ b ॥

इति ।

यस्मिन् क्षेत्रे भुजाकोटिकर्णेषु त्रिषु, ज्ञाताभ्यां द्वाभ्यां, इतरेतरज्ञानोपायो जिज्ञास्यते, तत्र त्रीणि समचतुरश्रक्षेत्राणि कल्प्यानि । तत्रैकस्य चत्वारो बाहवो जिज्ञासिताः क्षेत्रबाहुना तुल्याः, अन्यस्य कोट्या तुल्याः, अन्य[स्य] कर्णतुल्याः । तत्र कर्णतुल्यबाहुक्षेत्रं इतरचतुरश्रद्वययोगसमम् ।

स्वसंवेद्यं चैतत् प्रतिभाजुषाम् । कथम् ? तत्र समचतुरश्रक्षेत्रं वीक्षमाणस्य तत्पर्यन्तभागेभ्यश्चतुर्भ्यस्तुल्येभ्यो भुजाख्येभ्यः एकान्तरितकोणयोरन्तरस्य कर्णाख्यस्य दैर्घ्याधिक्यं प्रथमं स्फुरेत् । बाहुष्वपि मिथःसंस्पृष्टैकाग्रयोर्द्वयोर्द्वयोरितरेतरं विपरीतदिक्कत्वे च ज्ञाते कर्णद्वयस्य सामान्येन (?समानेन) भाव्यम्, परिमाणभेदस्य कारणाभावाद् इति च स्फुरेत् । तयोरेकतरकर्णदिगभिमुखस्य तस्याऽऽयामत्वाङ्गीकारे इतरकर्णाग्रद्वयस्य कटाक्षस्य तत्समायामविस्तारं कोणप्रतिकोणान्तसमबाहुकं पूर्वचतुरश्रगर्भं चतुरश्रान्तरं प्रतीयेत । तत्र यदि प्रथमस्य बाहवो दिगभिमुखाः, तर्हि द्वितीयस्य विदिगभिमुखाश्चत्वारः ।

मूलम्— 1. In D. E. F., this line is transposed to after verse 26.

2. B. gives तुल्य below बाहु as an alt. reading.

तत्र प्रथमस्यैकैकं बाहुमभितो ये द्वे त्र्यश्रे उत्पद्येते, तत्र प्रथमचतुरश्रान्तर्गतमेकम्, तद्बहिर्गतमन्यत्। एवं प्रथमस्य प्रतिबाहु द्वे द्वे त्र्यश्रे स्तः। तान्यष्टौ सर्वाणि मिथस्तुल्यान्येव। तेषां प्रत्येकं फलं च प्रथमचतुरश्रफलचतुरंशतुल्यम्, कर्णाभ्यां चतुर्धा विभक्तस्य प्रथमचतुरश्रस्य खण्डैश्चतुर्भिस्तुल्यत्वात्। तद्बहिर्गतानां च ततस्तयोरन्तर्गतचतुरश्रफलाद् द्विगुणं बहिर्गतचतुरश्रफलम्। चतुरश्रक्षेत्रफलं च तद्बाहुवर्गसमम्। तस्तात् तत्तत्समचतुरश्रबाहुवर्गाद् द्विगुणं तत्कर्णभुजक्षेत्रफलम्, फलमूलतुल्यं च बाहुदैर्घ्यम् इत्येतत्सर्वं द्रव्यभूतस्य पुरुषस्यावश्यं स्फुरति, तस्य संवेद्यसम्बन्ध्यखिलन्यायावयवानां तत्त्वज्ञानपर्यन्तं जिज्ञासाया अविश्रान्तेः।

एवं समचतुरश्रकर्णज्ञानानन्तरमेव आयतचतुरश्रकर्णजिज्ञासा स्यात्। तस्य भुजाकोटयोरतुल्यपरिमाणत्वात् तयोः कतरस्य वर्गं द्विगुणितं तत्फलं स्यादित्यत्र सन्देहच्छेदिविशेषहेत्वभावात् तद्योगार्धस्य द्विगुणीकरणे तदैक्यमेव तत्फलं स्यात् इति स्फुरणस्य ऊहत्वात् तदेव वास्तवं फलम्, ततोऽल्पं वाऽधिकं वा, इति संशयः स्यात्। ततस्तन्निर्णयार्थं पुनरपि निरूपयति। तत्र निरूपणस्य द्वौ मार्गौ। द्वयो राश्योर्वर्गमूलं निरवयवम् एकादिसंख्याविशेषेषु कयोः कयोः स्याद् इति संख्या [निश्चीयते।] तदन्वेषण एको मार्गः। अशेषविषयव्यापी क्षेत्रच्छेदकद्वारोऽन्यो मार्गः। प्रथममनेन मार्गेण गन्तव्यम् अन्यस्य [अर्थात् प्रथमस्य] अल्पविषयत्वाद्, आनन्त्यात् क्वचिदप्यविश्रान्तेश्च। तत्र कथं छित्वा योजने द्वित्रा वा सर्वे वा बाहवो जिज्ञासितकर्णतुल्याः स्युः? तत्र कोटितुल्यचतुरश्रस्य एकेन बाहुना अल्पस्य बाहुं कुतश्चित्कोणतः प्रभृति सन्धाय संश्लिष्टस्य क्षेत्रस्य यत्र कोणयोः संयोगः स भागो दोःकोटियोगतुल्यः। महति चतुरश्रे संश्लिष्टाद् बहिर्गतः खण्डो दोःकोटयन्तरसमः। इतरौ बाहू कोटितुल्यावेव। अल्पस्य चान्येन संस्पृष्टौ बाहू दोःसमावेव। एवं च पर्यन्तभागाः षोढा विभक्ताः स्युः। तत्र कोणयुतेर्महति दोःकोटयन्तरसमे लाञ्छने कृते दोःकोटियोगतुल्यस्य बाहोर्लाञ्छनाद् बहिर्गतो भागो दोःसमः, अन्यः कोटिसमः। महतोऽन्तरेणोनत्वात्, अल्पस्यान्तरेणाधिक्यात् कोटितुल्यत्वं च तयोः। महच्चतुरश्रं लाञ्छनमार्गेण छिन्द्यात्। तदा तदायतचतुरश्रदोःसमविस्तारं कोटिसमायामं च, इतरस्य खण्डस्याश्रे द्वे कोटिकोटितुल्ये, द्वे चतुरश्रतुल्ये, अन्ये दोःकोटयन्तरतुल्ये। तस्य शिखरे छित्त्वा पृथक्कृतो खण्डः दोःकोटयन्तरसमचतुरश्रं क्षेत्रम्। तच्छिष्टं चायतचतुरश्रं पूर्वेण तुल्यम्। तयोर्द्वयोः कर्णमार्गेण छिन्नयोः चत्वारि त्र्यश्राणि स्युः। तत्कर्णाश्चत्वारो जिज्ञासितकर्णतुल्या एव। तानि तथा सन्दध्याद् यथा तत्कर्णा बहिर्गताः स्युः। तथा तन्मध्यत्र्यश्रशून्यं यद्विवरं तद् दोःकोटयन्तरसमचतुरश्रम्। ततस्तत् तृतीयेन

कक्ष्यामध्योच्चनीचस्पृक्सूत्रखेटान्तरं भुजा ।
कोटिस्तदुच्छ्रितिः कर्णः कक्ष्यामध्याद् ग्रहान्तरम् ॥ २६ ॥

[ग्रहस्फुटः]

कर्णवृत्तांशदोश्चापयुतोनोच्चस्फुटो ग्रहः[1] ।
कर्णवृत्तांशबाह्वाद्यैर्मान्दे कक्ष्यैव[2] नीयते[3] ॥ २७ ॥

खण्डेन पूरणीयम्। तथा तत् जिज्ञासितकर्णसमबाहुकं समकर्णसमचतुरश्रं स्यात्। अतः सिद्धम्—

दोःकोटिभुजयोर्योगः कर्णबाहुचतुर्भुजः ॥ २५ b ॥

इति।

दोःसमचतुर्बाहुकस्य कोटिसमचतुर्बाहुकस्य च चतुरश्रयोरेकीकरणे चतुर्भुजं कर्णबाहुकं स्यात्। इत्येतत्सर्वं युक्तिमूलमेव, न त्वागममूलम्। ततः प्रतिभाजुषां चक्षुर्हस्तादिव्यापारं विना मनसा निरूप्य एवं निर्णेतुं शक्यम्। अनयैव दिशा विष्कम्भपरिधिज्याचापसम्बन्धश्च निरूप्यैव ज्ञेयः। एतत्सर्वं मया **आर्यभटीयव्याख्याने** (आर्यभटीयभाष्यम्, गोल० १७) प्रपञ्चितमिति विरम्यते ॥ २५ ॥

एवं स्फुटीकरणच्छायाग्रहणादिधारणभूतं भुजाकोटिकर्णन्यायं प्रदर्श्य स्फुटी[करण]कर्मणि च साराशं प्रदर्श्यते—

कक्ष्यामध्योच्चनीचस्पृक्सूत्रखेटान्तरं भुजा ।
कोटिस्तदुच्छ्रितिः, कर्णः कक्ष्यामध्याद् ग्रहान्तरम् ॥ २६ ॥
कर्णवृत्तांशदोश्चापयुतोनोच्चस्फुटो ग्रहः ।
कर्णवृत्तांशबाह्वाद्यैर्मान्दे कक्ष्यैव नीयते ॥ २७ ॥

इति।

तत्र प्रथमपद्येनावृत्त्या स्फुटक्षेत्रगतकर्णानयने विकल्पेन प्राप्तं प्रकारद्वयं दर्शयति।

मूलम्— 1. D. E. F. स्फुटग्रहः

2. A मन्दे कक्ष्यैव ; B. मन्दकक्ष्यैव

3. E. नीयताम्. The commentary in G also gives this as an alternative reading. G breaks off with this verse.

तत्र प्रथमं प्रतिमण्डलस्फुटे योज्यते। तत्रैतद्वाक्यस्य युक्तेश्चाज्ञः (?) स्यात्। **कक्ष्यामध्योच्चनीचस्पृक्सूत्रस्य**, कक्ष्यामध्योच्चनीचस्पृशः सूत्रस्य स्फुटीक्रियमाणग्रहस्य च यदन्तरमुच्चनीचसूत्रतिरश्चीनमध्यज्यात्मकं सा **भुजा**। कक्ष्यामण्डलमध्ये प्रतिमण्डलपरिधिस्थोच्चप्रदेशं नीचप्रदेशं च स्पृशति इति कक्ष्यामध्योच्चनीचस्पृगित्यत्र विग्रहः। वाक्यशेषयोजनमुभयत्र समानम्। **तदुच्छ्रितिः** भुजाया उच्छ्रितिः, **कोटिः**। उच्छ्रयश्च भूमध्याद् विप्रकर्ष एव सर्वेषाम्। तयोः **कर्णः** कक्ष्यामण्डलमध्यस्य ग्रहबिम्बमध्यस्य च विवरम्। ऊर्ध्ववदस्यापि प्रथममर्धमुभयत्र योज्यम्॥ २६॥

मन्दोच्चे शीघ्रोच्चे वा **कर्णवृत्तांशदोश्चाप**धनशोधनाभ्यां तत्तत्कक्ष्या-मध्यमण्डलमध्यदृग्गोलगते **ग्रहः** साध्यते।

तत्र किमर्थं कर्णवृत्तांशविशेषणम्? उच्चमध्यान्तरदोश्चाप-व्युदासार्थम्। किं तर्हि तत्र संस्कार्यम्? उच्चस्फुटान्तरदोश्चापम्। तत्कथं ज्ञायत इति? तदानयनं कर्णवृत्तांशशब्देन सूच्यते। कथम्? ग्रहमध्यमादुच्चं विशोध्य तद्भुजाया गृहीता अर्धज्या हि मण्डलयोरुभयोः साधारणी, कर्णमण्डलस्य प्रतिमण्डलस्य चोभयसम्पातगतत्वात्। सदैव ग्रहस्य उच्चनीचसूत्रस्य ग्रहसन्निकृष्टप्रदेशात् प्रवृत्तत्वाच्च, भुजायाः उच्चनीचसूत्रस्य च मध्यम-स्फुटकेन्द्रयोर्गोलसन्धिगतत्वाच्च। एकस्या एव भुजाज्याया मापकभेदादेव मण्डलयोर्द्वयोर्भेदः स्यात्। प्रतिमण्डलगतत्वेन कल्प्यमाना प्रतिमण्डल-खखषड्घनांश(२१६००)तुल्याभिर्मेया। कर्णमण्डलगतत्वेन कल्प्यमाना तत् स्वखषड्घनांशतुल्याभिः ज्योतिश्चक्रकलाभिरेव। तत्र केन्द्रस्य मकरादित्वे स्फुटकक्ष्यात्मकस्य कर्णस्य मण्डलस्य मध्यकक्ष्यामण्डलाद् बहिर्गतत्वात् स्फुटकक्ष्याकला मध्यकक्ष्याकलाभ्यो महत्यः स्युः। अतएव प्रतिमण्डल-कलाभ्यश्च महत्यः, कक्ष्याप्रतिमण्डलयोस्तुल्यत्वात्, कलानां च सर्वेष्वपि मण्डलेषु स्वपरिधिखखषड्घनांशतुल्यत्वात्। अत उक्तम्— **कर्णवृत्तांशदोश्चाप-युतोनोच्चम्** इति।

कथं कर्णवृत्तांशदोश्चापं ज्ञायते? त्रैराशिकेन। किं ब्रूमः प्रतिक्षणं विक्रियमाणानां कर्णकलानां, सदैव तुल्यपरिमाणानां इतरासां च सम्बन्धस्या-ऽनियतत्वात् कथं त्रैराशिकमुपपद्यते? नैष दोषः। उभयत्रापि ज्या-त्रिज्या-चाप-बाणादीनामैककालिकस्य मिथः सम्बन्धस्य नियमाद् अभीष्टकालवर्त्तै-रेकमण्डलभवैस्तात्कालिकानामितरमण्डलगतानामानयने त्रैराशिकमुपपद्यते। तत्र तन्मण्डलयोस्तात्कालिकसम्बन्ध एव ज्ञेयः। स च व्यासयोः परिध्योः ज्याबाणादीनां वा मण्डलगतानामेकदा एकप्रकार एव। ततो व्यासादिष्वन्य-

तमयोर्वृत्तद्वयगतस्तात्कालिके नियमे विदिते सति एकमण्डलगतेन विदितेन अन्यमण्डलगतमपि तत्स्थानीयं ज्ञेयम् । अतएव केन्द्रभुजाकोटिभ्यां महामण्डलगताभ्यां उच्चनीचवृत्तगते भुजाकोटिज्ये आनीयेते ।

देशभेदेष्वयमेव न्यायः स्यात् । अत एव क्षितिज्याचरादिकमपि तत्तद्देशाक्षावलम्बकादिभिः तत्तद्देशजमानीयते । अपक्रमक्षितिज्याकर्णाग्रादीनामेकस्मिन् देशे सदैव द्वयोर्द्वयोर्मिथःसम्बन्धस्यैकप्रकारत्वात् । अत्र तु मध्यस्फुटकक्ष्यागतानां द्वयीनां कलानां तत्तत्कालभवो मिथःसम्बन्धः क्वचिज्ज्ञेयः । स च स्फुटकक्ष्याव्यासार्धे दृश्यते । तत्रापि स्वकलामितं व्यासार्धं सदैव त्रिज्यासंख्यम् । तद्गता मध्यकक्ष्याकला एव प्रतिक्षणं भिन्नसंख्याः । तज्ज्ञानार्थं कर्णं आनीयते । तत्र केन्द्रबाहुज्या ग्रहभ्रमणवृत्तकलाप्रमिता, तद्गतचापगृहीतत्वात् । सैव भूग्रहान्तरकर्णस्य भुजा । केन्द्रकोटिज्या तु प्रतिमण्डलमध्यस्य भुजायाश्च विप्रकर्षः । कर्णसाधनत्वं तु उच्चनीचरेखागतभूभुजाविवरस्यैव । ततः प्रतिमण्डलभूविवरतुल्यस्योच्चनीचवृत्तव्यासार्धस्य मकरादौ केन्द्रकोटिज्यया संयोगः, कर्क्यादौ तु वियोगश्च कार्यः । सैव कोटिः कर्णसाधनभूता । सैव भुजोच्छ्रितिरुक्ता । अतस्तद्वर्गयोगमूलं स्फुटकक्ष्याव्यासार्धं मध्यकक्ष्याकलाप्रमितम् । तत् स्फुटकक्ष्याकलाप्रमितस्य त्रिज्यातुल्यासंख्यस्य सतस्तस्यैव व्युदासार्थं कर्णशब्देन विशेष्यते । भुजाकोटिक्षेत्रकल्पनयाऽवगतत्वात् तत्र कर्णशब्दो वर्तते ।

वृत्तः, व्यासार्धयोः सीमात्वेन कल्प्यमानस्य व्यासत्वं व्यस्यतेऽनेन वृत्तमिति । स्मर्यते च— 'विस्तारो विग्रहो व्यासः' इति **यादवप्रकाशाद्यैः** । तस्यार्धं व्यासार्धमित्येकस्यैव मापकभेदनिमित्तः संख्याभेदो वाचकभेदहेतुः । ताभ्यां मध्यमभुजज्यया च स्फुटभुजज्यानयनमेव । यदि तात्कालिककर्णतुल्याभिर्ग्रहभ्रमणवृत्तकलाभिः त्रिज्यातुल्यग्रहावधिकज्योतिश्चक्रकला लभ्यते, तदा तात्कालिकोच्चमध्यविवरज्यातुल्याभिः ग्रहभ्रमणवृत्तकलाभिः कियत्यो भगोलकला लभ्यन्ते इत्युच्चस्फुटग्रहान्तरदोर्ज्याकला लभ्यन्ते । ततस्तच्चापीकरणेन स्फुटकेन्द्रभुजाचापं लभ्यते । तच्चापयुक्तमुच्चं प्रथमपदे स्फुटग्रहः, तदूनं चतुर्थपदे [उच्चम्], द्वितीये तु तदूनं नीचम्, तृतीये तु तत्सहितं नीचं स्फुटग्रहः ।

नन्वेवम् एकस्मिन् केन्द्रपर्यये मध्यमस्फुटसाम्यस्य चतुरज्याऽऽवृत्तिः स्यात् । नैतदस्ति । केन्द्रभगणे एकस्मित् द्विरेव तत्साम्यं स्यात्, उच्चप्राप्तौ नीचप्राप्तौ च । ननु मेषादौ तुलादौ च [1]सकृत्कर्णस्य त्रिज्यासाम्यं स्यात् । तथा च मध्यमभुजज्यया स्फुटभुजज्यानयने गुणहारयोः संख्यासाम्यात्

व्याख्या—1. The expression **सकृत्** is repeated in the Ms.

मध्यमस्फुटभुजज्ययोरपि साम्यं स्यात्। चापसाम्ये मध्यमस्फुटयोरपि साम्यं स्यादिति चेत्— मैवम्। तदा मध्यमस्फुटभुजयोः पदभेदात् मध्यमस्फुटयोरपि भेदः स्यात्। कथं पदभेदः? तदानीं च ग्रहस्य प्रतिमण्डलनीचासन्नार्धगतत्वात् मध्यमकेन्द्रकक्ष्यादिगते तज्ज्याचापे स्याताम्। कर्णमण्डले पुनस्तस्यैव ग्रहस्य तदुच्चासन्नार्धगतत्वात् मकरादिगते ज्याचापे द्वे। अतो नीचमध्यान्तरं मध्यकेन्द्रभुजचापम्। उच्चस्फुटविवरम् प्रमाणफलयोः साम्यादिच्छाफलसाम्येऽपि फलत्वेन सिद्धस्य बाहोश्चापम्। इति महानेव तदानीं मध्यमस्फुटयोर्भेदः। मध्यमकेन्द्रकक्ष्यादौ यदान्त्यफलात् कोटेरल्पत्वं ततः कोटिः शोध्यते। तदैव च मध्यमस्फुटयोः पदभेदः स्यात्, नान्यदा। एवं प्रतिमण्डलस्फुटपरतया व्याख्यातम्।

अथ विधान्तरपरतया व्याख्यायते—तदा कक्ष्यामध्योच्चनीचस्पृक्सूत्रकक्ष्यामण्डलम् मध्ये तत्परिधिगतोच्चनीचकेन्द्रेऽपि स्पृष्टम्। तच्चोच्चनीचवृत्तोच्चप्रदेशाऽवधिकम्। यद्वा कक्ष्यामध्ये तत्परिधिस्थोच्चनीचवृत्तोच्चप्रदेशे नीचप्रदेशे च स्पृष्टम्। तस्य सूत्रस्य ग्रहस्य च यो विप्रकर्षः सा भुजा। सा च उच्चनीचवृत्तगता, तत्परिधिस्थत्वाद् ग्रहस्य। कक्ष्याप्रतिमण्डलोच्चनीचवृत्तकर्णमण्डलानां सन्निपात एव हि सदा ग्रहः। सदा तस्या उच्चनीचवृत्तगतबाहुज्यायाः उच्छ्रितिरेव कोटिः। कर्णः पूर्वोक्त एव। या पुनरुच्चनीचवृत्तगता कोटिः सा च तन्नाभिबाह्वन्तरा[ला]वगाहिव्यासार्धखण्डतुल्या, भुजाशरोनव्यासार्धस्य कोटिसाम्यात्। तस्याः कक्ष्याव्यासार्धस्य च संयोगो वियोगो वेह भुजोच्छ्रितिः। सैव कर्णसाधनभूता कोटिः। तत्रोच्चनीचवृत्तभुजाकोटिज्येन स्ववृ[त्त]कलाप्रमिते ग्राह्ये। के तर्हि? मध्यकक्ष्यकलाप्रमिते, यतस्तत्प्रमितः कर्णो जिज्ञास्यते? तत्रैवं त्रैराशिकम्—यदि षष्टिशतत्रयांशपरिमिते परिधौ केन्द्रभुजाकोटिज्ये उभे स्तः, तदा ग्रहभ्रमणवृत्तांशैः प्रमाय परिमिते स्वस्वोच्चनीचवृत्ते कियत्याविति। इति परिधिर्गुणकारः, षष्टयधिकशतसंख्यो भागहारः। तत्फले भुजाकोटिफलाख्ये। अत्र तु 'स्वांशैस्तान्यर्धपञ्चमैः' (सि० दर्पणम्, ८) इति वृत्तानामर्धपञ्चमापवर्तितत्वात् इच्छाप्रमाणयोरेकजातिकत्वाय प्रमाणव्य[ासा]र्धपञ्चमावर्तितम् अशीतिसंख्यं हारतया ग्राह्यम्। परितः परिधयोऽर्धपञ्चमा इति गुणिता वेच्छात्वेन ग्राह्याः इति कर्णविषयावयवयोजना, अत्र भुजाफलचापस्य मध्यमे संस्कार्यत्वात्।

कर्णवृत्तांशवोश्चापयुक्तोनोच्चस्फुटो ग्रहः ॥ २७ a ॥

इत्यत्र उच्चशब्देन उच्चनीचवृत्तस्य उच्चभागो विवक्ष्यते। तद्वृत्तमेव च मेषादेर्यतःकुतश्चिदवधेर्वा तत्तज्ज्योति[श्चक्र]वृत्तानां तत्तन्नाभ्याश्रान्ता-

वधिकस्य ग्राह्यत्वात् । ततोऽत्रोक्तोच्चनीचस्पृक्सूत्रभुक्तज्योतिश्चक्रगतराश्यादिके भुजाफलं संस्कार्यमित्यर्थः । तच्च ग्रहर्गणत्रैराशिकानीतमध्यमतुल्यम् । अत एवोक्तम्—

कक्ष्यामण्डललग्नस्य वृत्तमध्ये ग्रहो मध्यः ।

इति ।

नन्वत्रोक्तम्—भुजाफलं तच्चापं वा न कलाप्रमितम्, यतः ग्रहभ्रमणवृत्तत्वायैव यत्नः कृतः, न कर्णकलाप्रमितत्वाय । ततस्तदर्थं यत्नान्तरं कार्यम् । सत्यम् । तदपि कर्णवृत्तांशदोश्चापत्वोक्तेः सिद्धे मन्दवृत्तस्यैव स्वकर्णवच्च क्षयवृद्धी भवतः, न शीघ्रवृत्तस्य, तस्यापि दोर्ज्यावृद्धिक्षयवशात् क्षयवृद्धी स्तः इति तद्व्यवच्छेदार्थं एवकार इति ।

मन्दवृत्तस्य कर्णवत क्षयवृद्धिमत्त्वमिहोक्तम् । ततस्त्रैराशिकेनैव तात्कालिकमन्दवृत्तपरिमाणं ज्ञेयम् । तत्रैव त्रैराशिकम्—यदि तात्कालिककर्णे त्रिज्यातुल्यम्(? ल्ये) एतावान् परिधिः, तत इयति कर्णे कियानीति । तेन परिधिना प्राग्वदेव दोःकोटिफले कार्ये । यद्यन्त्यफलेन व्यासार्धेन प्रमाणेन च दोःकोटिफले आनीयेते, तदा अभीष्टान्त्यफलानयनेऽपि इदमेव त्रैराशिकम् । यद्वा पठितेनैव वृत्तेन दोःकोटिफले नीत्वा तयोः पृथक्पृथगेतदेव त्रैराशिकम् । ततस्त्रैराशिकसिद्धाभ्यां फलाभ्यां केवलया त्रिज्यया च इष्टकर्ण आनेयः, ततः कर्णे ज्ञात एव दोःकोटिफले ज्ञेये, तयोर्ज्ञातयोरेव कर्णश्च ज्ञेयः, इत्यन्योन्याश्रयतां परिहर्तुं असकृत्कर्मणा कर्णो विशेष्यते पूर्वैः । तत्र फलयोः पृथक्त्रैराशिकपक्षे फलयोरविशेषकर्णो गुणकारः, त्रिज्यैव हारः । अविशिष्टस्य भुजाफलस्य मध्यकक्ष्याकलाप्रमितत्वात् कर्णकलाप्रमितस्य चापस्यैव मध्यमे संस्कार्यत्वात् । ज्यारूपस्य भुजाफलस्य च उच्चनीचवृत्तकर्णमण्डलयोः साधारणत्वात् ।

कर्णमण्डलप्रमितत्वाय त्रैराशिके त्रिज्या गुणकारः, अविशेषकर्णो हारः । तत्पूर्वं त्रैराशिकस्य विपरीतकर्मैव । तत एकस्मिन् कर्मणि सर्वस्मिन् कृतेऽपि प्रथममानीतमविकृतवृत्तफलमेव लभ्यत इति, तदेव चापीकार्यमिति, मन्दस्फुटकर्मणि कर्णानयनादिकमुपेक्षणीयमेव । बिम्बमानादिज्ञानार्थमेव तन्मन्दकर्णानयनमुच्यते ।

तत्र अविशेषणस्य कर्मगौरवात्[1] सकृत्कर्मणा आनयनमुच्यते—

कर्णवृत्तांशबाह्वाद्यैमर्मान्दे कक्ष्यैव नीयते ॥ २७ b ॥

व्याख्या—1. The Ms. reads कर्णगौरवात्

इति। मन्दवृत्तस्य कर्णवत् क्षयवृद्धिमत्त्वात् तत्कर्णानयने य इतरेतराश्रयदोष उक्तः, स पूर्वोक्तप्रकार एव स्यात्। अन्यथापि मध्यमस्फुटकक्ष्ययोः तात्कालिको मिथः परिमाणसम्बन्धो ज्ञेयः। तद्व्यासार्धे उभे अपि एकेनैव मापकेन प्रमाय उभयोः संख्ययोः ज्ञातयोस्तयोः परिमाणतः सम्बन्धः एवं ज्ञायते—तद्भ्रमणतो यदा यावती संख्या तदा ततस्तावतिथांशैः अन्यतुल्यैरारब्धमल्पमिति अल्पस्य महता सम्बन्धः। अल्पस्य च यावती संख्या ततस्तावतिथांशैः अन्यतुल्यैरारब्धमन्यत् कर्णकलाप्रमितमिति। इत्यन्योन्यमङ्गाङ्गिभावः सम्बन्धः। तत्र उभयोर्मापकयोः तुल्यतया भाव्यमित्येव नियमः। तत्र ग्रहवृत्तकलाप्रमिते उभे पूर्वोक्ते। अत्रोक्ते तु कर्णकलाप्रमिते। तत्र स्फुटकक्ष्याव्यासार्धस्य कर्णकलाप्रमितस्य सर्वदाऽपि त्रिज्यातुल्यत्वात् तदिह ज्ञातम्। कर्णकलाप्रमिते भुजाकोटिफले च ज्ञाते। ततस्तैस्त्रिभिरज्ञातं कर्णकलाप्रमितं मध्यकक्ष्याव्यासार्धमिह नीयते। तदुक्तम्—

कर्णवृत्तांशबाह्वाद्यैमान्दे कक्ष्यैव नीयते ॥ २७ b ॥

इति।

स्ववृत्तकलाप्रमितस्य कर्णस्य सदैव त्रिज्यातुल्यत्वात् तेन मध्यकक्ष्याव्यासार्धानयने कर्णानयनविपरीतकर्म कार्यम्। तच्च **माधवेनोक्तम्**—

विस्तृतिदलदोःफलकृतिवियुतिपदं कोटिफलविहीनयुतम्।
केन्द्रे मृगकर्किगते स खलु विपर्ययकृतो भवेत् कर्णः।
तेन हृता त्रिज्याकृतिरयत्नविहिता विशेषकर्णः स्यात् ॥

इति। अत्र 'तेन हृता त्रिज्याकृतिः' इत्येतत् त्रैराशिकमेव। स्फुटकक्ष्याव्यासार्धस्य ग्रहभ्रमणवृत्तकलाप्रमितस्यैव संख्या गणितेन ज्ञेया। कर्णवृत्तकलाप्रमितस्य संख्या ज्ञातैव, सदैव त्रिज्यातुल्यः स्यात् (? तुल्यत्वात्) तस्याः। तया त्रैराशिकेन प्रतिक्षणं भिद्यमाना ग्रहवृत्तकलासंख्या कर्णाख्या ते (?) त्रैराशिकेनैव ज्ञेया। प्रमाणफलयोर्विदितयोर्वा इच्छया[1] त्रैराशिकं प्रवर्तते, लिङ्गलिङ्गित्वादुभयोः। तयोः सम्बन्धश्च मध्यकक्ष्याव्यासार्ध एव ज्ञेयः। तद्गतग्रहवृत्तकला ज्ञाता, त्रिज्यातुल्येति। तद्गतकर्णवृत्तकलासिद्ध्यर्थमिह कर्णविपरीतकर्म उक्तम्— **कर्णवृत्तांशबाह्वाद्यैः कक्ष्यैव इह नीयते।** इति। एवमुभयविधाना[म्] कलान[ाम्] तात्कालिके सम्बन्धे मध्यकक्ष्या-

व्याख्या—1. The Ms. reads इच्छाया

व्यासार्धे ज्ञाते। अन्यत्राप्येकविधकलानां संख्यया ज्ञातज्ञाततया (?) अन्याधीनानां कलानामपि तद्गता संख्या ज्ञेया । अत्र त्रैराशिवाचोयुक्तिश्चैवम्— इदानीं मध्यकक्ष्याव्यासार्धे ज्ञाते कर्णकलासंख्यया त्रिज्या [ज्ञा]ता । कर्णविपरीत-कर्मणाऽऽनीतया तद्गतैव ग्रहवृत्तकलासंख्या त्रिज्यातुल्यैव लभ्यते, तदा स्फुटकक्ष्याव्यासार्धगतया त्रिज्यातुल्यया स्वकलासंख्यया तद्गता ग्रहवृत्तकला-संख्या कियतीति । तत् किमिति अत्र न मीयते । 'मान्दे कक्ष्यैव नीयते' इति ह्युक्तम्, स्फुटकक्ष्याकलाप्रमिताभ्यां कक्ष्याद्वयव्यासार्धाभ्यामपि तत् त्रैराशिकस्य कर्तुं शक्यत्वात् । तत्र त्रिज्योक्तं कर्म विपरीतकर्मानीतेन कार्यम्, कर्णोक्तं कर्म त्रिज्यया च । तदपि—

सर्वत्र विष्कम्भदलं श्रुतौ वा व्यासार्धके स्याद् विपरीतकर्णः ।

इति अस्मद्गुरुणा उक्तम् । व्यासे दलीकृते, व्यासार्धस्थाने इति यावत् । तस्य सुखबोधत्वाच्च । '**एव**'-कारेण पूर्वैरुक्तकर्णानयनमेव निरस्यते । असकृत्कर्मणाप्यविशेषस्या सिद्धेश्च **नीयताम्** इति वा पाठः । मध्यकक्ष्याव्यासार्धेन स्फुटकक्ष्याव्यासार्धानयनम् । एवं मान्दकर्मणि इतरेतराश्रयदोषः, न पुनर्वैपरीत्ये। अत्र कर्णस्त्रिज्यातुल्यः कल्प्यः, फलाभ्यां सावर्ण्यार्थम् इत्येव विशेषः । पुनस्त्रैराशिके पुनर्नानाभूतः कर्ण आनीयतां वा, मा वा इत्यभिप्रायः ।

शीघ्रकर्णे तत्परिधेः कर्णानुसारि वृद्धिह्रासाभावात् नेतरेतराश्रयः । तत्र बाहुफलं च त्रिज्यागुणितं कर्णहृतं चापितं च संस्कार्यम् । तत्र अर्केन्द्वोर्मान्द-भुजाफलचापसंस्कृतमेव मध्यमं स्फुटं स्यात्, भ्रमत्प्रतिमण्डलमध्यमार्गभूतस्य मन्दपरिधेर्नाभ्या भगोलघनमध्यगतत्वात्, शीघ्रोच्चपरिधेरभावात् ।

'ज्ञातभोगग्रहं वृत्तम्' (सि० दर्पणम्, २२) इत्याद्युक्ता युक्तीः ग्रहस्फुटलम्बनादिषु तत्तदपेक्षिताः क्रमेण योजयिष्यामः । तत्र रवेर्विक्षेपाभावात् शीघ्रोच्चतत्परिध्योरभावाच्च मन्दोच्चतत्परिध्योः सद्भावाच्च तत्स्फुटयुक्तयः प्रथमं योज्यन्ते ।

तद्भ्रमणवृत्तं तत्र प्रतिमण्डलम् । ततस्तदत्र ज्ञातभोगग्रहं विवक्षितम्, यतः सदैव तन्नाभिगतदृष्टेस्तद्गतिः समैव । सैव मध्यगतिश्च, तस्य[ा] भगोलेन सहदेश-नाभिकत्वात्, भगोलगतराश्यादिस्थितिवशात्, कर्माधारभूत-कालविशेषाणाम् मासतिथिनक्षत्रादीनां च भगोलगत्यायत्तत्वात् । सैव ज्ञेया । तस्य[ा] मध्यगतिसाधनत्वादेव मध्यमानयनम् । तस्य[ाः] तिथ्याद्या-

[क्रान्तिः]

क्रान्तिकोटिद्युवृत्तेऽपि[1] स्वकला ह्यसुभिः समाः ।
अन्त्यद्युज्येष्टभक्रान्त्योः क्षेपकोटिघ्नयोर्युतिः ॥ २८ ॥

वियुतिर्वा ग्रहक्रान्तिस्त्रिज्याप्ता[2] कालदोर्गुणः ।
अन्त्यक्रान्तीष्टतत्कोट्योः स्वद्युज्याप्तापि पूर्ववत् ॥ २९ ॥

[व्यतीपातः—लाटवैधृतौ]

[3]अर्केन्द्वोरयनात् साम्ये लाटो मध्याच्च वैधृतः ।

[द्विस्पृग्वृत्तम्]

द्विस्पृग्वृत्तेऽर्कभासेन्दोरर्धं भात्यतिरोहितम् ॥ ३० ॥

नयनेनान्तरितमेव रवीन्द्वादिमध्यमानयनम् । तस्या भगोलघनमध्यगतदृष्टेः समन्ततो या गतिः सैव स्फुटगतिः । ग्रहभगोलघनमध्यप्रोतसूत्रगतिरेव हि तद्गतिः । तस्य[ाः] सर्वदा वेग[ा]साम्यम् । तद्वशादेव सौरमासादीनां भेदः । तत्सूत्रस्य मान्देय[?मान्द्ये] मासानां महत्त्वं शैघ्र्येऽल्पकालत्वं च । एवं नक्षत्रादे रवीन्दुसूत्रगतिवैषम्याद् वृद्धिह्रासौ । तस्माद् भगोलमध्यस्य तत्र ज्ञेयभोगत्वम्, तन्मध्यकर्णवृत्तगतेः ज्ञेयत्वात् । कर्णवृत्तमेव ज्ञेयभोगग्रहम् । तेन सदेशनाभिकं प्रतिमण्डलतुल्यं कक्ष्यावृत्तं कल्प्यते, मध्यस्फुटभुजान्तरप्रदेशप्रदर्शनार्थम् । तेन विनापि स्फुटयुक्तिः प्रदर्श्या । अतो लाघवायैव तत्कल्पनम् ।[1]

मूलम्— 1. E. F. omit पि

2. A. प्तं ; D. प्त ; F. and alternative reading in D, प्ता

3. F. भार्केन्द्वो (corrupt).

व्याख्या—1. The commentary in the Ms. breaks off here.

[ग्रहणादिः]

स्वदृग्गोलगतिक्षेपबिम्बैर्ज्ञेयं ग्रहादिकम् ।
तन्मध्यभुक्तिसाम्ये स्यादासत्तिर्भिन्नमार्गयोः ॥ ३१ ॥

[ग्रन्थसमाप्तिः]

विंशत्यानुष्टुभां स्पष्टं कृतं शास्त्रमिहाखिलम् ।
दशभिर्न्यायमार्गश्च संक्षेपादेत्र दर्शितः[1] ॥ ३२ ॥

॥ इति गार्ग्य-केरलसद्ग्राम-नीलकण्ठविरचितम्
सिद्धान्तदर्पणं समाप्तम् ॥

मूलम्— 1. B. has, after this, a verse indicating the name of the scribe and another on the subtraction of angles in arcs :

गार्ग्यकेरलसद्ग्राम-नीलकण्ठेन निर्मितम् ।
सिद्धान्तदर्पणं शास्त्रमलिखत् शङ्कराभिधः ॥

इष्टज्ययोश्च तत्कोटयोर्भेदवर्गैक्यतः पृथक् ।
द्वि(?त्रि)ज्याप्ताद्ध्यंशवर्गाढ्यान्मूलं चापान्तरं भवेत् ॥

श्रीकृष्णः प्रीयताम् ।

THE MIRROR OF THE LAWS (OF ASTRONOMY)

(Siddhānta-darpaṇa)

By

GĀRGYA-KERALA NILAKAṆṬHA SOMAYĀJI

Salutation

1. Having saluted the illustrious Dāmodara and also the divine Ravi (the author's teachers), (the knowledge of) the motion of heavenly bodies, which I have acquired through their grace, is expounded here.

I. UPADEŚA SECTION

Revolutions of the planets (Graha-paryaya)

2-5. Commencing from a sunrise at Laṅkā, the number of eastward revolutions of the Sun in a *kalpa* is four hundred and thirty-two multiplied by ten million, *i.e.*

	4,32,00,00,000
(that) of the Moon is	57,75,33,32,321
(that) of the Earth	15,82,23,78,39,500
(that) of Mars	2,29,68,62,137
(that) of Mercury	17,93,71,20,175
(that) of Jupiter	36,41,60,611
(that) of Venus	7,02,22,70,552
(and) of Saturn	14,65,71,016

These are the numbers of revolutions of the planets in a *kalpa* along their respective orbits (from west) to east.

(Of these) each of the planets other than the Earth is the lord of a day of the week.

Revolutions of the higher apses (Mandocca)

6-7 a. (The numbers of revolutions) of the higher apses (*mandocca*) of these (planets in a *kalpa*) are :

(Sun)	353
(Moon)	48,81,23,318

(Mars)	754
(Mercury)	494
(Jupiter)	601
(Venus)	272
(Saturn)	54

Revolutions of the ascending nodes (Śīghrocca)

7 b.-8 b. (The numbers of revolutions of the ascending nodes), which move backward (from the east) to the west, are, beginning with the Moon :

(Moon)	23,22,96,745
(Mars)	834
(Mercury)	902
(Jupiter)	825
(Venus)	766
(Saturn)	757

Maximum latitudes (Parama-vikṣepa)

8 b.-9 a. The (maximum) latitudes of the epicycles of the higher apses at their halves, depending on the distance of the planet from the nodes, are, in units of quarter degrees (*i.e.*, 15′) :

(Moon)	18 (×15=270′)
(Mars)	6 (×15= 90′)
(Mercury)	21 (×15=315′)
(Jupiter)	4 (×15= 60′)
(Venus)	11 (×15=165′)
(Saturn)	8 (×15=120′)

Epicycles of the equation of the apses (Manda-paridhi)

9 b.-c. (The magnitude of the circumferences[1] of the epicycles of the equation of the apses) in terms of 4½ parts of themselves (*i.e.*, in terms of 4½ degrees) are :

1. The magnitude of the circumference is given in proportion to that of the circumferences of the orbits of the respective planets which are taken to be 360°, the number of degrees in a circle.

(Sun)	3 (×4½=14°)
(Moon)	7 (×4½=31½°)
(Mars)	16 (×4½=72°)
(Mercury)	14 (×4½=63°)
(Jupiter)	8 (×4½=36°)
(Venus)	3 (×4½=14°)
(Saturn)	10 (×4½=45°)

Epicycles of the equation of conjunction (Śighra-paridhi)

9 d-10. (The circumferences of) the epicycles of the equation of conjunction, beginning with Mars, are, in the odd quadrants :

(Mars)	53 (×4½=238½°)
(Mercury)	31 (×4½=139½°)
(Jupiter)	16 (×4½= 72°)
(Venus)	59 (×4½=265½°)
(Saturn)	9 (×4½= 40½°)

These same (epicycles) reduced, respectively, by 2, 2, 1, 2, and 1 give the circumferences of the even quadrants :

(Mars)	51 (×4½=229½°)
(Mercury)	29 (×4½=130½°)
(Jupiter)	15 (×4½= 67½°)
(Venus)	57 (×4½=256½°)
(Saturn)	8 (×4½= 36°)

Measure of the Yuga-s

11. One thousandth of a *kalpa* is a *yuga*. Seventy-one (of these) *yuga-s* constitute (the period of) a Manu, (there being, thus, fourteen complete Manu periods in a *kalpa*). Between the periods of (each) Manu and at the beginning and end (of the *kalpa*) there are intercalary periods each equal to (the duration of) a *Kṛta* age.

12. The *Kṛta* and other ages (*viz.*, *Tretā*, *Dvāpara* and *Kali*) are, respectively, four-tenths, three-tenths, two-tenths and one-tenth of a *yuga*.

The present is the *Kali* age in the twenty-eighth *yuga* of the seventh Manu.

Segments of a revolution (Bhagaṇāṁśa)

13 a.b. The revolution of a planet can be divided into 12 (segments called signs, their) 30th (parts called degrees and the) 60th parts (of a degree called minutes).

Linear velocity of planets in yojana-s

13 c.d. The Moon's daily motion in minutes multiplied by ten will give the daily linear velocity of the planets (in *yojana-s*) (which is the same for all planets including the Sun and the Moon) (being 7906 *yojana-s*).

Diameters of the Earth, Moon, and Sun

14. The terrestrial sphere is 1050 *yojana-s* in diameter and it stands in the sky, in the centre of the celestial sphere, 'as the lowest point'.

The Moon is 315 *yojana-s* (in diameter) and the Sun 4410 *yojana-s*.

Position of the city of Avanti

15 a-b. The city of Avantī (Ujjain) lies (directly) north of Laṅkā (which is on the equator) by one fifteenth part of the circumference of the Earth.

The orbit of the stars (Nakṣatra-paridhi)

15 c-d. (The *Pravaha* wind) is driving the stars in a westerly direction (on an orbit equal to) sixty times that of the Sun.

The position of the ecliptic (Apakrama-vṛtta)

16. And thereby the two halves of the central circle of the celestial globe, (*i.e.*, the ecliptic), move away respectively towards the north and the south from the central (circle) of the *Vāyu-gola* (*viz.*, the *Viṣuvan-maṇḍala* or celestial equator) by 24 degrees.

Precession and procession of the equinoxes (Ayana-calana)

17. The conjunction (of the equinoxes) moves east and west by 27 degrees on each side. This increase and decrease (*i.e.*, moving east

and returning, then moving west and returning) occurs regularly, (each increase or decrease taking place) once in five divine years (*i.e.*, once in 1800 ordinary years).[1]

The position of the equinoxes at a specific date

18. Taking the time when one-eighth of the dawn[2] of the *Kali*-age had passed and increasing this number by its one-hundredth part (we find) a moment when the two solstices were roughly in the middles of Sagittarius (Dhanus) and of Gemini (Mithuna), respectively.[3]

Epicycles of the equations of the centre and conjunction (Manda-Śighra-vṛtta)

19 a-b. (The centres of) the circles, along which (the mean motion of) the planets takes place, move on (the circumference of) the epicycle of the equation of the centre (*manda* epicycles) with the velocity of the higher apses.

19 c-d. In the case of the Sun and the Moon it (*i.e.*, the *manda* epicycle) has its centre at the centre of the Earth-sphere.

---

1. One divine year is equal to 360 ordinary years. Thus, to complete one oscillation, both ways, it would take $4 \times (5 \times 360) = 7200$ years.

2. The twelfth part of the total duration of a *yuga* in its beginning is its dawn (*sandhyā*) and the twelfth part at the end is the twilight (*sandhyāṁśa*).

3. The date works out to the Kali year 4545 (A.D. 1443). For:

No. of years in a *catur-yuga*		=	4320000 years
„ „ Kali-age	$\frac{1}{10} \times 4320000$	=	432000 „
Kali-age dawn	$\frac{1}{12} \times 432000$	=	36000 „
One-eighth part of above	$\frac{1}{8} \times 36000$	=	4400 „
One-hundredth part of the above	$\frac{1}{100} \times 4500$	=	45 „
Date specified		=	4545 Kali

The author says in his commentary that he has mentioned this to specify the year of his birth. *Cf.*, **स्वजन्मकालज्ञापनार्थं चैवमुक्तम्। तत्र अहर्गणश्च 'स्यजान्यक्षतां तर्कः'** (16,60,181) **इति।** (p. 17, above).

20 a-b. For the other (five planets) the centre (of the *manda* or 'slow' epicycle) moves on (the circumference of) the epicycle of the equation of conjunction, *i.e.*, the *śīghra* or 'fast' epicycle) with the mean velocity of the Sun.

20 c-d. The centre of their *śīghra* epicycle is the centre of the (celestial) globe itself and (the planes of) these (epicycles) are not oblique to (that of) the ecliptic ; (*i.e.*, they are in the same plane as the ecliptic).[1]

21. In the case of Mercury and Venus, their own orbits are stated to be the same as their *śīghra* epicycles, measuring them with respect to their *śīghra* epicycles (which are taken as 360 degrees each).

In the case of these, the increase and decrease of the *manda* epicycles alone are according to the hypotenuse (extended from the centre of the *manda* epicycle to its circumference where the planet is).

II. NYĀYA SECTION

Eccentric and Orbital Circles

(Pratimaṇḍala and Kakṣyāmaṇḍala)

22. In all cases, the circle on which the velocity of a planet is measured (from fundamentals) is termed the 'eccentric circle' (*prati-maṇḍala*). And, that circle on which the motion of the planet is to be (projected and) understood (*i.e.*, measured) is termed the 'orbital circle' (*kakṣyā-maṇḍala*).

23 a-b. When they are one outside the other, (the outer) one is called the upper (*ucca*) (circle) and (the inner) one lower (*nīca*) (circle).

23 c-d. Here, the two circles of radii equal to the difference between the centres of the orbital and eccentric circles are drawn at the extremities of the joining the two centres ; these two will then be the *ucca* (upper) and *nīca* (lower) circles.

24 a-b. The motions of the planet and higher apses are to be taken here in opposite directions.

1. The idea is that the 'fast' (*śīghra*) epicycles are concentric with the ecliptic and lie in its plane and that the celestial latitude (*vikṣepa*) of the planets is caused by the deflection of the 'slow' (*manda*) epicycles which move on the circumference of the 'fast' (*śīghra*) ones. The maximum deflection of each planet is given in verses 8c-9a above.

24c-25b. When the eccentric circle (*jñāta-bhogavṛtta*) is oblique in relation to the orbital circle (*jñeyabhoga-vṛtta*), their cosines (*koṭi*) are to be taken as their radii. And the difference or sum, (as the case of may be), of the sines of the two circles is to be taken as the latitude of the eccentric circle.

Definition of sine, etc.

25 c-d. The sum of the squares of the sine (*doḥ-bhuja*) and cosine (*koṭi-bhuja*) is a square with the hypotenuse as a side.

26. The sine is the (perpendicular) distance from the planet to the line joining the upper (*ucca*) and lower (*nīca*) points through the centre of the orbital circle. The cosine is the height of the perpendicular to the planet (from the centre of the orbital circle). And the hypotenuse is the distance from the centre of the orbital circle to the planet.

The Sphuṭa or geocentric position of a planet

27 a-b. The geocentric position of the planet is (obtained) by subtracting or adding the arc (*cāpa*) of the (above) sine measured as a part of a circle with the hypotenuse (as the radius) (*karṇavṛtta*), from or to (the position of) the apsis.

27 c-d. The *manda* epicycle is indeed to be derived from the angle, sine, etc. of the hypotenuse-circle (*karṇa-vṛtta*).

Declination (Krānti)

28 a-b. Even in diurnal circles substended at the ends of (different) declinations, the respective minutes are equal in number to the *prāṇa-s* (*i.e.* one-sixth of a *vināḍī*).

28c-29a. The (apparent) declination of a planet (*graha-krānti*) is obtained by multiplying (separately) the cosine of the maximum declination (*antya-dyujyā*) (24°) and the actual declination by the cosine of the latitude, and adding or substracting the results (as the case may be).

29 b-d. The same (apparent declination) can be derived also by adding to the result obtained by multiplying sine 90° by *kālajyā* to the results obtained by multiplying (separately) the maximum declination (24°) and the declination of the present planet by the cosine of the latitude.

Vyatīpāta-s : Lāṭa and Vaidhṛta

30 a-b. When the Sun and the Moon have equal declination in different *ayana-s*[1] (but remain in the same hemisphere, north or south), that is called *Lāṭa* ; and *Vaidhṛta* is when they have equal declination in the same *ayana* (but remain in different hemispheres).

The Lunar crescent

30 c-d. In the Lunar crescent (*dvi-spṛk-vṛtta*), that part of the Moon which is not hidden (from us) shines by the light of the Sun.

Eclipses

31 a-b. Eclipses should be calculated from their zenithal circles (*i.e.*, vertical circles, *dṛggola*), velocity, latitude, and (diameters of the) discs.

31 c-d. The planets are nearest to one another when the mean (angular) paths covered by them are the same.

Conclusion

31. The theory of the entire science (of astronomy) has thus been explained in twenty verses in the *anuṣṭubh* metre and in another ten, the (graphical) methods have also been (stated) briefly.

Thus ends

THE MIRROR OF THE LAWS (OF ASTRONOMY)

by Nīlakaṇṭha Somayāji

of the Garga-gotra, resident of the Kerala-sad-grāma

---

1. *Ayana* connotes the movements of the Sun to the south and north of the equator.

APPENDIX I

सिद्धान्तदर्पणसिद्धपर्ययादयः

[मङ्गलाचरणम्]

[1]अभिवन्द्य गणेशानं दिनेशादीन् ग्रहानपि ।
सिद्धान्तदर्पणे सिद्धाः कथ्यन्ते पर्ययादयः ॥[2]

[ग्रहपर्ययाः]

अनूननूत्नानररागभानुः' 'कुरङ्गराडङ्गगुणस्स' सोमः ।
सर्गाय रक्तो जितधीरखिन्नः' 'प्रियार्थविच्छिन्नसुबोधसौम्यः'[3] ॥ १ ॥

'पूज्योऽस्तु नातः[4] कविताङ्गनानां' 'प्रमोशनासूरिरखिन्नसेनः' ।
'तोकं नृपस्सोमितमस्य नूनं' क्रमाविनादेर्भगणास्तु कल्पे ॥ २ ॥

PLANETARY REVOLUTIONS ETC.

Derived from the Mirror of the Laws (of Astronomy)

Salutation

Having bowed to the Lod of the Gaṇa-s and to the planets, beginning with the Sun, the revolutions and other (particularites of the planets) derived from the *Siddhānta-darpaṇa* are set forth here.

---

1. Ms. used : No. 5867-I, ff. 169-72, of the Kerala Univ. Or. Res. Inst. and Mss. Library, Trivandrum. It begins with : हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

2. The introductory verse is not numbered in the ms.

3. This figure, *viz.*, 17,93,70,64,712 differs from that in the mss. A.B.G. of the text of the *Siddhantadarpaṇa*, which is 17,93,71,20,175.

4. The ms. reads नाथः, but नातः agrees with the correct number.

[मन्दोच्चपर्यया:]

चण्डांशो'र्गुणगो'-विधो'र्जयबलप्रस्यन्दजीवा'ऽसृजो
'वंशस्था', शशिनन्दनस्य 'विधवा', वाचस्पेत: 'पीनता' ।
काव्यस्य 'प्रसुखा', दिनेशजनुषो 'वामानना' च क्रमाद्
विस्पष्टं गदिता मृदूच्चभगणा: कल्पान्तकालोदिता: ॥ ३ ॥

[पातपर्यया: कल्पदिनानि च]

इन्दो. 'शम्भुसुतो धरारिगिरिनुद्', भौमस्य 'भल्लार्दनं'
चान्द्रे: 'प्राज्ञधनं', गुरो: 'शरविन:', काव्यस्य 'तातासनम्' ।
सौरे: 'सद्मसु' पातपर्ययगणा: कल्पे क्रमादीरिता
'नूत्नोन्मुग्धगजस्थयौधससुमोद्यानं' धरावासरा: ॥ ४ ॥

Revolutions of the planets (Graha-paryaya)

1-2. The (numbers of) revolutions (of the planets) in a *kalpa* are, beginning with the Sun :

Sun	432,00,00,000
Moon	57,75,33,32,321
Mars	229,68,62,137
Mercury	17,93,70,74,712
Jupiter	36,41,60,611
Venus	702,22,70,552
Saturn	14,65,71,016

Revolutions of the higher apses

3. 353 for the Sun, 48,81,23,318 for the Moon, 754 for Mars, 494 for Mercury, 601 for Jupiter, 272 for Venus and 54 for Saturn : thus have been stated, in order, the (numbers of) revolutions of the higher apses (of the planets) during the course of a *kalpa*.

Revolutions of the nodes and days in a Kalpa

4. Moon, 23,22,96,745 ; Mars, 834 ; Mercury, 902 ; Jupiter, 825 ; Venus, 766 ; and Saturn, 757 : these are the (numbers of) revolutions of the ascending nodes (of the planets) in a *kalpa*.

The number of (*savana* or mean solar) days in a *kalpa* is **15,77,91,78,39,500.**

[परमविक्षेपकलाः]

'असार'मिन्दो'निधनं' धराभुवः, 'शयालु' सौम्यस्य, 'नति'र्बृहस्पतेः ।
'मताय' दैतेयगुरो-'र्नरायनं' शनेः क्रमात् क्षेपकलाः परा इमाः ॥ ५ ॥

[मन्दवृत्तानि]

'गानं' 'सूनु'स्तपो' 'विद्या' 'दानं' 'लग्नं' 'नृपः' क्रमात् ।
मान्दा वृत्तकलाः सूर्याद् 'असुरै'रपवर्तिताः ॥ ६ ॥

[शीघ्रवृत्तानि]

'गुणो' 'योग'स्तपो' 'धर्मो' 'धनं' भौमात् क्रमादिमाः ।
ओजा वृत्तकलाः शैघ्रा 'असुरै'रपवर्तिताः ॥ ७ ॥

'कृष्णो' 'धीरो' 'मयः' 'सोमो' 'जनो' भौमात् क्रमादिमाः
युग्मे वृत्तकलाः शैघ्रा 'असुरै'रपवर्तिताः ॥ ८ ॥

Maximum latitudes

5. 270 for the Moon, 90 for Mars, 315 for Mercury, 60 for Jupiter, 165 for Venus and 120 for Saturn : these are the maximum latitudes in minutes (of the planets) in order.

Epicycles of the equation of the apses

6. 3, 7, 16, 14, 8, 3, 10 : these are, in order, beginning from the Sun, the circumferences of the epicycles of the equation of the apses (of the planets) in minutes divided by 270.

Epicycles of the equation of conjunction

7. 53, 31, 16, 59, 9 : these are, in order, beginning from Mars, the circumferences of the epicycles of the equation of conjunction in the odd quadrants, in minutes, divided by 270.

8. 51, 29, 15, 57, 8 : these are, in order, beginning from Mars, the circumferences of the epicycles of the equation of conjunction in the even quadrants, in minutes, divided by 270.

[कल्यादिध्रुवानि]

'जीवाढ्यभूनिखननेन' दिनाधिनाथः
'सारोद्धवः कुशधने नु' निशाधिनाथः ।
'नीलाब्जलासगजकायकृत्' उर्वराज-
'श्चेलावलीं तव निरूपय' चन्द्रसूनुः ॥ ९ ॥

'कृष्णोऽब्धिगः शिवमयो' ननु देवपूज्यः
'श्रीकृष्णनद्धशममन्य'सुरारिपूज्यः ।
'लोलम्बकान्तगिरिनुन्न' इनात्मजन्मा
'सोमोत्सुकोम्बुनिधिरत्न' हिमांशुतुङ्गः ॥ १० ॥

'धीनद्धचक्रनृपरोचन'मिन्दुपातः
कल्यादिजा ध्रुवगणाः खलु तत्पराद्याः ।
'ज्ञानोल्लसत्सूनमलार्तिनिरास' एते
कल्पादितो दिनगणाः कलितो ह्यधस्तात् ॥ ११ ॥

Position of the planets at the beginning of Kali

9.11.	*signs*	*degrees*	*minutes*	*seconds*	*tatparā*
Sun			20	41	48
Moon		4	51	49	27
Mars	11	18	37	38	30
Mercury	11	20	46	34	36
Jupiter		15	45	39	51
Venus	1	5	59	5	12
Saturn		2	36	13	33
Moon's higher apsis	3	29	3	17	57
Moon's ascending node	6	21	2	29	9

These are the positions (of the planets reckoned) from *tatparā* (1/60th of a second) onwards, at the commencement of the *Kali* age.

720,63,50,77,300 is the number of days from the beginning of the *kalpa* down to the commencement of the *Kali* age.

[४८०० कलौ मन्दोच्चध्रुवानि]

'शूली सपुत्रः', 'सुमतिर्नवीनो', 'विभुर्घनस्थः' 'कुशिको रणज्ञः' ।
'नम्यो नरेन्द्रः', 'क्षयजित्प्रसेनो' 'नूत्नाह्वा'ब्दे रवितो मृदूच्चाः ॥ १२ ॥

[४८०० कलौ पातस्थानानि]

'लीननयोयं' 'काननखिन्नः' 'षड्विधपत्रं' 'स्तेननृनेत्रम्' ।
'धिग्विधिनालं' पातगणाः स्यु'र्नूत्नह्वा'ब्दे भूमितनूजात् ॥ १३ ॥

Higher apses on Kali 4800 (A.D. 1698)

12. The position of the higher apses (of the planets), beginning with the Sun, at (the expiry of the *Kali*) year 4800, are :

	sign	*degree*	*minute*
Sun	2	17	35
Mars	4	6	57
Mercury	7	9	44
Jupiter	5	21	51
Venus	2	20	10
Saturn	7	28	16

Ascending nodes on Kali 4800 (A.D. 1698)

13. The position of the ascending nodes (of the planets), beginning with Mars, at the (expiry of the Kali) year 4800, are :

	sign	*degree*	*minute*
Mars	1	10	3
Mercury		20	1
Jupiter	2	19	46
Venus	2	0	6
Saturn	3	9	49

[१७,५५००० कलिदिनखण्डे ग्रहध्रुवाणि]

'अनूनशशिसेध्यो'नात् सूर्यवाराद्यहर्गणः ।
'हरो धर्मं शरोधंनं' 'पुरभित् पापसेवनः' ॥ १४ ॥

'पौरुषं न वरं रत्नं' रवीन्दूच्चध्रुवा इमे ।
'रघुवंनस्थो' भूपुत्रः 'सर्वविद्याज्ञ' इन्दुजः ॥ १५ ॥

'वेनो ज्ञानायनो' जीवो 'नाभिनृंपमुनि'भृंगुः ।
'दैवाधीनो नु' मार्तण्डिः 'परो हीनात्र' पन्नगः ॥ १६ ॥

सिद्धान्तदर्पणे सिद्धाः सूर्यादीनां ध्रुवा इह ।
रवीन्दूच्चा विलिप्ताद्या लिप्ताद्याश्च परे ग्रहाः[1] ॥ १७ ॥

[इति सिद्धान्तदर्पणसिद्धपर्ययादयः]

Planets on the 17,55,000th Kali day

14-17. From the (present) date of the *Kali* era reduced by 17,55,000, the week-day is to be reckoned from Sunday. The position of the planets as derived from *Siddhānta-darpaṇa* (at the expiry of that date) is given here, the Sun, Moon and the (Moon's) higher apsis from seconds onwards, and the other planets from minutes onwards :

	sign	*degree*	*minute*	*second*
Sun	9	22	59	28
Moon	8	21	14	21
Moon's apsis	2	24	6	21

The above are the positions of the Sun, Moon and (Moon's) higher apsis. (The following are those of the other planets) :

	sign	*degree*	*minute*
Mars	7	4	42
Mercury		14	47
Jupiter	1	0	4
Venus	5	10	40
Saturn		9	48
Moon's ascending node	2	8	21

[The above are the numbers of revolutions etc., derived from the MIRROR OF THE LAWS (OF ASTRONOMY)]

APPENDIX II

सिद्धान्तदर्पणस्थपर्ययभूदिनानि

'अज्ञानिनो ननु नरा लघुना' खरांशोः
'कुत्राङ्करागबलमर्थसमं' सुधाशोः ।
'जीयाद् बली रिपुजिदेव नु' तुङ्गकस्य
'स्थूलः परेषु जितधीरुरु' भूमिजस्य ॥ १ ॥

शंसी पुनस्त्रिपथगान्धुक' इन्द्रसूनोः (? न्धुसटेन्दुसूनोः)
'काव्यं तनोति कवितालम्' अमर्त्यपस्य ।
'श्रीमान्मुनिस्सुखिरुरुनं स' भार्गवस्य
'तापं नयेत्समितिवत् पुन'रर्कसूनोः ॥ २ ॥

'शोभासुताळिरुरुगौरि' विधुन्तुदस्य
'नूनं मिळद्गजसटोद्धसि साम कृत्स्नम्' ।
कल्पेऽत्र सूर्यमुखपर्ययभूदिनानि
व्यक्तं क्रमेण लिखितानि गुरोर्निदेशात् ॥ ३ ॥

सिद्धान्तदर्पणत्तिले भूदिनपर्यङ्ङल् ॥[1]

---

1. A verse invoking the twelve *rāśi-s* or *bhāva-s* in a horoscope followed by the date of transcription are given after this in the manuscript :

लग्नकर्मायान्त्यबुद्धिरिष्फवित्तधनाश्रयाः ।
रक्षन्त्वर्कादयो नित्यं विश्रमे मीनसम्भवाः ॥
'सुतस्थश्शर्मसूज्योऽर्कः' कलिः ।
श्रीनारायणः प्रीयताम् ।

The above Kali date 17,55,767 works out to A.D. 1706.

REVOLUTIONS OF PLANETS AND NUMBER OF DAYS IN A KALPA

1-3.	Sun	432,00,00,000
	Moon	57,75,33,32,321
	Moon's higher apsis	48,81,23,318
	Mars	2.29,68,62,137
	Mercury	17,93,71,20,175
	Jupiter	36,41,60,611
	Venus	7,02,22,70,552
	Saturn	14,65,71,016
	Moon's ascending node	23,22,96,745
	Number of mean solar days in a *kalpa*	15,77,91,78,39,500

Thus have been set forth explicitly, as per the instructions received from our teacher, the (number of) revolutions (of the planets) beginning with the Sun, and the (number of) days in a *kalpa*.

Such are the days and revolutions in the

MIRROR OF THE LAWS (OF ASTRONOMY)

INDEX I

INDEX OF HALF-VERSES

INDEX II

INDEX OF UNTRACED QUOTATIONS

INDEX III

INDEX OF AUTHORITIES CITED

[*Note* : Numbers refer to pages.]

ERRATA

Page	*Line*	*For*	*Reed*
8	1	पष्ठेद्	पष्ठेद् (? पठेद्)
10	4	श्लक्ष्णा	श्लक्ष्णा:
11	15	वर्षपस्तमा	वर्षपस्तस्मा
14	5	षड	षड्
16	7	गहीत्वा	गृहीत्वा
17	5	प्राण कलान्तर	प्राणकलान्तर
,,	17-18	चलांशास्त्वम्	चलांशास्स्वम्
20	24	कर्मींणि	कर्माणि
23	15	मागौ	मार्गौ
27	last line	तत्त etc.	तत्तन्नाभ्याक्रान्ता-
28	11	कर्णघत	कर्णवत्
30	8	त्रिज्योक्त	(? त्रिज्ययोक्त)
,,	9	कर्णोक्तं	कर्णोक्तं
,,	13	स्या सिद्धेश्च नीयतान्	स्यासिद्धेश्च नीयताम
,,	last line	तरय[।]	तस्य[।]